UNIVERSITY OF TORONTO
3 1761 00664355 5

B
132
V3V6
1908
cop.2

BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
G. THIBAUT, Ph. D.
No. 143.

श्रीविद्वन्मण्डनम् ।

श्रीविट्ठलनाथदीक्षितविरचितम् ।

गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचित-
सुवर्णसूत्राख्यव्याख्यासहितम् ।

श्रीमदाचार्यश्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा
रत्नगोपालभट्टेन संशोधितम् ।

VIDVANMANDANA,

By Śrî Viththalanâtha Dîkshita,

With the Commentary called Suvarna Sûtra,

By Goswâmi Śrî Purushottamjee Mahârâja;
Edited by Ratna Gopâla Bhatta.

Fasciculus I.

BENARES:
Published by the Proprietors Messrs. Braj B. Das & Co.
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press
By Harikrishna Dasa.
Benares
1908.

सूचीपत्रम्।

LIBRARY
SEP 7 1966
UNIVERSITY OF TORONTO
1120248

B
132
V3V6
1908
cop. 2

	रु०	आ०	पा०
गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	०
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली (शिला)॥)	०	१	६
परिभाषापाठः	०	०	६
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
फक्किकाप्रकाशः	०	८	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	४	०
मनोरमा शब्दरत्नसहिता	७	०	०
मुहूर्तमार्तण्डः सटीकः	०	८	०
लघुकौमुदी टिप्पणीसहिता	०	३	०
लघुकौमुदीभाषाटीका (पं० मथुराप्रसादमिश्र कृत) (टिप्पणीसहित)	४	०	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
व्याकरणकौमुदी (उपक्रमणिका का दूसरा भाग)	१	०	०
शब्दरूपावली	०	०	९
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
सिद्धान्तकौमुदी (पं० वामनाचार्येण संशोधिता)	१	८	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	२	०	०
…सर्गवृत्ति	०	१	०
…कौमुदी	०	६	०
…हिता	१	०	०

श्रीहरिः ।

श्रीविट्ठलनाथदीक्षितविरचितं

श्रीविद्वन्मण्डनम् ।

श्रीगोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचित-
सुवर्णसूत्राख्यव्याख्यासहितम् ।

श्रीगोपीजनवल्लभो जयति ॥

नमामि श्रीबालकृष्णं यशोदोत्सङ्गलालितम् ॥
पूतनाऽसुपयःपानरक्षिताऽशेषबालकम् ॥ १ ॥
नमामि श्रीमदाचार्यचरणान् करुणार्णवान् ॥
सुधानिधिरभूदाविर्यतः श्रीविट्ठलेश्वरः ॥ २ ॥
यद्वक्त्रोदितमुज्ज्वलश्रुतिलसन्नानाश्रुतिव्यासवाक्-
संमिश्रं रसपूरितं विजयते पीयूषमत्यद्भुतम् ॥
यस्सत्याऽनृतवादिभिः खलु समं पेपीयमानं मुहुः
पूर्वान् द्राघयतीतरान् कृशयति द्रागेव नैजैर्गुणैः ॥ ३ ॥
तत्करुणालवदर्शितसरणिः पुरुषोत्तमस्तनुते ॥
विद्वन्मण्डनयुक्त्यै सुवर्णसूत्रं सदा प्रणतः ॥ ४ ॥

इह हि श्रीमत्प्रभुचरणाः स्वीयानां मुख्यभक्तिमार्गतदुपयोगि-ब्रह्मवादाप्रचारजनितखेदमसहमानास्तन्निरासाय विद्वन्मण्डनं कुर्वन्तः स्वमार्गस्यातिगोप्यत्वं सकलप्रमाणमूर्द्धन्यश्रुतिसिद्धत्वं च ज्ञापयन्त-स्तदभिज्ञापकं मङ्गलवाक्यं शिष्यशिक्षायै ग्रन्थारम्भे निबध्नन्ति ।

श्रीकृष्णाय नमः ।

निजमुरलिकानादाह्वानागतव्रजसुन्दरी-
निरुपमनवस्नेहाऽम्भोधेर्विचित्रतरोर्मिभिः ॥
किमपि परितश्चाऽऽर्द्रार्द्रोऽस्तु प्रभुः प्रकटीभवन्
प्रतियुवतिसंभेदेनाऽस्मदृशां विषयः सदा ॥ १ ॥

निजमुरलिकेति । निजा स्वीया चाऽसौ मुरलिका च निजमुरलिका तस्या नादेन, निजेन वा मुरलिकानादेनेति गानात्मकशब्देन यदाह्वानम् आकारणं, तेनाऽऽगता या व्रजस्य, अह्नचापूतं निशि शयानमिति वाक्यात् सर्वथा स्वीकृतस्य गोकुलस्य संबन्धिन्यः सुन्दर्यः, तत्स्थास्तस्माच्च भिन्नाः । एतास्तु, न स्त्रियो व्रजसुन्दर्य * इत्यादिश्रुतिपुराणप्रतिपादितास्तासां निरुपम उपमाया निष्क्रान्तो रहितो यः स्नेहो भक्तिः, स्नेहो भक्तिरिति प्रोक्त इति वाक्यात्, सोऽम्भोधिरिव स्नेहाऽम्भोधिः । उपमितं व्याघ्रादिभिरित्युपमितिसमासः । तस्य विचित्रतरोर्मयः । विशेषेण चित्राः नानाविधव्यभिचारिभावमिश्राः । तादृशत्वं सोपमायां मर्यादाभक्तावप्यस्तीति ततोऽतिशयबोधनाय तरप् । तादृशा या ऊर्मयस्तरङ्गा । ऊर्मिर्वाञ्छायाम् । नानामनोरथाः । स्नेहस्य समुद्रत्वकथनादूर्मिपदं निगीर्याध्यवसानेन मनोरथलाभः । पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शरा * इत्यादाविव ताभिः किमपि अनिर्वचनीयं यथा स्यात्तथा परितः । तासां बहुत्वात् सर्वतश्च, आर्द्रार्द्रः अतिशयेनार्द्रः । समुद्रोर्म्युपगूढस्य तथात्वम् अतिशयितव्याप्त्यैव भवति । सा च बहुकालस्थित्यैवेत्येवं बहुकालमेतत्सूचनेन तासु कृपावत्त्वं भगवतः सूचितम् । यत एवमार्द्रार्द्रः । अत एव प्रतियुवतिसंभेदेन प्रकटीभवन् प्रतिलक्षणे । युवतिं युवतिं लक्ष्यीकृत्य यः संभेदः संगमः, कृत्वा तावन्तमात्मानं यावतीर्गोपयोषितः * इति वाक्योक्तस्तेन हेतुना प्रकटिततावद्रूपः, प्रभुः । स्वयमिति पाठे मूलरूप इत्यर्थः । अस्मद्दृशां वृत्तिरूपक्षानां नेत्राणां सदा सर्वकालं विषयो गोचरोऽस्त्विति प्रत्यगाशीः ॥

अत्र विषयपदस्य यौगिकार्थोऽपि रूढार्थोपोद्बलकतया विवक्षितः । विशेषेण सिनोति बध्नातीति विषयः आसेचनकदर्शने नेत्रयोस्तथात्वस्यानुभवसिद्धत्वात् । तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शन*इति वाक्यसिद्धत्वाच्च । तथाचेन्द्रियैर्विषयाकृष्टैरिति न्यायेन भगवतैवान्तर्बहिरिन्द्रियाकर्षणेन या सर्ववृत्तिगोचरता तस्या आशास्यत्वं व्यज्यते । नचेदं रूढ्या प्राप्यते । स्वरूपसंबन्धवैशिष्ट्यमात्रेण कृतार्थत्वात् । नापि योगेन । विशेषाणां बहुत्वात् । अतो व्यञ्जनयैवेति निश्चयः । नेत्रपक्षे तु भगवतस्तावद्रूपस्य दर्शने नेत्रद्वयस्य पर्याप्तत्वं न भवतीति तद्बहुत्वस्याप्याशास्यत्वं व्यज्यते । उभय-

मपीदं वरणैकलभ्यमेतन्मनोरथोऽपि तथेति तत्सूचनेन स्वस्य वृतत्वमपि ध्वन्यते । व्यञ्जना च तात्पर्यवृत्तिरेव, न त्वतिरिक्ता । अर्थगताया लक्षणाया इव वक्तृगतस्य तात्पर्यस्यापि शब्द आरोपाच्छब्दवृत्तित्वव्यवहार इत्यादिकं प्रस्थानरत्नाकरे व्युत्पादितमस्माभिः । वस्तुतस्तु बुभुत्सिताऽवाचकत्वेऽपिं तत्प्रतीतिजनकत्वमेव तात्पर्यमतो न कोऽपि संदेहः । अनिर्वाच्यत्वं तु रसरूपस्यैव । यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेत्यत्रानिर्वाच्यत्वं यद्यपि ब्रह्मणः श्रावितं तथापि, रसो वै स इति रसरूपत्वं पूर्वानुवाके प्रकृत्य तदुत्तरमेतस्य श्रावितत्वात्तादृशस्यैव तथात्वं, न त्वीश्वरादिरूपस्य । तं त्वौपनिषदं पुरुषं पृच्छामि, अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः, सर्ववेदान्तप्रत्ययमित्यादिश्रुतिस्मृतिन्यायेषु तस्य प्रतिपादनात् । एतेन विरुद्धधर्माश्रयत्वं बोधितं भवति । परित आर्द्रार्द्रत्वकथनेन यत्कृपावत्त्वं सूचितं तदपि लीलानित्यत्ववादसमाप्तौ व्युत्पाद्यम् । एकादशे, रामेण सार्द्धमित्यादिसंदर्भेण तासां स्तुतिपूर्वकं सर्वात्मभावोपदेशेन ततश्चाऽभयप्राप्तिकथनेन तद्रीतिकभावेन भजत्स्वपि भगवतः कृपालुतासूचनार्थमपि ज्ञेयम् । क्षुद्रोपमया स्नेहस्याऽम्भोधितुल्यत्वसूचनमपि तस्याऽनन्तत्वाय । तेन निरुपमत्वोक्तेर्न विरोधः । स्नेहश्चात्मनो मनसो वा योग्यो धर्मविशेषः । न त्विच्छा । तस्मिन् स्निह्यामि प्रीणाम्यनुरज्यामि नेच्छामीत्यनुव्यवसायात् । अत एव न ज्ञानमपि । तस्य द्विष्टादावपि तुल्यत्वाच्च । तस्य नवत्वं च इतरत्र तदप्रकटनात्, न तु जन्यत्वात् । वाक्यान्वयाधिकरणे तथैव सिद्धेः । निरुपमत्वं च मोक्षसुखादप्याधिक्यबोधनाय लिङ्गभूयस्त्वाधिकरणे तथा व्युत्पादनात् । प्रजापतिरमृतमानन्द इत्युपस्थे इत्यत्र मोक्षेऽपि क्वचिदुपमाया व्याख्यानाच्च । मुरलिकायां स्वीयत्वं चात्र तात्कालिको यो भगवदधरसंबन्धस्तद्वत्त्वं, न तु स्वस्वामिकत्वमात्रम् । क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते * इत्यादिवाक्यैः सर्वस्यैव तथात्वेनाविशेषापातात् । नाप्याभिमानिकतादृक्सम्बन्धित्वम् । भगवतो निरभिमानत्वात् । नापि प्रातीतिकाभिमानविषयत्वम् । तदीयमुरलिकाया अन्येन वादने तद्रागमनाऽश्रवणात् । तस्मादुक्त एव सम्बन्धो विवक्षितः । नादस्य तु साक्षात् स्वकृतत्वमेव निजत्वम् ॥

अत्र च वाक्ये स्फुटः पर्यायोक्तमलङ्कारः । तल्लक्षणं च, पर्यायोक्तं तु गम्यस्य वचो भङ्ग्यन्तराश्रयमिति । स च, परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विष इतिं, परोक्षवादा ऋषयः परोक्षं च मम प्रियम् * इति श्रुतिभगवद्वाक्याभ्यां तथा कथनस्य भगवत्प्रियत्वावगमादत्र तथा कथनायादृतः । किञ्चात्र, वंशस्तु भगवान् रुद्र इति तापनीयश्रुतेर्मुरलिकाया रुद्रात्मकत्वम् । नादश्च वर्णात्मकशब्दस्य पूर्वावस्था, आह्वानरूपात् कार्यादुत्तरावस्थामपि सूचयन्ती, वेदः शिवः शिवो वेद इति वाक्येनैकरूप्यसामानाधिकरण्याद्वेदं सूचयति । इतिहासपुराणं वेदानां पञ्चमं वेदमिति श्रुतेस्तेन रूपेण पुराणमपि संगृह्णाति । नादश्चाव्यक्तः शब्दस्तेन तदर्थस्य दुर्ज्ञेयत्वं, तेन यदाह्वानं तद्विचारं विना न भवतीति तत्कथनादत्र भगवच्चिन्तात्मकव्यासावतारत्वसूचनम् । तादृशाह्वानस्य भगद्वाक्यत्वाच्च गीतासूचनम् । एवं समभिव्याहारेण तेषां परस्पराविरोधसूचनम् । एवमाह्वानं तेन प्रमाणं सूचितम् । आगतेत्यारभ्योर्मिभिरित्यन्तेन सर्वात्मभावसाधनकथनम् । अग्रिमार्द्धेन प्रमेयम् । आशास्यतया फलतदनुभवप्रकारश्चोक्तः । एवमत्र चतुर्लक्षण्युक्तं चतुष्टयमपि संगृहीतम् । तावता विषयप्रयोजनयोः सिद्धौ प्रतिपाद्यप्रतिपादकभावः । संबन्धोऽपि ग्रन्थार्थयोः सिद्धः । आशंसयैव च तदाशंसुरधिकार्यपि बोध्यते । एतदेव समाप्तौ, तस्मादस्माभिरेवोक्तपद्धत्येति श्लोके स्फुटं वक्तव्यम् । एवमेतेन श्रोतुर्ग्रन्थश्रवणे प्रवर्तनाय यदुपयुज्यते तत्सर्वमुक्तम् । सिद्धार्थं सिद्धसंबन्धं श्रोतुं श्रोता प्रवर्तते * शास्त्रादौ तेन वक्तव्यः संबन्धः सप्रयोजन इति ॥

ग्रन्थश्च संबन्धप्रयोजनज्ञानाऽधीनशुश्रूषाजन्यश्रुतिविषयः संदर्भविशेष इति दिङ्मात्रमुक्तम् ॥ १ ॥

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ * तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इति श्वेताश्वतरश्रुतेर्गुरौ भगवतीव बुद्धिरावश्यकीति श्रीमदाचार्यान् नमस्यन्तो ग्रन्थकरणं प्रतिजानते ॥

पितृचरणान् नत्वाऽहं हरिरातिमार्गाऽम्बुजातमार्तण्डान् ॥
तदनुग्रहतः किञ्चिल्लिखामि यत्नाद् यथाबुद्धि ॥ २ ॥

पितृचरणानिति ॥ त्वं हि नः पिता योऽस्माकमविद्यायाः पारं

तारयसीति प्रश्नश्रुतेः, पातीति पितेति योगोऽत्रापि ग्राह्यः । मृतेऽण्ड एव एतस्मिन् यद्भूत् ततो मार्तण्ड इति व्यपदेश इति पञ्चमस्कन्धे मार्तण्डपदनिर्वचनम् । श्रीमदाचार्यैर्भक्तिमार्गप्रकाशने अकृत एतस्य जगतो मृतप्रायत्वं द्योतितम् । तदेव श्रीवल्लभाष्टके, नाविर्भूयाद्भवानिति श्लोके व्युत्पादितम् । तदेतन्मत्कृततद्विवृतिटिप्पणादवगन्तव्यम् ॥२॥

श्रुतिसूत्रादिमणिभिर्जटितं युक्तिमौक्तिकैः ॥
ग्रथितं कुरुते विद्वन्मण्डनं विट्ठलः सुधीः ॥ ३ ॥

एवं ग्रन्थकरणं प्रतिज्ञाय तस्य विद्वदुपयोगित्वं वदन्ति ॥ श्रुतीति ॥ विदा ज्ञानेन ठाः शून्यास्तान् लातीति व्युत्पत्त्या स्वनामयोगस्मारणेन स्वस्य दयालुत्वमपि बोधितम् । आदिपदेन गीतादिस्मृतिग्रहणम् । मणिमृष्टस्यापि मण्डनस्य मुक्ताभिः शोभातिशयादत्र तदनुकूल-तन्मूलकयुक्तीनां तथात्वम् ॥ ३ ॥

एवं ग्रन्थोपयोगमुक्त्वा तमारभमाणा विषयं संशयं च स्फुटीकुर्वन्ति

इह हि विविधवृजिनतापोपतप्यमानानिखिलजनाऽपवर्गाय श्रुति-पुराणेषु श्रवणादयः प्रतिपाद्यन्ते । तेषां विषयश्च ब्रह्मैवोच्यते । तन्निर्धर्मकं सधर्मकं वेति भवति विप्रतिपत्तिर्जिज्ञासूनाम् । उभय-रूपत्वेनापि श्रूयमाणत्वात् ।

तथाहि । अथात आदेशो नेति नेति । अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छाय-मतमोऽवाय्वनाकाशमसंगस्पर्शमगन्धमरसमचक्षुष्कमश्रोत्रमवागमनो-ऽतेजस्कमप्राणममुखमनामाऽगोत्रमजरममरमभयममृतमरजोऽशब्द-मविवृतमसंवृतमपूर्वमनपरमनन्तरमबाह्यं, न तदश्नोति कश्चन, न तदश्नोति कश्चन । दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्य-जः । अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्, महान्तं विभुमात्मानं मत्वा धीरो, न शोचति । अप्राणो ह्यमनाः शुभ्रः । असङ्गो ह्ययं

पुरुष इत्यादिश्रुतिभिः । अव्यक्तोऽयमचिन्त्योऽयम । न सत्तन्नासदुच्यते । स वै न देवाऽसुरमर्त्यतिर्यङ् न स्त्री न षण्ढो न पुमान् न जन्तुः, नायं गुणः कर्म न सन्न चासन्निषेधशेषो जयतादशेष इत्यादिपुराणवाक्यैश्च निर्विशेषं ब्रह्म प्रतिपाद्यते ॥

यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते इत्यादि । स ईक्षांचक्रे स आत्मानमेवावेदहं ब्रह्मास्मीति । सर्वस्य वशी, सर्वस्येशानः । यः सर्वज्ञः सर्वशक्तिः । विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्, संबाहुभ्यां धमति संपतत्त्रैः, द्यावाभूमी जनयन् देव एकः । सर्वकामः सर्वगन्धः सर्वरस इत्यादिश्रुतिभिः । सर्वतः पाणिपादान्तं सर्वतोऽक्षिशिरोमुखम्, सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति । निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मकशरीरगुणैश्च हीनः ! आनन्दमात्रकरपादमुखोदरादिः सर्वत्र च स्वगतभेदविवर्जितात्मा इत्यादिस्मृतिभिश्च सविशेषं प्रतिपाद्यते ॥

इह हीत्यादि ॥ आपाततः प्रतीतः संदिग्धोऽर्थो विषयः । स चाऽत्र ब्रह्मैव ॥ विप्रतिपत्तिरिति ॥ विरुद्धं ज्ञानम् । तथाचोभयरूपत्वेन श्रूयमाणत्वाद्विप्रतिपत्तिः । ततश्च जिज्ञासूनामुक्तरूपसंशय इत्यर्थ ॥ अथात इति ॥ बृहदारण्यके मूर्त्तामूर्त्तब्राह्मणे श्रूयते । एतदर्थस्तु स्वयमेवाग्रे वक्तव्यः ॥ अपाणीति ॥ श्वेताश्वतरे तृतीयेऽध्याये श्रूयते । एतद्ग्रिमार्द्धन्तु, स वेत्ति वेद्यं न च तस्य वेत्ता तमाहुरग्र्यं पुरुषं महान्तमिति । अर्थस्तु– अज्ञानसाक्षित्वेन गच्छतीव भातीति जवनः । एवमग्रेऽपि ; एवं सर्वं जडं वेत्ति तस्य वेत्ता ग्राहको ज्ञाता अन्यो नास्ति । तं पुरुषं तादृशमाहुरिति ॥ स होवाचेति ॥ बृहदारण्यकाद्व्तीये गार्गिब्राह्मणे । अत्र न स्थूलम् । अस्थूलादिपदचतुष्टयेन द्रव्यत्वप्रयोजकपरिणामनिषेधेन द्रव्यत्वनिषेधः । लौहित्यनिषेधनाग्निभिन्नत्वम् । स्नेहनिषेधेन जलभिन्नत्वम् । छाया ही-

त्तिस्तमो ध्वान्तम् तदुभयभिन्नत्वेन किञ्चिदतिरिक्तत्वशङ्कापाकृता । अवाय्वनाकाशमित्येताभ्याममूर्त्तद्रव्यनिषेधः । असङ्गमित्यनेन वासनात्वस्य । अस्पर्शमित्यादिभी रूपादीनाम् । अचक्षुष्कमित्यादिनेन्द्रियाणाम् । अतेजस्कमिति वृत्तिरूपज्ञानस्य । अनामेत्यादिभिस्तदुपलक्षितशरीरस्य अनन्तरमिति छिद्रस्य । व्यक्त्यानन्त्येन प्रत्येकनिषेधाशक्त्या भोक्तृभोग्यात्मना तदेकीकृत्य निषेधति ॥ न तदित्यादि ॥ अश्नोतीत्यत्र विकरणव्यत्ययः । अश्नातीत्यर्थः ॥ दिव्य इति ॥ मुण्डके श्रूयते । एतद्ग्रेऽप्राणो ह्यमनाः शुभ्रोऽक्षरात् परतः पर इति । अत्रैतयोर्मध्ये श्रुत्यन्तरलिखनम्, अमूर्ताशरीरपदयोरैकार्थ्येन शरीरराहित्यस्यानेकश्रुत्युक्तत्वबोधनार्थेति ज्ञेयम् । अर्थस्तु । दिव्यः द्योतनवान् । दिवि स्वात्मनि भवः अलौकिको वा । हि यस्मादमूर्तः । पूर्वं मूर्तिवर्जितः । पुरुषः पूर्णः पुरिशय । स बाह्याभ्यन्तरः । स बाह्याभ्यन्तरेण वर्तत इति । अज स्वतोऽन्यस्य निमित्तस्याभावाच्च न कुतोऽप्युज्जायते । तावता भावविकाराः सर्वे निषिद्धाः । तेषां जन्यत्वात् । अजत्वेन जरामरणक्षयभयादिकमुपलक्षणतया निवर्तितम् । यद्यपि देहाद्युपाधिभेददृष्टीनां तद्रहित एवेत्यर्थः । एवमत्र करणनिषेधः । पूर्वत्र कार्यरूपशरीरनिषेधः । शुभ्रः शुद्धः । नामरूपबीजोपाधिलक्षितस्वरूपात् क्षरात् परमक्षरं तद्रहितमव्याकृताख्यम् । ईश्वरोपाधिरूपम् । तस्मात् परो निरुपाधिकः पुरुष इत्यर्थः परमते । सिद्धान्ते तु अव्याकृतमक्षरं लोकादिस्थानीयं, तस्मात् पर ईश्वर एव । अमूर्तः । इयत्तावच्छेदकपरिमाणरहितः । स इति भिन्नं पदम् । लोकवेदप्रसिद्ध इत्यर्थः । बहिरन्तर्विद्यमान इत्येवं ज्ञेयम् ॥ अशरीरमिति ॥ इदं कठवल्लीस्थम् । अर्थस्तु । अशरीरं स्वरूपेणाकाशकल्पं, शरीरेषु देवतिर्यगादिरूपेष्वनवस्थेष्ववस्थितिरहितेषु नश्वरेष्ववस्थितं वर्तमानम् । तथाच नित्यमविकृतमित्यर्थः । महत्त्वस्यापेक्षिकत्वाद्विभुं व्यापकम् । आत्मानम् आत्मग्रहणं स्वतोऽनन्यत्वप्रदर्शनार्थम् । शब्दः प्रत्यगात्मविषय एव मुख्यः । तमीदृशमात्मानं मत्वा अयमहमिति ज्ञात्वा धीरो धीमान्, न शोचति, शोकनिर्मुक्तो भवतीतिपरमते । सिद्धान्ते तु, येयं प्रेते इति जीवप्रश्नोत्तरं श्रुत्वा, अन्यत्र धर्मादित्यनेन प्रश्नान्तरे कृते, सर्वे वेदा यत्पदमामनन्तीत्यादिना तदुत्तरकथनात् प्रकरणभेदेन नास्य शारीरकत्वम् । अतस्तद्-

निरिक्तमत्र ब्रह्मोच्यते । अत एव पूर्वत्र, हर्षशोकौ जहातीत्युक्तम् । अत्र तु शोकमात्रत्यागः । अर्थस्तु अशरीरं, न विद्यते शरीरं विशरणस्वभावं यस्मिन् तादृशं नित्यस्वात्मकधर्मकम् । महान्तम् । सर्वप्रकारैः । न तत्समः कश्चिदिति । विभुं व्यापकमिति । पूर्वत्राशरीरमहद्विभुपदानामेकार्थबोधकत्वाद्वैयर्थ्यमपुष्टार्थत्वं वा बोध्यम् ॥ असङ्ग इति ॥ बृहदारण्यके ज्योतिर्ब्राह्मणे श्रूयते । इदं च जीवप्रकरणम् । अत्र स्वप्ने रमणादिकमुक्त्वा ततो जागरणदशायां स्वाप्निकेन पुण्यपापफलेनानुविद्धत्वादसङ्गं जीवस्य वक्ति । स यत्किञ्चित् पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इति । अयम् अर्थः सिद्धान्तेऽपि तुल्यः ॥ अव्यक्तोऽयमिति ॥ गीतायां जीवप्रकरणं ॥ न सदिति ॥ गीतायां ज्ञेयं प्रकृत्योक्तम् । सत् नामरूपाभ्यां व्याकृतम् । असत् ताभ्यामव्याकृतमित्यर्थः ॥ स वा इति ॥ अष्टमस्कन्धे गजेन्द्रवाक्यम् । अत्र देवादिनिषेधेन तद्रूपता निषिद्धा । न जन्तुरित्यनेन लिङ्गत्रयशून्यं प्राणिमात्रं निषिद्धम् । किन्तु सर्वनिषेधे अवधित्वेन अवशिष्यत इति निषेधशेषः, मायया अशेषात्मकश्चेति परमतेऽर्थः । स्वमत एव विरुद्धधर्माधारत्वात् सर्वात्मक इति सैद्धान्तिकोऽर्थः ॥ यतो वेति ॥ आनन्दाद्धीति ॥ तैत्तिरीये भृगुप्रपाठके ब्रह्मलक्षणं ब्रह्मलक्षणमिदम् । यतो यस्मादिमानि ब्रह्मादितृणस्तम्बान्तानि जायन्ते । येन जातानि जीवन्ति । प्राणान् धारयन्ति । विनाशकाले च यत् ब्रह्म प्रति गच्छन्ति । अभिसंविशन्ति तादात्म्यं प्रतिपद्यन्ते । तथाच भूतानि उत्पत्तिस्थितिप्रलयकालेषु यदात्मतां न जहति तदेतद्ब्रह्मलक्षणमित्यर्थः । इदं मतान्तरे उपहितस्योपादानत्वात् परब्रह्मणस्तटस्थलक्षणम् । सिद्धान्ते तूपादानलक्षणं परस्यैवेति विशेषः ॥ स ईक्षाञ्चक्र इति ॥ एषा श्रुतिः प्रश्नोपनिषदि षोडशकलमुपक्रम्य पठिता । स आत्मानमिति शाखान्तरस्थपाठः ।

बृहदारण्यके, सोऽहेयमिति व्याख्यायते । तदात्मानमित्येवं पठ्यते । अर्थस्तु स प्रजापतिः, अहेयं यथा स्यात्तथा ईक्षाम् ईक्षणं विचारं चक्र इति । इतः पूर्वं सोऽबिभेत् । तस्मादेकाकी बिभेतीतिश्रावणात् अग्रं यन्मदन्यन्नास्ति कस्मान्नु बिभेमि इति । तत एवास्य भयं वीयायेति तत्त्वज्ञानेन भयनिवृत्तिश्रावणाच्चास्य संसारित्वं परमते, सिद्धान्ते तु, आत्मैवेदमग्र आसीत् पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनो-

ऽपश्यदित्युपक्रमे आत्मशब्दादनुवीक्षायामन्यदर्शननिषेधाच्च ब्रह्मैवा-भोच्यते । मध्ये भयकथनं तु अग्रे एकाकिनो भयबोधनाद्यर्थमेवम्प्र-कारेण भयोत्पत्तिकथनार्थम् । अन्यथाऽऽत्मेत्येवोपासीतेति, तदेतत् पश्यन् वामदेवः प्रतिपेदे इत्यादिनोक्तसर्वभावार्थकमुपासनं वेदनं चोत्कृष्टं न स्यात् । विषयस्य संसारित्वात् । अतो यथा, सोऽकाम-यतेत्यादौ कामोत्पत्तिरुच्यते एवमिह भयोत्पत्तिरुच्यत इत्येव यु-क्तमिति ॥ सर्वस्य वशीति ॥ बृहदारण्यके शारीरब्राह्मणे। वशमस्या-स्तीति वशी । तथाच सर्वनिष्ठं यदधीनत्वं तत् । एतन्निरूपितम-स्तीत्यर्थः । वस्तुतस्तु सर्वशब्दस्य, स वा अयमात्मेति पूर्वेण संब-न्धः । अहमात्मा गुडाकेश सर्वभूताशयस्थित * इति गीतास्मृतेः ॥ यः सर्वज्ञः सर्वशक्तिरिति शाखान्तरस्थम् । श्वेताश्वतरे, यः सर्व-ज्ञः सर्वविदिति पाठात् ॥ विश्वत इति ॥ तैत्तिरीये श्वेताश्वतरे च किञ्चित्पाठभेदेन वर्त्तते । अर्थस्तु आब्रह्मतृणस्तम्बान्तानां चक्षूं-षि अस्येति विश्वतश्चक्षुः ॥ उत ॥ अपि । एवमग्रेऽपि । सर्वेन्द्रियो-पलक्षणमेतत् ॥ संधमति ॥ संयोजयति ॥ पत्रैः पतनसाधनैः पादैः पक्षैर्वा ॥ सिद्धान्तेऽपि तुल्यमेतत् । मूलरूपं तथेति वा ॥ सर्वकाम इति ॥ छान्दोग्ये शाण्डिल्यविद्यायाम् ॥ सर्वत इति गीतावाक्यं त्रयोदशे । अग्रे विवरणीयम् ॥ निर्दोषेति ॥ नारदपञ्चरात्रे। एवमत्र विषयसंशययोर्बोधनाय श्रुत्यादिवाक्यान्युपन्यस्तानि ॥

पूर्वपक्षमनुयुञ्जन्ति ।

किमत्र युक्तम् ? । निर्विशेषमेवेति । कुतः ।
उपजीव्यत्वतः श्रौतवाक्यैश्चान्यपरत्वतः ।
अन्तरङ्गत्वतश्चापि निर्विशेषं निरूप्यते ॥

तथाहि । सविशेषत्वादिनापि विशेषाधारत्वेनावश्यं ब्रह्मस्वरूपमभ्युपगन्तव्यम् । अन्यथा कुत्र विशेषा निरूपिताः स्युः । तथाचाऽऽधारनिरू-पिका श्रुतिराधेयनिरूपिकया नान्यथयितुं शक्या उपजीव्यत्वात् । नच धर्मिस्वरूपं निरूप्य धर्मनिरूपणेनोभयसार्थकत्वमिति वाच्यम् । अस्थूलाद्युक्तश्रौतवाक्यैर्धर्मनिषेधश्रवणात् । ननु निर्विशेषब्रह्मनि-रूपिका श्रुतिर्धर्मान् विना न तन्निरूपयितुं शक्ता । तथाहि निरूपणं हि

लक्षणैः, तानि चासाधारणधर्मरूपाणि । अत्र च धर्माभावात् तन्नि-
रूपणपूर्वमभावमुखेनाऽस्थूलादिवाक्यैर्निरूपयन्त्या धर्मनिरूपिका
श्रुतिरुपजीव्या, अभावस्य प्रतियोगिनिरूपणाधीननिरूपणत्वात्
तथाच श्रौतत्वोपजीव्यत्वयोरविशेषादन्यतरबाधो न युक्तः । वि-
रोधात् तथाकरणे तूभयबाधो युक्तः, उक्तयुक्तेः । तथाच शून्य-
वाद आपद्येतेति वृश्चिकभिया पलायमानस्य विषमाशीविषमुखे नि-
पातः । नचैवमपि वक्तुं शक्यम् । असन्नेव स भवति असद्ब्रह्मेति वेद चे-
दिति निन्दाश्रुतेरिति चेन्मैवम् । न हि श्रुतिसिद्धा धर्मा निषिध्यन्ते,
किन्त्वनुवादपूर्वं लौकिकाः स्थौल्यादयः । तथाच क्व धर्माणां श्रौ-
तानामुपजीव्यत्वम् । नचैवं निषेधस्य भिन्नविषयत्वाद् विरोधाभावेनै-
कतरबाधो न युक्तः, तथाचोभयवत्त्वं सिद्धमिति सांप्रतम् । श्रौ-
तानामप्यर्थानां श्रोतव्यन्त्वादीनां, यतो वाचो निवर्तन्ते इत्यादिना
निषेधात् । नचोपजीव्यत्वबाधः । एवंविधस्य तस्याऽप्रयोजक-
त्वात् । अन्यथा अभावनिरूपणोच्छेदप्रसङ्गात् । नन्विदमसङ्ग-
तम् । न हि लोके यस्मिन् यदा ये धर्माः सत्त्वेन निरूपितास्ते
तस्मिन्नेव तदैव निषेद्धुं शक्याः, विरोधात् । कालभेदेन तु शक्या
निषेद्धुम् । पूर्वं श्यामत्वेन निरूपिते पाकरक्तघटे अश्यामत्वस्येव ।
न चैवं ब्रह्मणि संभवति । सदैकरसत्वात् । अतः कथं धर्मनिरूप-
णं कथं वा निषेध इति तप्तसंदंशपतितो मिथ्यावादीति चेन्न ।
धर्मनिरूपिकायाः श्रुतेरन्यपरत्वात् । तथाहि । सोपाधि ब्रह्म निरू-
पयति धर्मनिरूपिका श्रुतिरुपासनार्थम्, तथा चित्तशुद्धौ सत्यां नि-
र्विशेषं ब्रह्म प्रतिपत्स्यते इति तात्पर्येण । ततस्तादृशब्रह्मज्ञापनाय
पूर्वोक्तान् निषेधति, तेषामविद्याकल्पितत्वेनाङ्गीकारात् । अतोऽप-
वादार्थं कर्तृत्वाद्युक्त्वा निषेधतीतिकल्पने सर्वं समञ्जसमिति चेत् ।

किमिति ॥ पूर्वपक्षं गृह्णाति ॥ उपजीव्यत्वत इत्यादि ॥ उपजीव्यत्वं

निर्वाहकत्वम् । निर्वाहश्च वृत्त्यविघातः । वृत्तिस्तु क्वचित् स्वरूपस्थितिः, क्वचिदक्लिष्टस्थितिः, क्वचित् कार्यजननसामर्थ्यम् इत्यनुगता तत्र तत्र बोध्या । तथाच विशेषनिरूपकश्रुतिवृत्त्यविघातसाधकत्वेनेत्यर्थः ॥ उपजीव्यत्वत इत्यादौ सार्वविभक्तिकस्तसिः । अत्र पूर्वश्चकारः स्मार्तवाक्यसमुच्चायकः । द्वितीयश्चकारो युक्तिसमुच्चायकः । अपिर्वाद्यन्तरगर्हायाम् ॥ निरूप्यत इति ॥ श्रुत्यादितात्पर्यगोचरतयोच्यत इत्यर्थः । कारिकां व्याकरोति ॥ तथाहीत्यादि ॥ उपजीव्यत्वादिति ॥ एतेनान्तरङ्गत्वमपि बोध्यते । तेनामिक्षाधिकरणे उत्पत्तिशिष्टाया आमिक्षाया यागस्वरूपघटकतयाऽन्तरङ्गत्वम् । तथात्र स्वरूपनिरूपकाणां धर्माणां धर्मस्वरूपनिर्वाहकतयाऽन्तरङ्गत्वमिति । यथा तत्र न वाजिनेनाऽऽमिक्षाबाधस्तथात्र न धर्मैर्निर्विशेषस्य बाध इत्यर्थः । इयमेव युक्तिरन्तरङ्गत्वनश्चेति चकारेण बोध्यते । ननु धर्माणामागन्तुकत्वाङ्गीकारे पाश्चात्यत्वान्न तैः स्वरूपबाधनमिति । तदन्यथाकरणशङ्कया एवानुदय इति शङ्कां हृदि कृत्वाह ॥ नचेत्यादि ॥ अस्थूलेत्यादि ॥ यदि निषेधो न स्यात् तद्वा तथा स्यान्न तु तस्मिञ्जाग्रतीत्यर्थः ॥

अभावस्येत्यादि ॥ अभावनिरूपणं धर्मिप्रतियोगिनिरूपणाधीनमिति धर्मिणो ब्रह्मण इव प्रतियोगिनां धर्माणामप्युपजीव्यत्वादित्यर्थः ॥ उक्तयुक्तेरिति ॥ सूचिताभ्यामुपजीवकत्वबहिरङ्गत्वाभ्यामित्यर्थः ॥ उपजीव्यत्वबाध इति ॥ उपजीव्यत्वप्रयुक्तो बाध इत्यर्थः ॥ एवंविधस्येत्यादि ॥ अभावप्रतियोगितानियन्त्रितस्योपजीव्यत्वस्य स्वकार्याऽक्षमत्वादित्यर्थः ॥ इदमिति ॥ एकस्मिन् ब्रह्मणि तत्तदभावनिरूपणमित्यर्थः ॥ अविद्याकल्पितत्वेनाङ्गीकारादिति ॥ ल्यब्लोपे पञ्चमी तथाच तेषां तथात्वमङ्गीकृत्य निषेधतीत्यर्थः । उदाहरणं तु श्वेताश्वतरे, विश्वतश्चक्षुरित्याद्युक्त्वा, ततो यदुत्तरं तदरूपमनामयमिति । यथाच बृहदारण्यके मूर्तामूर्तलक्षणरूपद्वयमुक्त्वा, अथात आदेशो नेति नेतीति । एवमन्यदपि द्रष्टव्यम् ॥

अत्र ब्रूमः ।

अभेदादनुपाधित्वाज्जगदप्रसयाप्तितः ।
सर्वाधारत्वतस्तावच्छक्तित्वान्नास्य बाधनम् ॥

अत्र मिथ्यावादी प्रष्टव्यः । जगत्कर्तृत्वेशितृत्वादिविशिष्ट-निर्विशेषयोर्भेदमङ्गीकरोष्युताऽभेदम् । भेदपक्षेऽपि तात्त्विकमतात्त्विकं वा । न तावदाद्यः । सर्वत्र प्रसिद्धोपदेशादित्यधिकरणविरोधात् । अस्यार्थस्तु सर्वत्र वेदान्तेषु प्रसिद्धस्य ब्रह्मण एवोपास्यत्वेन उपदेशान्मनोमयत्वादिविषयवाक्योक्तधर्मविशिष्टं ब्रह्मैवाऽस्मिन् वाक्ये उच्यते इत्येतत् सर्वं व्याससूत्रभाष्ये विस्तृतं पितृचरणैर्विस्तरभियाऽत्र न लिख्यते। किञ्चैवं जीवे नितरां तथाऽऽयातमिति तत्त्वमसीत्याद्यभेदबोधकश्रुतिविरोधः । ब्रह्मानेकत्वापत्त्या चैकमेवेत्यादितद्विरोधः । तथा त्वयानङ्गीकाराच्च । येऽप्यङ्गीकुर्वन्ति, तेषां मते वेदान्तां तादृग्भावनापरत्वमेव, न तु वस्तु तादृशमित्युच्यते । तदग्रे निराकरिष्यते । न द्वितीयः, स तूपाधिकृत एव संभवति, घटादिकृत इवाकाशस्य । प्रकृते तादृश उपाधिः कः । सोऽप्यनादिः सादिर्वेति विचारणीयम् । अविद्यैवोपाधिः स चानादिरेवेति पक्षस्त्वसङ्गतः । तथाहि—

उभयोरप्यनादित्वेन उपहितस्याप्यनादितया तादृशस्यैव च त्वन्मते कर्तृत्वेन अविरतं सर्गः स्यान्न जातु प्रलयः । श्रुतौ ब्रह्ममात्रस्यैव इच्छाविशिष्टस्य कारणत्वोक्त्या कारणान्तरानपेक्षणात् । स्मार्तमतमवलम्ब्य गुणापेक्षाकथने तु गुणानां पौर्वापर्येणाविर्भावे हेतोरवश्यं वाच्यत्वे तदिच्छैव तादृशी वाच्या । तथा सति तद्धेतोरेवेति न्यायेनेच्छैव तथाऽस्तु, कृतं गुणैः ।

नचैवमपि त्वन्मते वक्तुं शक्यम् । उपहितस्येच्छाक्रमे हेत्वपेक्षायां तस्योपाध्यधीनतया इच्छायामपि तद्गुणा एव हेतुत्वेन वाच्याः । गुणानां क्रमे चैवं स्वभाव एव हेतुर्वाच्यः । तथाच तादृक्स्वभावविशिष्टा गुणा एव कारणानि सन्तु, कृतं तदधीनब्रह्मणेत्यनीश्वरवादः प्रसज्ज्येत । सदेव सोम्येदमग्र आसीदितिश्रुतिविरोध-

श्च । एवकारेण सतो ब्रह्मणोऽन्यस्य व्यवच्छेदात् । नच काल-वाचकाग्रपदेन तस्याऽप्युक्तत्वाद् एवकारो नान्ययोगव्यवच्छेदकः, । किन्तु तदानीमपि ब्रह्माऽऽसीदेवेत्ययोगव्यवच्छेदक इति वाच्यम् । बोधनार्थमेव तथोक्तेः । अन्यथा, सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदितिश्रुतिविरोधः । एतच्छ्रुत्यनुरोधेन अग्रपदेन च यदि कालस्यापि ब्रह्मत्वमेव मनुषे तदोमिति ब्रूमः । अत एव कालोऽस्मीति भगवद्वाक्यम्, कालरूपोऽवतीर्ण इत्याद्यपि । इदमेवोपक्रम्य, सन्मूलाः सोम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठा इत्यादिश्रुतिभिः सत एवकर्तृत्वोक्तेश्च । किञ्च त्वन्मतेऽप्युपहितस्योपाध्यधीनतया स्वातन्त्र्याभावात् कर्तृत्वानुपपत्तिः । भवेद्वा, उपाधावेव स्यान्न तूपहिते घटक्रियेव । एवमस्त्विति चेन्न । यतो वा इमानि भूतानि, सन्मूलाः सोम्येति, आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त इत्यादिश्रुतिस्मृतिन्यायव्याकोपात् । नचायम् उपचार एव सर्वत्रेतिवाच्यम् । मुख्ये संभवति तथाकल्पनस्याऽयुक्तत्वाद्, मुख्याबाधाच्च । अत एव व्यासोऽपि इममर्थमसूत्रयत्, गौणश्चेन्नात्मशब्दादिति । श्रुतावात्मपदमप्युपचारादुपाधिपरमेवेत्याशङ्कायां पुनराह । तन्निष्ठस्य मोक्षोपदेशादिति । यदात्मशब्देनोक्तं तन्निष्ठस्यैव श्रुतौ मोक्षोक्तेर्नौपचारिकमात्मपदं, किन्तु शुद्धब्रह्मपरमेवेत्यर्थः । किञ्च, त्वन्मते उपाहितस्य जीवत्वेन पुत्रादितुल्यतया तद्धेयत्वोपदेशवन्मुमुक्षुसाधनोपदेशेषु तस्यापि तथात्वं वदेन्न तु तदुपासनाम् । इतोऽपि हेतोर्निर्गुणमेव ब्रह्म जगत्कारणमित्याशयेन हेत्वन्तरमाह सूत्रकारः, हेयत्वावचनाच्चेति । किञ्च, अथातो ब्रह्मजिज्ञासा इत्यत्र निर्गुणब्रह्मजिज्ञासां प्रतिज्ञाय किंलक्षणं तदित्याकाङ्क्षायां, जन्माद्यस्य यत इत्यवदत् । तच्च सगुणनिरूपकमितिवदन् व्यासस्य प्रतिज्ञाहान्युपक्रमविरोधावपश्यन् हृदयशून्यो भासि । कि-

श्चैवं, सर्वे वेदा यत्पदमामनन्ति । वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृदित्यादिश्रुतिस्मृतिविरोधोऽपि । अतो भेदपक्षस्त्वसंगत एव । द्वितीयस्तु स्यात् । न स्याद् विरोधादिति चेन्मैवम् । अस्थूलादिवाक्यैर्जडजीवधर्मा एव ब्रह्मणि निषिद्ध्यन्ते, न श्रुतिसिद्धा जगत्कर्तृत्वादयः । तथा सति, प्रक्षालनाद्धीतिन्यायेन प्रतिपादनवैयर्थ्यापातात् । किञ्च ब्रह्मनिरूपकमहावाक्ये त्वन्मते सृष्टिनिरूपकाणि वाक्यानि असंगतानि स्युः, तदनिरूपकत्वात् ।

नन्वस्ति संगतिरध्यारोपापवादलक्षणा तथाहि, शुद्धब्रह्मणो दुर्ज्ञेयत्वेन तज्ज्ञापनाय जगज्जननमुक्त्वा तत्कर्तृभोक्तृत्वे प्रतिपाद्य तद्द्वारा सोपाधिके ब्रह्मणि बुद्धौ सिद्धायां शाखाऽरुन्धतीन्यायेन पूर्वोक्तमपोह्य कर्तृत्वाद्यपेतं ब्रह्म पश्चाद् बोध्यते इति चेन्नैवं वक्तुं युक्तम् । जगदप्रतीतिप्रसङ्गात् । तथाहि । न हि जगत्प्रतीतिः श्रुतिसिद्धा, येन पूर्वं बोधयति, पश्चान्निषेधतीत्युच्यते । किन्तु लोकसिद्धा । तथाच तत्र कर्त्रपेक्षायां कर्तारमेवोपदिशतीति वक्तुं युक्तं, न तु लोकसिद्धमेव जगदनूद्य तत्कर्तृत्वं बोधयित्वा पश्चान्निषेधतीति । तथा सति कार्यस्य प्रतीतिसिद्धत्वेन कर्त्रन्तरस्याभावाच्च जगत एवाऽसंभवेन, अनुवादो बाधितविषयः स्यात् । स्वारूढशाखाछेदनवन्माता वन्ध्येतिवाक्यवच्च सर्वार्थतत्त्वप्रतिपादिका श्रुतिः कथमेवं वदेत् । सर्वतो बलवती ह्यन्यथानुपपत्तिः । ननूपलब्धिमात्रेण न वस्तुसत्त्वं वक्तुं शक्यं, स्वप्नादिषु तथा प्रसङ्गात् । तथाच निषेधिकायाः श्रुतेः प्रपञ्चासत्त्वमेवाभिप्रेतमिति चेत्, तर्हि प्रतीतिमुपपादयतु देवानाम्प्रियः । न तावद् वासनयेति वक्तुं शक्यम्, तस्या अनुभवजन्यत्वेन, जगतश्चासत्त्वेन पूर्वमनुभवासंभवात् । नचानादित्वेन तदुपपत्तिः, सर्वेषामनुभवानां वासनाजनकत्वाऽनियमेन कदाचित् कस्यचिदर्थस्याप्रतीतिप्रसङ्गात् । निय-

मे वा सर्वदा तदुद्बोधानियमेनापि तथा प्रसङ्गः । उद्बोधकं च न दृष्टम्, अन्योऽन्याश्रयप्रसङ्गात् । नाप्यदृष्टं, दृष्टसामग्रीसंपादनद्वारैव तस्य कारणत्वात् । वैधर्म्याच्च न स्वप्नादिवदिति तत्त्वसूत्रविरोधश्च ।

ननु जीवाविद्यैव जगत्प्रतीतौ हेतुः । तथाहि । जीवब्रह्मणोरभेदबोधकश्रुत्या, भेदस्य च तत्रैव ज्ञाननिवर्त्यत्वोक्त्या भेदस्य चातात्त्विकत्वम् अज्ञानकृतत्वं च निरूपितम् । यतः परमार्थतो भिन्नस्याऽभेदासंभवो ज्ञानमप्यज्ञानस्यैव निवर्तकम् । तथाच अनादिरविद्यैवाज्ञानरूपा, अहमज्ञ इत्यनुभवसिद्धा भावरूपा तदवच्छेदिका मन्तव्या । जीवब्रह्मविभागस्याप्यनादित्वात् । बन्धोऽस्याविद्ययाऽनादिरिति वचनात् । तथाच विचित्रपरिणामशीलया अविद्ययैव दोषरूपया विचित्रं जगत् प्रतीयते । युक्तं चैतत् । कार्यस्य तुच्छत्वेन तत्कारणेनापि तादृशेनैव भवितव्यम् । कारणसजातीयत्वात् कार्यस्य । यथाच मुखसम्बन्धमात्रेण दर्पणादिकं बिम्बप्रतिबिम्बभेदनिमित्तं, तथा चिद्रूपब्रह्मसम्बन्धमात्रेण तद्भेदनिमित्तं सा । तत्कृततदध्यासवशात् स्वस्मिन्नज्ञत्वं कर्तृत्वभोक्तृत्वे मन्यमानो जीवो विधिनियोज्यादिभावं मनुते । शमदमादिभिर्गुरूपसत्तितदुपदेशश्रवणमननिदिध्यासनैश्चाऽविद्याधिष्ठानरूपस्वात्मनोऽद्वैतकूटस्थचिदेकरसत्वलक्षणस्वरूपज्ञानेन अज्ञाननिवृत्त्या तत्कार्यरूपप्रपञ्चस्याऽपि निवृत्तेः, ब्रह्म वेद ब्रह्मैव भवति इत्यादिश्रुतिनिरूपितो मोक्षः सम्पद्यते । रज्जुस्वरूपज्ञानेन प्राचीनसर्पानुभवतत्कृतभयनिवृत्त्या स्वास्थ्यमिव । ननु ब्रह्मणः सर्वज्ञस्याविद्यासम्बन्धोऽशक्यवचनः, अज्ञत्वाऽऽपादकत्वात् । नच जीवाश्रयैव सेति वाच्यम् । ऐक्याङ्गीकारात्तयोः । एतेनैव जीवस्याऽप्यज्ञत्वमनुपपन्नमितिचेन्न । जपाकुसुमाऽरुणस्फटिकस्तम्भश्रेणिगतपुरुष-

प्रतिबिम्बस्यारुणत्ववज्जीवस्याज्ञत्वावभासोपपत्तेः । तद्बिम्बस्योज्ज्वलतेव ब्रह्मणः सर्वज्ञत्वोपपत्तेः । अविद्याश्रयत्वेन नाभेदानुपपत्तिरित्येवं प्राप्ते ॥

सिद्धान्तं गृह्णते ॥ अभेदादित्यादि ॥ अत्र प्रथमतस्तदुक्तसर्वहेतुसाधकम्-अन्यपरत्वत इति हेतुं दूषयितुम् अन्त्यं निषेधन्त्यभेदादिति ॥ सविशेषनिर्विशेषयोर्भेदाभावादित्यर्थः । तत्र हेतुः—अनुपाधित्वादिति ॥ तथा सति धर्माभावमुखेनेव धर्ममुखेन निरूपयन्त्या अपि श्रुतेर्ब्रह्मपरत्वतौल्यादुपजीव्यत्वतोऽन्तरङ्गत्वत इति हेतुद्वयं दूषितम् । अनुपाधित्वे हेतुरग्रिमः । मिथ्यावादिरीत्या सोपाधित्वे जगद्प्रत्ययापत्तित इत्यर्थः । अबाधन एव हेत्वन्तरम् । सर्वाधारत्वत इति ॥ परस्पराविरुद्धसर्वधर्माधारत्वादित्यर्थः । अत्र हेतुः—तावच्छक्तित्वादिति ॥ तावती विरुद्धधर्माधारत्वसाधिका शक्तिर्यस्य, तादृशत्वादित्यर्थः ॥ एताभ्यां, श्रौतवाक्यैरिति तदुक्तो हेतुर्दूषितः ॥ अस्येति ॥ सविशेषत्वस्य ॥

पूर्वं कारिकोक्तमभेदमुपपादयितुं मिथ्यावादिनोऽसंभाष्यत्वबोधनाय सभ्यं प्रत्याहुः ॥ अत्रेत्यादि ॥ अत्र सविशेषनिर्विशेषयोर्भेदाभेदविचारे, मिथ्यावादी विशेषाणां शुक्तिरजतवदविद्याकल्पितत्वं वदन् वादी त्वया मध्यस्थेन प्रष्टव्य इत्यर्थः ॥ सर्वत्रेति ॥ चतुःसूत्रमिदमधिकरणमुत्तरतन्त्रप्रथमाध्यायद्वितीयपादारम्भेऽस्ति ॥ विरोधबोधनार्थमाहुः ॥ अस्यार्थ इत्यादि ॥ मनोमयत्वादीति ॥ छान्दोग्यपञ्चमप्रपाठके शाण्डिल्यविद्यायाम् । सर्वं खल्विदं ब्रह्म, तज्जलानिति, शान्त उपासीताथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति, स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्त इत्यादि विषयवाक्यम् ॥ अस्मिन् वाक्ये उच्यते इति ॥ मन्तव्यत्वेनोपदिश्यते । अयमर्थः । वाक्योपक्रमे सर्वस्य ब्रह्मत्वं प्रतिज्ञाय, जायते लीयते अनितीति जलान् तस्मिन् जलान् तज्जलान् । इदं सर्वं खलु सर्वावस्थासु तस्मिन्नतः सर्वं ब्रह्मेत्युपासीतेति तस्य ब्रह्मत्वेनोपासनं विहितम् । अतः परमथेत्यग्रिमे वाक्ये, क्रतुं कुर्वीतेत्यनेन, किं जीवोपासनमुपदिश्यत, उत

ब्रह्मोपासनमिति संदेहः । तत्र मनोमय इत्यादिना लिङ्गकथनात्तादृशशरीरवर्ती जीव एवोच्यते । अग्रे सत्यसंकल्पादि लिङ्गं तु ब्रह्मत्वेनोपासनार्थम् । शाखान्तरे, विज्ञानं ब्रह्म चेद्वेदेति तस्य तथोपासनस्योक्तत्वाच्च । अतः कार्यकारणयोरभेदाद्यथा पूर्वोपासना तथेयमपीति पूर्वपक्ष उच्यते ॥ सर्वत्रेति ॥ एकपदमिदं सूत्रम् । तथाच पूर्वोपासनया परमशान्तस्य मननात्मा सर्ववेदान्तप्रसिद्धब्रह्मोपदेश एव युक्तो, न तु जीवोपदेशः । एवं भगवत्स्वरूपलाभात् सारूप्यलाभाद्वा । यथासंकल्पं प्रेत्यापि तथा भाव उपपद्यते । अत्यणुत्वातिमहत्त्वादि सत्यसंकल्पादिकर्मत्वध्येयत्वप्राप्यत्वव्यपदेशोऽपि युज्यते । मनोमयत्वं तु, स एव जीव इति भगवद्वाक्याद्वेदेऽपि, न तु जीवलिङ्गैकान्तम् । वेद एव च ब्रह्मणि प्रमाणम् । तत्कार्यतश्च । अतस्तदभेदोपचारः । तस्मादानन्दमयप्राणशरीररूपः परमपुरुष एव वाक्यार्थः । तथाच यदि सविशेषनिर्विशेषयोस्तात्त्विकभेदः स्याद् व्यासचरणैः सर्ववेदान्तप्रसिद्धत्वं तादृशस्य नोच्येतातस्तद्विरोध इति भावः ॥ नितरामिति ॥ अज्ञत्वादिवैशिष्ट्यात्तथेत्यर्थः ॥ येऽप्यङ्गीकुर्वन्तीति ॥ माध्वादयो जीवब्रह्मणोस्तात्त्विकभेदमङ्गीकुर्वन्ति ॥ तादृग्भावनेति ॥ अभेदभावना ॥ अत्र इति ॥ जीवस्वरूपविचारे । अतात्त्विकभेदपक्षं दूषयन्ति । न द्वितीय इति ॥ उपाधिकृत इति ॥ प्रयोजककृत ॥ घटादिकृत इत्यत्रादिपदेन दर्पणादिसंग्रहादवच्छिन्नपक्षः, प्रतिबिम्बपक्षश्चेति द्वावपि दूषणायोपक्षिप्तौ ॥ अविद्येति ॥ त्रिगुणात्मकभावरूपाज्ञानम् ॥ अनादिरिति ॥ जीव ईशो विशुद्धा चिद्विभागस्तथानयोर्द्वयोः * अविद्या तत्कृतो बन्धः षडस्माकमनादय इत्युपगमादनादिः । असङ्गेति व्युत्पादयन्ति ॥ तथाहीत्यादि ॥ किमत्राविद्यात्वेनोपाधित्वमिष्टम् उत तस्यास्त्रिगुणत्वात्तद्गुणत्वेन विकल्प्याद्यं दूषयन्ति ॥ उभयोरिति ॥ उपाध्युपाधेययोरविद्याब्रह्मणोः ॥ तादृशस्येति ॥ अविद्योपहितस्य । कारणान्तरानपेक्षणादिति ॥ सहकार्यन्तरानपेक्षणात् । द्वितीयं दूषयन्ति ॥ स्मार्तमिति ॥ सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्त * इत्यादि पुराणवाक्यम् ॥ गुणानामिति ॥ जडत्वेन स्वतः कर्मासमर्थानाम् ॥ हेतोरवश्यं वाच्यत्व इति ॥ हेत्वनुक्तावनादीनां त्रयाणां युगपदुपाधित्वेऽनेकेश्वरापत्तिस्तदभावाय तथात्वे कृतं गुणैरित्यत्र काकुः । तथाच गुण-

ग्रहणात् पूर्वमिच्छाप्राप्त्या सिद्धे सविशेषत्वे सिद्धान्तभङ्गात्तैः कि-मपि न कृतमिति गुणानामप्युपाधित्वमसङ्गतमित्यर्थः । ननु पूर्वमवि द्ययैवेच्छोत्पाद्यते, ततस्तत्कार्यार्थं तांस्तान् गुणानुपाधीकृत्य तत्क-रोतीत्याशङ्कायामाहुः ॥ नचेत्यादि ॥ भवतु तथेच्छा, तथापि तस्या गुणसाम्यरूपत्वेन तया कार्यत्रयविषयके वा सामान्यमुत्पादनीयं, न तु तत्क्रमो नियन्तुं शक्यः । साम्यरूपत्वात् । अतस्तत्क्रमे हेत्व-ऽपेक्षायां तस्योपाध्यधीनतया सामान्येच्छायामपि तद्गुणा हेतुत्वेन वाच्याः । तत्क्रमे च तत्स्वभावस्तथेति । तथाच सति क्रमिकाविर्भावस्वभावानां तेषामेव कारणत्वापत्त्याऽनीश्वरवादप्रसक्तिरिति वे-दान्तित्वाभिमानिनस्तव मते एवं न वक्तुं शक्यमित्यर्थः । ननूपा-धेर्जडत्वेन चेतनतापेक्षणादुपहितेश्वरसिद्धेर्न तथेत्यत आहुः ॥ स-देवेत्यादि ॥ एवकारेणेति ॥ विशेष्यान्वितेन तेन । तथाचानाद्युपा-धिपक्षे, एवकारव्याकोप इत्यर्थः । एवकारस्यान्यार्थत्वशङ्कां निषे-धन्ति ॥ नचेत्यादि ॥ किन्त्विति ॥ विशेष्यान्वयापेक्षयाऽग्रपदान्यथा-नुपपत्तेर्बलिष्ठत्वादित्यर्थः । निषेधने हेतुः—बोधनार्थमिति ॥ अस्याः श्रुतेः सर्वतः पूर्ववृत्तान्तबोधकत्वात् तत्रैवकारेण सद्वितरयावद्या-वच्छेदे प्रमाणान्तरस्यापि व्यवच्छेदादग्रपदस्यानुवादकताया वक्तु-मशक्यत्वेन तत्प्रतिपादकताङ्गीकारे वाक्यभेदप्रसङ्गेन च काल-सत्ताया अशक्यवचनत्वे केवलसतोऽपि निरूपणाशक्यतया वाक्या-बोधकत्वे प्रसक्ते, सृष्ट्युत्तरव्यवहारानुसारेण सर्वाधारतया प्रतीय-मानकालोपरञ्जनतया पूर्ववृत्तान्तबोधनार्थमित्यर्थः । अत्र गमक-मप्याहुः ॥ अन्यथेत्यादि ॥ श्रुतिस्तु बृहदारण्यके पुरुषविधब्राह्म-णस्था ॥ इत्याद्यपीति ॥ आदिपदेन, विद्याविद्ये मम तनू इत्यादी-नां संग्रहः । नन्वियं श्रुतिः शाखान्तरस्थेति नास्या उक्तार्थगम-कत्वमित्यत आहु ॥ इदमित्यादि ॥ सदेव सोम्येति वाक्यमेव । त-थाच यद्युपाधिरनादिः स्यात् तदा ब्रह्मणस्तद्विशिष्टस्यैव सर्वकर्तृ-त्वं वदेदित्यर्थः । नच सच्छब्देनोपाधिविशिष्टमेव ब्रह्मोच्यते इति वाच्यम । विनिगमकाभावत् । ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिवि-धः स्मृत इति गीतावाक्यविरोधाच्च । ननु सदेव सोम्येदमग्र आ-सीदित्यस्याग्रे, एकमेवाद्वितीयमिति वाक्यशेषादेकपदस्य मुख्यत्वा-ऽर्थाङ्गीकारे मुख्यार्थाद्वितीयतया ब्रह्मस्थितिः पूर्वमभिप्रेता श्रुतौ,

न केवलाद्वितीयतया । तथैव श्रुत्यन्तरे मुख्यान्यदर्शननिषेधोऽपि । अन्यथाऽनुपसर्गविरोधात् । तदानीं गुणानां सत्त्वात् । अतो न सांख्यवन्मम श्रुतिविरोध इत्यत आहुः—

किञ्चेत्यादि ॥ तथाचेदं दूषणं तवानुद्धार्यमित्यर्थः । नन्वितरेतरसापेक्षत्वाद् भटादीनां राजाधीनत्वेऽपि कर्तृत्वदर्शनाच्च स्वातन्त्र्याभावो न कर्तृत्वबाधक इत्याशङ्कायामाहुः ॥ भवेद्वेति ॥ तत्र तेषां स्वस्वकार्ये स्वातन्त्र्येण कर्तृत्वस्य सिद्धत्वाद् युद्धादौ तदभावेऽपि न तद्बाधनम् । प्रकृते तु केवलस्याकाशतुल्यत्वात् कर्तृत्वेन सिद्धमेवेति यथा घटाकाशश्चलतीत्यत्र घटे क्रिया तथात्रोपाधावेव स्यादित्यर्थः । एवं सांख्यतुल्यतायामापादितायामप्यनादीश्वराङ्गीकाराच्च कार्येश्वरानीश्वरवादापत्तिरतोऽष्टमापादयति ॥ एवमित्यादि ॥ तत्रापि दूषणमाहुः ॥ यतो वेत्यादि ॥ एतेषु केवलस्यैव कर्तृत्वप्रतिपादनेन तद्याकोपादित्यर्थः ॥ अयमिति ॥ कर्तृत्वकथनरूपः । तथाचोपाधिगतमेव कर्तृत्वं राजा युद्ध्यतीतिवदुपहितप्रशंसार्थमुच्यते इत्यर्थः । तद् दूषयन्ति ॥ मुख्य इत्यादि ॥ मुख्य इति ॥ अनुपहिते । यदि चानुपहितस्याशरीरत्वादसम्भवो विभाव्यते तदाप्युपाधेर्जडत्वेन चेतनाधीनत्वाल्लोके शरीरिण इवात्रापि ब्रह्मण एवेच्छाविशिष्टस्य कर्तृत्वं पर्यवस्यतीत्याशयेनाहुः ॥ मुख्याबाधाच्चेति । युक्तेः समूलत्वायाहुः ॥ अत एवेत्यादि ॥ गौण इति ॥ सूत्रार्थस्तु—ईक्षतेर्नाशब्दमित्यत्र चेतनधर्मेक्षणेन निरस्ते प्रकृतेः कर्तृत्वे, पुनः सांख्येन, तत्तेज ऐक्षतेत्यादौ, कूलं पिपतिषतीतिवदीक्षतेर्गौणप्रयोगदर्शनात् तत्प्रायपठितस्य सदीक्षणस्यापि तथात्वे शङ्किते सूत्रं पठ्यते । गौण इति । ईक्षतिप्रयोगो गौण इतिचेन्न । कुतः ? । आत्मशब्दात् । सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनाऽऽत्मनानुप्रविश्य नामरूपे व्याकरवाणीति देवताजीवस्यात्मशब्देनाभिधानात् । यद्यऽचेतनं प्रधानं गुणवृत्त्येक्षणकर्तृ स्यात्तदा प्रकृतत्वात्तदेव परामृश्येत, न तु देवताजीवमात्मशब्देनाभिदध्यात् । अत ईक्षितर्यात्मशब्दाद् ईक्षतिप्रयोगो न गौण इत्यर्थः ॥ उपचारादिति ॥ यथा सर्वार्थकारिणि भृत्ये, ममात्मा भद्रसेन इति प्रयुज्यते, न तद्भोगापवर्गाभ्यां पुरुषोपकारिणि प्रधाने आत्मपदप्रयोगादुपचारादित्यर्थः ॥ यदात्मशब्देनेत्यादि यत् पूर्वं प्रकृतं सदणिमरूपं तदेव स आत्मेत्यत्रात्मशब्देनोक्तम् ।

तन्निष्ठस्यैव श्वेतकेतोश्चेतनस्य श्रुतौ, आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इत्यनेन मोक्षोक्तेस्तथेत्यर्थः । यदि हि सच्छब्दवाच्यमचेतनं तदसीति ग्राहयेत् तदा मुमुक्षुं चेतनं श्वेतकेतुमचेतनोऽसीति ग्राहयच्छास्त्रं विपरीतवादित्वादप्रमाणमेव स्यादतस्तथेति भावः । तथाचोपहितेश्वरवादेऽपि कर्तृत्वस्य नोपाधौ पर्यवसानं, किन्तूपहिते । तच्च तस्य तदेव सिद्ध्येद्यदीच्छादिमत्त्वेन तस्य स्वतन्त्रतया मुख्यत्वं स्यात् । अतोऽनिच्छतोऽपि शुद्धब्रह्मण इच्छादिविशेषवत्त्वापत्तेः । सविशेषनिर्विशेषयोरभेद एव सिद्ध इति--अन्यपरत्वत इत्यसङ्गतमित्यर्थः । नन्वेवमभेदापादनेऽपीच्छावच्छरीरस्यापि निर्वाहकत्वात् कर्तृत्वमुपहित एव सिद्ध्यति, न शुद्ध इत्यत आहुः ॥ किञ्च त्वदित्यादि ॥ निगदव्याख्यातमेतत् ॥ नन्विदं सूत्रं भवद्भिरेवं व्याख्यायते, नास्माभिः । प्रकृतवादनिरासार्थत्वात् । तथाच यदि सच्छब्दवाच्यं प्रधानं न स्यात् । तदा, स आत्मा तत्त्वमसीति इहोपदिष्टं स्यात् । पूर्वं सत उपदिष्टतया तच्छ्रवणेनानात्मज्ञतया तन्निष्ठानिवृत्त्यर्थमुख्यमात्मानमुपदिदिक्षुस्तस्य हेयत्वं वदेदतस्तदवचनान्न प्रधानं सच्छब्दवाच्यमिति व्याख्यानात् । अतो नानेनोपहितस्य कर्तृत्वनिरास इत्याशङ्कायामाहुः ॥ किञ्चाथेत्यादि ॥ तथाचोपहितकर्तृत्ववादो व्यासाशयविरुद्ध इति पूर्वोक्तं त्वदभिमतं व्याख्यानमप्यसंगतमित्यर्थः । ननु विचार एव मुख्योऽतो व्यासवाक्यविरोधो न दोषाय । अथानुरोध आवश्यकस्तदा गुणे त्वन्याय्यकल्पनेति न्यायेन जन्मादिसूत्रं तटस्थलक्षणतया नेयमित्यत आहुः ॥ किञ्चैवमित्यादि ॥ तथाचैतच्छ्रुत्यादावेकस्यैव सर्ववेदवेद्यत्वकथनात् ताटस्थ्ये च सगुणनिर्गुणयोर्भेदापत्त्या एतद्विरोधो दुर्वार इत्यर्थः ॥ सिद्धमाहुः ॥ अत इत्यादि ॥ अनाद्युपहिताङ्गीकारेण सांख्यतौल्यनिरासेऽप्युपाधिसम्बन्धकृतदूषणानुद्धारात् तथेत्यर्थः । एवं कारिकोक्तं हेतुं दृढीकृत्य सिद्धान्तमाहुः ॥ द्वितीयस्तु स्यादिति ॥ उपाध्यनङ्गीकारे ब्रह्मणः स्वतन्त्रतया यथेच्छं सर्गादिकरणादौ केवलस्य स्वस्यैव नियामकत्वादविरतसर्गापत्त्यनीश्वरवादापत्त्येवकारानुवीक्षणकर्तृत्वविरोधानामुपधानप्रयुक्तदोषाणां चाभावादभेदपक्षः स्यादित्यर्थः । एवमुपाधेस्तदनादित्वस्य च निरासेन दूषितेऽप्यतात्त्विकभेदपक्ष उपाधिस्वरूपस्यादूषि-

तत्वात् पुनः पर्यनुयोक्ष्यन् मिथ्यावादी प्रत्यवतिष्ठते ॥ न स्यादित्यादि ॥ तत्तद्भावयोः सहानवस्थानसविशेषनिर्विशेषत्वयोरेकत्र विरोधात् ॥ एवञ्च, नन्विदमसङ्गतमित्यादिना यस्तत्तसन्दंशपातो मां प्रत्युक्तः स एव त्वां प्रत्युपागादतो न स्यादित्यर्थः । तत्र समादधते ॥ मैवमित्यादि ॥ तथाचोक्तवाक्ये एवाग्रे, एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठत इत्यादिना सर्वप्रशासितृत्वद्रष्टृत्वादीनां श्रावणात्तदनिषेधाच्च न तत्र धर्मसामान्यनिषेधो येन तद्दूषणं स्यादपि तु तद्विशेषनिषेध इति निषेधविषयविवेकेन तत्र तदभावाद् द्वयोरेकत्राभावान्न विरोध इत्यर्थः । नन्वेवमप्यस्तु, न तु सर्वत्रैवं वक्तुं शक्यम् । श्रोतव्यत्वादीनां श्रौतानामपि, यतो वाच इत्यादिना निषेधादित्यत आहुः ॥ तथा सतीति ॥ तथाच तत्रापि वाचो मनश्च लौकिक्या अशुद्धं च तत्स्वरूपमित्यर्थः । ननु यथा धर्मनिरूपिका मया संकोच्यते तथा तन्निषेधिका त्वयेति तौल्यमित्यत आहुः ॥ किञ्चेत्यादि ॥ तदनिरूपकत्वादिति ॥ ब्रह्मानिरूपकत्वात् । तथाच त्वन्मते दोषबाहुल्यान्न तौल्यमित्यर्थः । ब्रह्मानिरूपकत्वं परिहर्तुं सङ्गतिं व्युत्पादयन्ति ॥ नन्वित्यादि ॥ तथाचैवं तेषां तटस्थब्रह्मपरत्वान्नासङ्गतिरित्यर्थः ॥ तां दूषयन्ति ॥ नैवमित्यारभ्य, न कर्तृत्वनिषेधो ब्रह्मणि शक्यनिरूपण इत्यन्तेन ग्रन्थेन ॥ एवमिति ॥ उक्तरीत्या ब्रह्मणि कर्तृत्वादिराहित्यम् ॥ तथा सतीत्यादि ॥ कर्तृनिषेधे सति ॥ कार्यस्य जगतः प्रतीतिसिद्धत्वेन शुक्तिकारजतवद्भ्रमसिद्धत्वेन सर्वज्ञत्वादिगुणके सोपाधिके ब्रह्मणि तदयोगेन तस्याकर्तृत्वात्तथेत्यर्थः ॥ अन्यथानुपपत्तिरिति ॥ अनुवादान्यथानुपपत्तिः ॥ अन्यथानुपपत्तिं पूर्वपक्षी समाधत्ते ॥ न तूपलब्धिमात्रेणेति ॥ लोकसिद्धेत्यनेन सिद्धमाह ॥ तथाचेत्यादि ॥ न तत्र रथा रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजत इत्यत्रेव सन्मूला इत्यादावपि भ्रमसिद्धानुवादो निषेधकश्रुतिबलादुपगम्यत इति नानुपपत्तिरित्यर्थः । समाधिमुपगम्य तद् दूषयन्ति ॥ तर्हीत्यादि ॥ यद्यसत्त्वमभिप्रेतं तर्हीत्यर्थः । स्वप्नादिप्रतीतिसामान्याऽत्रापि प्रतीतिरित्यत आहुः ॥ नेत्यादि ॥ पूर्वमनुभवेति ॥ प्राथमिकानुभवेत्यर्थः ॥ अनादित्वनेति ॥ वासनासन्तानानादित्वेन ॥ वासनाजनकत्वानियमेनेति ॥ संस्कारं प्रत्युपेक्षान्यसंशयान्यज्ञानस्यैव

हेतुत्वात् तथेत्यर्थः ॥ अप्रतीतिप्रसङ्गादिति ॥ व्यावहारिकप्रमाया अपि तव मते वस्तुतो भ्रमत्वाद् यद्विषयकमुपेक्षाज्ञानं प्रागासीत्तद्विषयकवासनाया अभावेन तस्य तथात्वादित्यर्थः। ननूपेक्षाज्ञानोत्तरमपि कालान्तरे किंचिदंशस्मरणदर्शनेन सर्वांशोपेक्षायां प्रमाणाभावात्तेषां वासनाजनकत्वं नियतमेवेति नोक्तदोष इत्यत आहुः ॥ नियमेत्यादि ॥ ननु कालोपाधेरपि सहकारित्वाद् उद्बोधकस्यापि नियम एवेत्यत आहुः॥ उद्बोधकामित्यादि ॥ अन्योन्याश्रयेति ॥ वासनया तद्विषया प्रतीतिः, प्रतीतस्य तद्वासनोद्बोधकत्वमित्यन्योन्याश्रय इत्यर्थः। अन्योन्याश्रयपदं चक्रकात्माश्रयस्यापि संग्राहकम्। ननु प्रतीतिवासनाव्यक्तीनां भेदान्नान्योन्याश्रयः। अनादिप्रवाहाच्च नानवस्थापि दोषायेत्यत आहुः ॥ वैधर्म्यादिति ॥ सूत्रार्थस्तु–जगत्स्वप्नमायाभ्रमवदसन्न। कुतः। वैधर्म्यात्। पूर्वं दृष्टस्य स्तम्भादेः संवत्सरोत्तरमपि तथैव दर्शनात् तद्वैधर्म्यात्। चकारेण मोक्षसाधने प्रवृत्त्यनुपपत्तिश्चेति। तथाच यदि श्रुत्यभिप्रायः प्रपञ्चासत्त्वे भवेत् तदा श्रुतीर्विचारयन् व्यास एवं न वदेदित्यर्थः। एवं जगत्प्रतीत्युपपादक एकस्मिन् पक्षे दूषिते पक्षान्तरेण प्रत्यवतिष्ठते—नन्वित्यादि ॥ जीवाविद्येति ॥ ब्रह्मणः, सकाशाज्जीवस्य व्यावर्तकं मूलाज्ञानम् ॥ अभेदबोधकश्रुत्येति ॥ नृसिंहतापनीयनवमखण्डरूपया महावाक्यरूपया च। एवञ्च जीवब्रह्मभेदः, अतात्त्विकः। अज्ञानकृतत्वात्। अज्ञानकृतः। ज्ञाननिवर्त्यत्वात्। यदेवं तदेवम्। शुक्तिरजतवदिति श्रुतिसिद्धानुमानेन भेदस्याज्ञानकृतत्वसिद्धौ साध्यतावच्छेदकतया श्रुतार्थतापत्त्या चाभेदकारणीभूताज्ञानस्य प्रमाणं दर्शितम्। प्रमाणान्तरमाह ॥ तथाचेत्यादि ॥ इत्यनुभवसिद्धेति ॥ विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठितमिति पातञ्जलसूत्रभाष्ये व्यासपादैः पुराणस्वारस्येनाविद्यापञ्चपर्वाख्याता। तमो मोहो महामोहस्तामिस्रमन्धतामिस्रमिति। तत्राविद्याख्यं तमोऽपरपर्यायं स्वरूपाज्ञानं तस्याः प्रथमं पर्व, तदेवान्येषां मूलम्। तदेवाध्यासरूपत्वाद्भावरूपा। तथाच यथा, अमित्रो न मित्राभावः, किन्तु तद्विरुद्धसम्पत् तथेयं ज्ञानविरुद्धमिथ्याज्ञानरूपा। माया च तमोरूपाऽनुभूतेरिति तापनीये श्राविता उक्तरूपानुभवसिद्धा। उक्तरीत्या भावरूपानादिस्तद्वच्छेदिका जीवव्यावर्त्तिका, मन्तव्या श्रुत्युक्तानुभवेनाप्यङ्गीकार्येत्यर्थः।

एवं पक्षेणापि निश्चित्य तस्या अनादित्वं साधयति ॥ जीवेत्यादि ॥ साऽनादिर्भावरूपा च । अनादिबन्धकारणीभूतविभागरूपभावकार्यजनकत्वात् । यदेवं तदेवं, ब्रह्मवत् । यन्नैवं तन्नैवं, घटाद्यज्ञानवदित्यनुमानेनाप्यनादिभावरूपत्वमङ्गिः । यद्यपि बन्धस्यानादित्वमुक्तम् । तथापि विभागात् पूर्वं बन्धे कृत्स्नस्य ब्रह्मणो बद्धत्वापत्तिरित्यगत्या विभागोत्तरकालीनत्वमाद्रियते । एवं तस्याः भावरूपत्वे दोषरूपत्वे च सिद्धे तस्याः प्रत्यायकत्वमाह ॥ तथाचेत्यादि ॥ नन्वस्तु दोषरूपत्वं भावरूपत्वं च, तथापि विचित्रपरिणामशीलत्वं कथमित्यत आह ॥ युक्तमित्यादि ॥ एतदिति ॥ विचित्रपरिणामशीलत्वम् । तथाच, जगत् तुच्छकारणकम् । तुच्छत्वात् । यद्यादृशं तत्तादृक्कारणकम् । घटादिवदिति सामान्यव्याप्त्या जगतस्तथात्वसिद्धौ तत्र साध्यतावच्छेदकतया सिद्धान्तो विचित्रपरिणामशीलतया सिद्ध्यतीत्यर्थः । एवं तस्या एकं कार्यमुक्त्वा कार्यान्तरमाह ॥ यथाचेत्यादि ॥ दर्पणादिकमित्यत्रादिपदं घटादिसंग्रहाय । एवं भेदस्यातात्त्विकत्वे जीवावच्छेदकतायां प्रकार उक्तः । तेन जीवब्रह्मभेदस्तस्या नैमित्तिकं कार्यं, जगत्तूपादेयं कार्यम् । उभयोः फलमाह ॥ तत्कृतेत्यादि ॥ भेदकृतो यः प्रतिबिम्बाद्यात्मत्वाध्यासस्तद्वशात् प्रतिबिम्बरूपे अवच्छिन्नरूपे वा स्वस्मिन्नज्ञत्वादिकमध्यस्य जीवः स्वस्मिन् शास्त्रद्वारा विधिनियोज्यत्वं तत्फलभोक्तृत्वं चान्यच्चाध्यवस्यति । एवमनर्थपरम्परारूपं तस्याः फलमुक्त्वा शास्त्रान्तरद्वारा तन्निवृत्तिमाह ॥ तत इत्यादि ॥ अज्ञाननिवृत्त्येति ॥ ज्ञानेन स्वरूपाज्ञानरूपे तस्याः प्रथमपर्वणि नाशिते तन्मूलानि मिथ्याध्यासरूपाणि पर्वान्तराण्यपि नश्यन्तीत्येवं मूलाविद्यानिवृत्तौ तत्कृताध्यासनिवृत्त्या । तथाच शास्त्रीयसाधनानां मोक्षप्रतिबन्धकीभूताज्ञाननिवर्तकत्वेन मोक्षजनकत्वोपचारः । न तु मोक्षो जन्यः ब्रह्मरूपत्वात् । अतः स्वत एव संपद्यत इत्यर्थः । एवं यावत्संबन्धं तस्या अनर्थकारित्वे निरूपिते अवच्छेदिकेत्यनेनानवच्छिन्नवादस्यापि संगृहीत्वात्तदादाय शङ्कते । नन्वित्यादि ॥ तथाच मायाविद्ययोरभेदस्वीकारादेकस्या एव संबन्धेन शुद्धचिद्रूपे ब्रह्मणि कथं विरुद्धं स्वरूपद्वयमित्यर्थः । एवमवच्छिन्नवादे आक्षिप्ते तद्विहाय मायाविद्ययोर्भेदवादमङ्गीकृत्य प्रतिबिम्बवादेन समाधत्ते ॥ उपेत्यादि ॥ अविद्याश्रयत्वेनेति ॥ अज्ञत्वादेस्त-

धात्वेन । तथाच मायाविद्ययोरवान्तरभेदान्मायावच्छिन्नं तस्यां प्रतिबिम्बितं वा चैतन्यमीश्वरः । अविद्यायां तत्प्रतिबिम्बो जीव इति पक्षे न कोऽपि दोष इत्यर्थः । एवमत्र पुरुषप्रतिबिम्बदृष्टान्तेन तटस्थब्रह्मणो व्यवधानपुरस्सरं संबन्धः । बिम्बोज्ज्वलवत्सर्वत्वं तादृस्थ्येऽपि मायाकृतं मायावच्छेदकृतं वा । जीवस्त्वविद्यायां प्रतिबिम्ब इति तदज्ञत्वादिकं सर्वमविद्यायामेवेति तादृशस्य जगत्प्रतीतिरविद्यात एवोपपन्ना । एवं जगत्प्रतीतौ सिद्धायामुपाधेः सिद्धौ सविशेषनिर्विशेषयोरवास्तवो भेद इत्यपि श्रुतार्थापत्त्यैव सिद्धमित्युभयोरप्यनादित्वेनेत्यादीनि दूषणानि श्रुतिमूलकत्वाभावादेव निरस्तप्रायाणि । तथा सति सच्छब्दस्योपहितवाचकत्वेन, यतो वाच इत्यादीनामविरोधः । एवं सति मुख्ये बाधात् कर्तृत्वमप्यौपचारिकमेव । तथा सति, गौणश्चेदित्यादीनि सूत्राण्यपि प्रधाननिरसनपराणीति न तेषामपि विरोधः । तटस्थलक्षणत्वाच्च न प्रतिज्ञादिविरोधोऽपि ॥ सर्वे वेदा इत्यादौ च वृत्तिः संकोच्येति न कोऽपि दोष इति ॥

ब्रूमः । पूर्वं जीवस्वरूपं विचारणीयं, यस्य सा शक्तिः । तत्र न तावद् ब्रह्मप्रतिबिम्बो जीव इति पक्षो युक्तिसहः । तथाहि ब्रह्मणो नीरूपत्वेन प्रतिबिम्बाश्रयस्याऽज्ञानस्य अस्वच्छत्वेन क्व कस्य प्रतिबिम्बः स्यात् । रूपवत एव प्रतिबिम्बनियमात् । दृष्टाऽनुसारिणी हि कल्पनोचिता । अन्यथा वायुदारुणोरपि बिम्बत्वप्रतिबिम्बाश्रयत्वप्रसङ्गात् । ननु दर्पणादावाकाशप्रतिबिम्बो दृश्यते । न । तावद्देशीयप्रभामण्डलस्यैव रूपवत्त्वेन प्रतीतेः । किञ्च, यत्र यदस्ति तत्र तन्न प्रतिबिम्बते, दर्पणरेखावत् । तथाच सर्वगतस्य ब्रह्मणोऽविद्यायामपि सर्वगतायां सत्त्वेन कथं प्रतिबिम्बः स्यात् । नच संयोगसंबन्धेन तत्र वर्तमानत्वमप्रतिबिम्बे प्रयोजकम्, एतयोश्च न संयोगो विभुत्वादतो नानुपपत्तिरिति वाच्यम् । संयुक्तस्यापि प्रभामण्डलस्य तथा प्रतीतेः । नच यदंशे संयोगस्तदंशे न तथेति वाच्यम् । बिसिनीसूत्रमात्रान्तरिताङ्गुली-

तलभागस्थप्रभाया अपि दर्पणे प्रतिबिम्बात् । किञ्च, द्वा सुपर्णा सयुजा, गुहां प्रविष्टौ परमे परार्द्धे, गुहां प्रविष्टावात्मानौ हि तद्दर्शनादित्यादिश्रुतिन्यायनिर्णीता जीवपरमात्मनोरेकत्र स्थितिर्बिम्बप्रतिबिम्बपक्षे न सङ्गच्छते । तयोर्लोके तथा दर्शनात् । अपरं च, अविद्यायां ब्रह्म प्रतिबिम्बो जीव इति, मोक्षश्चाविद्यानाश इति वदतस्तव मते जीवस्वरूपनाश एव मोक्ष इति संपद्यते । तथाच आत्महानमपुरुषार्थ इति मोक्षस्यापुरुषार्थत्वमापद्येत । जीवस्यालीकत्वमपि स्यात् । तथा सति कोऽपि पारलौकिकप्रयत्नं न कुर्यात् । तथाहि । मुमुक्षुर्हि मोक्षस्वरूपं, बद्धत्वेन स्वस्वरूपं च ज्ञात्वोक्तसाधने यतिष्यते । तथाचोक्तोभयस्वस्वरूपज्ञाने सर्वं मिथ्येतिज्ञात्वा, प्रवृत्तिश्चाविद्याध्यासकृतैवैहिकी पारलौकिक्यपीति ज्ञात्वा च, वरमैहिक्येव, न तु पारलौकिकी स्वरूपहानिहेतुत्वादिति सर्वाप्रवृत्तौ निवृत्तिमार्ग एवोच्छिद्येत । तूष्णीं वा तिष्ठेत् सर्वोऽपि । निषिद्धविहितयोश्चाविशेषात् कुतोऽपि न निवर्तेतैवेति सन्मार्गमात्रोच्छेदनायेदृशं मतं प्रवर्तयन्, व्यवहारमात्रे वेदमपि प्रमाणत्वेनोररीकुर्वन् प्रच्छन्नबौद्धोऽसि । वेदमपि स्वाज्ञानकल्पितं ब्रुवन्नतिधृष्टोऽसि । नन्वखिलप्रपञ्चस्यैव तथात्वात् तन्मध्यपातित्वेन वेदेऽपि तथात्वं ब्रवीमि, बाढं ब्रवीषि, निरङ्कुशत्वात् ते तुण्डस्य, न तु युक्तियुक्तं ब्रवीषि । तथाहि, न हि प्रतिबिम्बिताम्रतरुकदम्बफलादानाय प्रसारितबाहुः प्रतिबिम्बितत्वं जानन् दृष्टचरः कश्चित् । एवं वेदे तथात्वं जानन्, तदुक्तस्वर्गाऽपवर्गादिफलकयागसंन्यासादिषु बह्वायाससाध्येषु सर्वबन्धुपरित्यागेन सर्वसुखवैमुख्येन च को वा प्रवर्तेत । ननु स्वप्ने स्वाप्निकफलार्थं प्रवृत्तिर्दृष्टचरी । सत्यं दृष्टचरी, तदा तत् सत्यमेवेति विदुषो, न तु स्वप्नमिमं पश्यामि, न पारमार्थिकमिति स्वप्न एव विदुष इति गृहाण।

ननु विशेषदर्शनस्य स्वसजातीयस्यैव भ्रमस्य निवर्तकत्वात् प्रकृते च प्रापञ्चिकभ्रमस्यापरोक्षरूपत्वाच्छाब्दं ज्ञानं न तन्निवर्तनसमर्थमिति प्रवृत्तिरुपपद्यते इति चेत्, नैतत् सारम् । प्रतिबिम्बत्वेनानुमितामत्त्वानामपि तरूणां चाक्षुषप्रतीतिवत्, शाब्दज्ञानानन्तरमपि प्रपञ्चप्रतीतिरास्तां नाम, न तु जातु प्रवृत्तिः । अन्यथा तत्फलार्थापि प्रवृत्तिः स्यात् । प्रागुजातस्य च यागब्रह्मज्ञानयोः स्वर्गमुक्तिफलकत्वज्ञानस्य पश्चाज्जातेन तन्मिथ्यात्वज्ञानेन बाधे बाधकाभावः । उभयोरपि शाब्दत्वात् । ननु द्वैतप्रतीतिरेवानर्थरूपा, तन्निवृत्तिश्च अपरोक्षब्रह्मज्ञानं विना न भवतीति तदर्थं प्रवृत्तिरितिचेत् । अत्र मिथ्यावादी प्रष्टव्यः । तदनर्थत्वैतत्कार्यकारणभावाऽवगतिस्तव कुत इति । श्रुतित इति यदि ब्रूयात् तदा स वक्तव्यः । निःश्वसितमस्य वेदाः, यो ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै, वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुम, वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद् वेदविदेव चाहम्, इत्यादिस्वस्मृतिविरुद्धं यदज्ञानकल्पितत्वं स्वस्य लौकिकवाक्याविशिष्टयापादकं कथं श्रुतिर्वक्तुमर्हतीति स्वयमेव विचारय । किञ्च, पूर्वं वेदानां पारमार्थिकसत्त्वं ज्ञात्वा तदौदासीन्येन वा तच्छ्रवणे प्रवृत्तस्त्वदुक्तरीत्या च श्रुतेस्तदुक्तसाधनानां च अज्ञानकल्पितत्वं श्रुत्वा स्वाप्निकभोजनेन परमार्थतस्तृप्तिवदसत्तुल्यैर्गुरुतद्वाक्यैः कथं परमार्थसद्रूपं ब्रह्म फलिष्यतीति शङ्कया अवधारणेन वा न कश्चित् प्रवर्तेत । ननु यत एवावधारणं तत एव प्रवृत्तिरितिचेन्नैवम् । पूर्वं तथाऽवधारणेऽपि तादृशानामेव तदुक्तसाधनानाम् अतादृशब्रह्मफलकत्वं श्रुत्वा उक्तदृष्टान्तन्यायेन बाधितार्थत्वं जानन्नेकतरबाधोऽशक्यः, श्रुतित्वाविशेषादित्यपि जानंस्तदर्थे संदिहानस्तन्निर्णयार्थं प्रवृत्तो, निःश्वसितमिति, यो

ब्रह्माणमिति, नामरूपे व्याकरवाणीति, ऐतदात्म्यमिदं सर्वं, तत्सत्यमिति, तदात्मानं स्वयमकुरुत, तत् सत्यमित्याचक्षते, कथमसतः सज्जायेतेति, वेदो नारायणः, वेदैश्च सर्वैः, अहं सर्वस्य प्रभवः, तेने ब्रह्महृदा, आनन्दमात्रकरपादमुखोदरादिः, जन्माद्यस्य यतः, आनन्दमयोऽभ्यासादित्यादिश्रुतिस्मृतिन्यायसहस्रैर्बाधितत्वावधारणात् त्वदुक्तरीत्या न विचारकस्य प्रवृत्तिः सम्भवति । सम्प्रति तु विचारकाणामप्यासुरसर्गोत्पन्नत्वेन भगवन्मायामोहितानां न बाधज्ञानं पूर्वोक्तमिति तथैव प्रवृत्तिः । अत एव, ज्ञानिनामपि चेतांसि देवी भगवती हि सा * बलादाकृष्य मोहाय महामाया प्रयच्छतीति मार्कण्डेयपुराणोक्तम् । यतस्तथैव हरीच्छा । तदुक्तं पाद्मादौ, द्वापरादौ युगे भूत्वा कलया मानुषादिषु * स्वागमैः कल्पितैस्त्वं च जनान् मद्विमुखान् कुरु । मां च गोपय येन स्यात् सृष्टिरेषोत्तरोत्तरेत्यादि । फलं च तेषामन्धंतम एव, मामप्राप्यैवेतिवचनादित्यलमतिप्रसङ्गेन । अपरं च, लोके हि द्रष्टुरेव दर्पणादिदोषसम्बन्धात् प्रतिबिम्बदर्शनं दृश्यते । तथाच परमात्मन्यविद्यासम्बन्धानङ्गीकाराज्जीवद्रष्टृत्वं तस्य न स्यात् । तथा सति श्रुतिर्द्रष्टृत्वनियामकत्वबोधिका बाधितविषया स्यात् । एतदनुरोधेन द्रष्टृत्वाङ्गीकारे पूर्वोक्तन्यायेन अविद्यासम्बन्धित्वे जीवतुल्यतापत्तिरिति महद्व्याख्यानकौशलं प्रच्छन्नास्तिकस्य । किंचैवं गुहां प्रविष्टाविति श्रुत्यर्थबाधः, जीवाज्ञानकल्पितत्वात् । गुहायाः परमात्मनस्तद्दर्शित्वेन सह प्रवेशानुपपत्तिः । जीवन्मुक्त्यनुपपत्तिश्च । तथाहि । अन्तःकरणे अविद्यायां वा त्वया प्रतिबिम्बो वाच्यः । अन्तःकरणपक्षे जीवन्मुक्तस्य तत्सत्त्वे संसारित्वमेव स्यात् । तदसत्त्वे परममुक्तिरेवेति क्व जीवन्मुक्तिः । अविद्यापक्षस्तु सुतरामसंगतः । तस्य अपरोक्षब्रह्मज्ञानवत्त्वेन अज्ञानस्य निवृत्त्या तत्प्र-

तिबिम्बरूपजीवरूपस्यापि निवृत्तत्वाज्जीवन्मुक्तस्य देहः स्पन्दितुमप्यसमर्थः स्यात् । नच प्रारब्धमात्रशेषाऽविद्या तदाऽस्तीति सर्वमुपपद्यते इति वाच्यम् । ब्रह्मसाक्षात्कारैकनाश्यायास्तस्यास्तस्मिन् सति वक्तुमशक्यत्वात् । प्रतिबन्धकाभावात् । तेनानिवृत्तौ कदाप्यनिवृत्तिप्रसङ्गश्च । भोगैकनाश्यं तदितिचेन्, तर्ह्यविद्यातत्कार्यातिरिक्तं तदितिचेद्वक्तुमुद्यतोऽसि । न हि रज्जुज्ञानानन्तरं केनाप्यंशेन तस्मिन् सर्पज्ञानं तत्कृतभयादिकं चानुवर्तते । अनुवर्तते कम्पादिरितिचेद् अनुवर्ततां नाम पूर्वकारणजः स्वरूपसत्कम्पो, न तु तेनाऽन्यत् किंचित् कर्तुं शक्यम् । एवं प्रारब्धेनापि देहविद्यमानतैव संपादयितुं शक्या, न तु भोगादिरपि । अध्यासाभावात् । सुषुप्तौ तथोपलम्भात् । अपरं च, सर्पज्ञानजनितः कम्पो वेगाख्यसंस्कारवशादनुवर्तते । प्रकृते चाज्ञानकार्ये प्रारब्धे संस्काराभावात्, ज्ञाननाश्यतावश्यम्भावाच्च, ज्ञाने सति, कथं तदनुवृत्तिर्भवेत् । प्रवचनानुपपत्तिश्च । जीवन्मुक्तिनिरूपकश्रुतिस्मृतिपुराणविरोधात् सा नास्तीति न वक्तुं शक्यम् । तस्मात् प्रतिबिम्बो जीव इति पक्षोऽसंगतः ।

एवं जगत्प्रत्यये प्राप्ते तद् दूषयितुं, ब्रूम इति प्रतिज्ञाय भ्रान्तिस्वरूपे उपालभन्ते ॥ पूर्वमित्यादि ॥ सेति ॥ जगद्भ्रमोत्पादिका । तद्रूपं मयोक्तमेवेत्युत्तरे तन्निषेधन्ति ॥तत्र नेत्यादि ॥ तद् व्युत्पादयन्ति ॥ ब्रह्मण इत्यादि ॥ नीरूपत्वेनेति ॥ दर्पणसंनिधौ मुखस्येवाविद्यासंनिधावस्तु प्रतिबिम्बत्वमात्राभिमानो द्रष्टुर्न तस्याः सामर्थ्यं बिम्बगतधर्मकरणे । अत आयसदर्पणस्थमुखरूपान्यथात्ववदविद्यास्थेश्वरजीवयोः सर्वतःपाणिपादत्वाङ्गुष्ठमात्रत्वादिधर्मा अपि शुद्धब्रह्मणि रूपे सत्येवोपपद्येरन्नान्यथेति भावः । ननु रूपसंयोगक्रियाणां प्रतिबिम्बदर्शनान्नायं नियम इत्याशङ्कायामाहुः ॥ अन्यथेत्यादि ॥ तथा च वायुसंयोगादेरप्रतिबिम्बात् तत्रापि रूपमेव प्रयोजकमिति न नियमभङ्ग इत्यर्थः । अविद्याया एकतः स्वच्छत्वमनङ्गीकृत्य नियमभ-

ङ्क इत्यर्थः । अविद्याया एकतस्स्वच्छत्वमङ्गीकृत्य नियमभङ्गमाशङ्कते ॥ नन्वित्यादि ॥ तद् दूषयन्ति ॥ नेत्यादि । तथाच प्रभायामेवाकाशो दृश्यत इति प्रतीतेश्च नायमभिमानः, किन्तु प्रतिबिम्ब एवेतिशङ्कायां तद्विहाय वृत्तिविचारेण दूषणान्तरमाहुः । किञ्चेत्यादि ॥ वस्तुतस्त्ववकाशोऽपि प्रभासहित एव प्रतिबिम्बत इति स्वरूपसम्बन्धविशेषेण रूपसत्ताया एव तत्र प्रयोजकत्वमिति भावः ॥ तथा प्रतीतेरिति ॥ प्रतिबिम्बितत्वप्रतीतेः ॥ प्रतिबिम्बादिति ॥ तादृशप्रभायामसंयुक्तांशस्याशक्यवचनत्वात् संयोगेन वृत्तिर्नबिम्बे प्रयोजिका, किन्तु व्याप्यवृत्तित्वमेव तथेति संयोगस्याव्याप्यवृत्तित्वेन प्रभाया अपि तथात्वेन प्रतिबिम्बादित्यर्थः । एवञ्च तस्यागुणत्वपक्षेऽपि गुणसत्त्वे द्रव्यसत्त्वस्य नियामकत्वात् तत्रापि किरणसत्त्वेन तत्संयोगस्यापि सत्त्वात् प्रभायाश्च रूपत्वेन किरणव्याप्यवृत्तिसंयुक्तसमवायेन वृत्तिरिति तत्रापि संयोगस्यैव प्रयोजकतेतिज्ञेयम् । तथाच व्याप्यवृत्तिरेव प्रतिबिम्बाप्रयोजिकेति न संयोगेन वृत्तिरिति भावः । ननु गुणाद्वाऽऽलोकवदिति सूत्रे तस्या द्रव्याधिकदेशवृत्तित्वाङ्गीकाराद् द्रव्यसंयोगस्य तत्राभावेन स्वरूपासंव्याप्यवृत्तित्वमपि नाप्रतिबिम्बे प्रयोजकं, किन्तु तद्वृत्तित्वे सति तत्स्वच्छापादकत्वमेव तथेति प्रकृते तदभावान्न दोष इत्याशङ्कायां दूषणान्तरमाहुः ॥ किञ्च द्वा इत्यादि॥ स्थितिरिति ॥ इतरेतरविलक्षणा स्थितिः । तथाचाद्यायां श्रुतौ छित्वादेरेकतूष्णीकत्वापरक्रिययोः कथनाद् द्वितीयस्यां छायातपोक्तावपि व्यासेनात्मनाविति निर्णीतत्वाद् द्वयोः प्रवेशस्योक्तत्वात् तेषां विरोधो दुर्वार इत्यर्थः ॥

यत्तु नीरूपस्य प्रतिबिम्बे रूपं रूपं प्रतिरूपो बभूवेति श्रुतिरेव मानमिति कश्चित्तन्न । ब्राह्मणोपक्रमे सर्वात्मकत्वप्रतिपादनोत्तरं, पुरश्चक्र इति मन्त्रेण पूःकरणप्रवेशयोरुक्तत्वात् तेन प्राप्तस्य भेदस्य निवारणायैतन्मन्त्रस्य प्रवृत्तत्वेनायं वै हरय इत्यादिना विवृतत्वेन चात्र, रूपं रूपं रूपयित्वा रूपयित्वा प्रतिरूपः प्रतिपुस्तकन्यायेन मूलरूपो बभूवेत्यर्थस्य विवक्षिततया, तस्याः प्रतिबिम्बबोधकत्वे मानाभावात् ॥

नाप्येकधा बहुधेति श्रुतिबलात् प्रतिबिम्बो वक्तुं युक्तः । तत्र चन्द्रदृष्टान्तेनांशप्रवेशद्वारा तस्य विवक्षितत्वेन रूपवत्तायामेव त-

स्याभिप्रेतत्वात् । त्वया तदनङ्गीकारात् । तस्य ब्रह्मप्रकरणस्थत्वेन ब्रह्मनानाप्रतीतावेव दार्ष्टान्तिपर्यवसानाच्च । एवं, जीवेशावाभासेन करोतीत्यत्रापि ज्ञेयम् । तस्य कार्यजीवेश्वरपरत्वाद्वा । जीवो जीवं विहाय मां, जीवो जीवेन निर्मुक्त इत्येकादेशे कार्यजीवस्यापि स्वीकारात् । हिरण्यगर्भादीनां कार्येश्वरत्वाच्च । अतस्ता अप्यादाय न भवदभिमतजीवस्वरूपस्य सिद्धिरित्यर्थः । नन्वविद्याया अघटितघटनापटीयःस्वभावत्वाद् बिम्बप्रतिबिम्बरूपयोः परमात्मजीवयोरेकत्र स्थितिरपि नानुपपन्नेति शङ्कायां दूषणद्वयमन्यदाहुः ॥ अपरं चेत्यादि॥जीवस्येत्यादि च ॥ अघटितघटनापटुत्वेऽपि मोक्षजीवस्वरूपयोः साधुत्वसत्त्वादत्र सामर्थ्यस्य कल्पनाविरुद्धेनानुद्धार्यत्वात्तादृशस्वभावाङ्गीकारेऽपि न भवदभीष्टसिद्धिरित्यर्थः । एवं तन्मतं दूषयित्वा तस्यासुरत्वबोधनाय पूर्वोक्तदूषणाभ्यामापद्यमानं दूषणान्तरं व्युत्पादयन्ति च ॥ तथा सतीत्यादि ॥ तथाहीत्यारभ्योच्छिद्यतेत्यन्तम् । ननु कर्मफलदोषदर्शनात् प्रवृत्तिरितिचेत् तत्राहुः ॥ तूष्णीमित्यादि ॥ तथाच संसारहेतुत्वेनैहिक्याः स्वरूपहानिहेतुत्वेनाऽन्या इत्येवं द्वयोरपि फलदोषं पश्यन्न किञ्चित् कुर्यादिति सर्वप्रवृत्तिप्रतिरोध इत्यर्थः । ननु, न हि कश्चिदिति वाक्याद् गुणैरेव प्रवृत्तिरिति चेत् तत्राहुः ॥ निषिद्धेत्यादि ॥ तथाच तस्मिन् सन्दर्भे यज्ञार्थकर्मव्यतिरिक्तकर्मप्रवृत्तेरेव तद्गुणजन्यबोधनात्तदननुसन्धायैव दुष्कल्पनां कल्पयतस्तवासुरत्वमेवेति निश्चीयत इत्यर्थः । ननु वेदस्य व्यवहारमात्रे प्रामाण्यं, न मदाग्रहासिद्धं,किन्तु, नानुध्यायाद् बहूञ्छब्दान्, जिज्ञासायां सम्प्रवृत्तो नाद्रियेत् कर्मचोदनामित्यादिश्रुतिस्मृतिसिद्धमतो न मे दोष इत्यत आहुः ॥ वेदमपीत्यादि ॥ तथाच यदि प्रमाणसिद्धमेव सर्वं ब्रूषे तर्ह्यत्रापि प्रमाणं वद । यदि न वदसि तदा तत्तात्पर्याज्ञानेन पूर्वोक्तमपि धाष्टर्यादेव । वेदस्य परोक्षवादत्वेन व्यवहारे तात्पर्याभावादित्यर्थः । एवमुपालम्भे स्वस्य वेदतात्पर्यज्ञत्वाभिमानेनाह ॥ नन्वित्यादि ॥ प्रपञ्चस्याज्ञानकल्पितं ब्रह्माभेदबोधकश्रुत्यभिप्रायसिद्धम् । प्रपञ्चश्च रूपनामभेदेन द्विधेति नामप्रपञ्चरूपे वेदे तथात्वं तात्पर्यज्ञानादेव ब्रवीमीत्यर्थः । तदपि दूषयन्ति ॥ बाढमित्यादि ॥ तथाच श्रुतार्थापत्तेः शब्दत्वाभावेन युक्तित्वाद्युक्त्यन्तरविरोधे तया तथा कल्पनं न शक्यमित्यर्थः । ननु मू-

लाभावे युक्त्यन्तरं निर्बलमिति शङ्कायां तद्बलं व्युत्पादयन्ति ॥ तथाहीत्यादि ॥ तथाच यस्मात् सर्वः प्रवर्तते तस्माच्च वेदे सर्वस्य तथात्वज्ञानमतो यथा तस्यामर्थापत्तावेका श्रुतिर्मूलत्वेन त्वयाभिसंधीयते तथाऽस्यां दृष्टार्थापत्तौ सर्वा श्रुतिर्मूलमितीयं युक्तिस्ततः प्रबलेत्यर्थः । एतस्या युक्तेर्निर्बलत्वाय प्रकारान्तरेण वृत्तिमुत्पादयति ॥ ननु स्वप्नेत्यादि ॥ तदुपगम्य दूषयन्ति ॥ सत्यमित्यादि ॥ तथाच वेदे स्वाज्ञानकल्पितत्वेन मिथ्यात्वं त्वया प्रतिपाद्यते इति तद्विपरीतज्ञानाच्च त्वदुक्तरीत्या प्रवृत्त्युपपत्तिरित्यर्थः । पुनरपि प्रवृत्तिमुपपादयति ॥ नन्वित्यादि ॥ शाब्दमिति ॥ प्रपञ्चमिथ्यात्वबोधकशब्दजन्यम् । तद् दूषयन्ति ॥ नेत्यादि ॥ तथाच तादृशविशेषज्ञानस्य भ्रमानिवर्तकत्वात्तस्य फलार्थप्रवृत्त्युत्पादकत्वं दुर्घटमेवेत्यर्थः । ननु भ्रमानिवृत्तौ कदाचित् प्रवृत्तिरपि संभाव्यत एवेत्यत आहुः ॥ प्रागित्यादि ॥ इद दूषणं तुष्यतु दुर्जनन्यायेन तदुपगम्य दत्तं ज्ञेयम् । विशेषदर्शने विजातीयभ्रमनिवर्तकस्यापि दर्शनात् वल्मीकादौ जातस्य घट इति चाक्षुषभ्रमस्य रात्रौ वल्मीकस्पार्शनेन निवृत्तेः । क्षौमादौ जातस्य कार्पासमिति स्पार्शनभ्रमस्य दिवा तच्चाक्षुषेण तद्भिज्ञवाक्येन च निवृत्तेः सर्वलोकप्रसिद्धत्वात् मणिपरीक्षायामपि तथा निश्चयाच्चेति एवं युक्तिविरोधिश्रुतार्थपर्यन्तं फलानुसंधानेन पुनः प्रवृत्तिमुपपादयति ॥ ननु द्वैतेत्यादि ॥ तद् दूषयन्ति ॥ अत्रेत्यादि ॥ नन्वर्हति, नार्हति वेति वादान्तरं, तथापि प्रवृत्तिस्तूपपन्नेत्यत आहुः ॥ किञ्चेत्यादि ॥ तथाच प्रवृत्त्यनुपपत्तिस्तदवस्थैवेत्यर्थः । पुनः प्रकारान्तरेणोपपादयति । ननु यत इत्यादि ॥ अभेदबोधकश्रुतेः । तदपि दूषयन्ति ॥ नैवमित्यादि ॥ उक्तदृष्टान्तन्यायेनेति ॥ स्वाप्निकभोजनदृष्टान्तन्यायेन ॥ बाधितत्वावधारणादिति ॥ उक्तश्रुतिस्मृतिभिः प्रपञ्चद्वयस्यापि ब्रह्मकर्तृत्वे आनन्दमात्रेतिस्मृत्या कर्तुः स्वभावेन साकारत्वे चावधारिते प्रपञ्चद्वयेऽपि जीवाज्ञानकल्पितत्वस्य बाधितत्वावधारणात् । नन्वाधुनिकाविचारकप्रवृत्तिदर्शनाच्चेदं युक्तमितिशङ्कायामाहुः ॥ संप्रतीत्यादि ॥ विचारकाणां मोहितत्वे मानमाहुः ॥ अत एवेति ॥ विचारकाणामासुरत्वादेव । हरीच्छायां मानमाहुः ॥ तदुक्तमित्यादि ॥ पाषाण्डावित्यादिपदेन वार्हस्पत्यसंग्रहः । ननु जीवस्येश्वरप्रतिबिम्बरूपत्वात्तत्क्रियायाश्च लोके बिम्बाधीनत्वाल्लोके तत्क-

येवात्र बिम्बेच्छयैव प्रवृत्तिरिति शङ्कायां पुनर्दूषणान्तरमाहुः ॥ अपरं चेत्यादि । अत्रायमर्थः । प्रतिबिम्बवादिनां षण्मतानि । अनादिरनिर्वाच्या मूलप्रकृतिर्माया चिन्मात्रसंबन्धिनी, तस्यां चित्प्रतिबिम्ब ईश्वरः । तस्या एव परिच्छिन्नानन्तप्रदेशेष्वावरणविक्षेपशक्तिमत्स्वविद्याभिधानेषु चित्प्रतिबिम्बो जीव इत्येकम् । त्रिगुणात्मिकाया मूलप्रकृतेः शुद्धसत्त्वप्रधाने मायाख्ये रूपे चित्प्रतिबिम्ब ईश्वरः । तस्या एव रजस्तमोऽभिभूतमलिनसत्त्वप्रधाने अविद्याख्ये रूपान्तरे चित्प्रतिबिम्बो जीव इत्यपरम् । विक्षेपशक्तिप्रधान्येन मायाशब्दितायां मूलप्रकृतावेव चित्प्रतिबिम्ब ईश्वरः । आवरणशक्तिप्राधान्येनाविद्याशब्दितायां तस्यामेव चित्प्रतिबिम्बो जीव इति तृतीयम् एतेषु त्रिषु पक्षेषु ईश्वरो वा तस्यैव रूपान्तरं वा परमात्मेति तत्र दर्पणरूपाविद्यासंबन्धाभावात् स्फुट एव तूलाज्ञानरूपाविद्यासंबन्धानङ्गीकारः । अविद्यायां चित्प्रतिबिम्ब ईश्वरः । अन्तःकरणे चित्प्रतिबिम्बो जीव इति तुरीयम् । अत्रापि ईश्वरस्य सर्वज्ञत्वादिनिर्वाहार्थं तूलाऽविद्यासंबन्धानङ्गीकार ।

एवं घटाकाशजलाकाशमहाकाशमेघाकाशवत् कूटस्थजीवब्रह्मेश्वरभेदेन चैतन्यचातुर्विध्यवादिनां मते ब्रह्माश्रितमायातमसि स्थितासु सर्वप्राणिनां वासनासु प्रतिबिम्बितं चैतन्यमीश्वर ।स्थूलसूक्ष्मदेहावच्छिन्नचैतन्यस्थिते मायाकल्पितेऽन्तःकरणे प्रतिबिम्बितं चैतन्यं जीव इति पञ्चमम् । अत्रेश्वरः परमात्मैव एक एवेत्यत्रापि तथा । एवं जीवोपाधिनान्तःकरणादिनाऽवच्छिन्नं चैतन्यमीश्वरो बिम्बभूतः अज्ञाने तत्प्रतिबिम्बो जीवस्तत्राप्यज्ञानपरिणामभूतमन्तःकरणं जीवस्य विशेषाभिव्यक्तिस्थानमिति षष्ठम् । अस्मिन् बिम्बेश्वरवादिमतेऽपि तथैवेति सर्वेषु पक्षेषु दोषतौल्यम् । तथाचाविद्यासंबन्धाऽभावेन तद्दर्शनाभाव तत्प्रवर्तनेच्छाया अप्यभावान्न प्रवृत्त्युपपत्तिरित्यर्थः । एतेन संपद्यमानं दूषणान्तरमाहुः ॥ तथा सतीत्यादि ॥ द्रष्टृत्वनियामकत्वबोधिका श्रुतिस्तु– अदृश्यं द्रष्टृ, क्षरात्मानावीशते देव एक इत्यादिरूपा ज्ञेया ॥ पूर्वोऽक्तन्यायेनाविद्यासंबन्धित्व इति । अनुपदोक्तेन लौकिकद्रष्टृन्यायेन दर्पणस्थानीयाविद्यासंबन्धित्वे ।

ननु प्रतिबिम्बं पश्यतो दर्पणादिदोषसंबन्धेऽप्यज्ञत्वं भ्रान्तत्वं च नोच्यत इत्येतादृशाविद्यासंबन्धेऽपि न जीवतुल्यतापत्तिरित्यतो दूष-

णान्तरमाहुः ॥ किञ्चेत्यादि ॥ तथाचाऽऽद्याज्ञानकल्पितगुहादर्शित्वे शुक्तिरजतद्रष्टृवद्भ्रान्तत्वं, तददर्शित्वे चोक्तदूषणमित्यर्थः। पूर्वं, द्वा सुपर्णेत्यादिना सहास्थित्यनुपपत्तिर्दूषणत्वेनोक्ता। इह तु सद्मवेशानुपपत्तिरिति न पौनरुक्त्यम् ॥ एवमेतेषु दूषणेषु नीरूपप्रयुक्तः प्रतिबिम्बासंभवो बिम्बासंभवो विभुत्वहानिर्बिम्बप्रतिबिम्बवैजात्यं शुद्धब्रह्मणः स्वप्रतिष्ठतापरित्यागहेत्वभावश्चेति दूषणानि प्रतिबिम्बेश्वरवादेऽपि समानीति सोऽप्यनेनैव दूषितो ज्ञेयः। एवं ब्रह्मस्वरूपविचारेण दूषयित्वा जीवावस्थाविचारेण दूषणान्तरमाहुः ॥ जीववदित्यादि ॥ तत्सत्त्वे संसारित्वमेवेति ॥ शुद्धेऽप्यन्तःकरणे प्रतिबिम्बरूपताया जीवे तुल्यत्वात् कामसंकल्पाभावेन लिङ्गेन ममत्वाभावेऽप्यहंतायाः सत्त्वादन्तःकरणत्वे संसारित्वमेवेत्यर्थः। अविद्यापक्षस्यासंगतत्वं व्युत्पादयन्ति ॥ तस्येत्यादि ॥ तस्येति ॥ जीवन्मुक्तस्य स्पन्दं व्युत्पादयितुमनुवदन्ति ॥ नचेत्यादि ॥ सर्वमिति ॥ जीवस्वरूपस्थितिर्देहस्पन्दभिक्षाटनादिना च। दूषयन्ति ॥ ब्रह्मेत्यादि ॥ तेनानिवृत्तावित्यादि। जीवन्मुक्तिसंपादकं ज्ञानं यद्यदृढं तदा अध्यासानिवर्तकत्वान्न तां संपादयेत्। अतो दृढं वाच्यम्। तेनापिचेदनिवृत्तिस्तदा तथेत्यर्थः॥ तदिति ॥ प्रारब्धम्। दूषयन्ति ॥ तर्हीत्यादि ॥ तथाच भोगैकनाश्यत्वाङ्गीकारे तव सिद्धान्तभङ्ग इत्यर्थः ॥ सिद्धान्तभङ्गनिरासायाविद्यातत्कार्यनिवृत्तावपि जीवन्मुक्तिसाधनायाविद्याकार्यानुवृत्तिमाह ॥ अन्वित्यादि ॥ तदुपगम्य दूषयन्ति ॥ अनुवर्ततामित्यादि ॥ तथा भोगाद्यभावे प्रारब्धनाशाभावेन तादृशस्य परममुक्तिः कदापि न स्यादित्यर्थः। ननु मास्तु परममुक्तिस्तथापि जीवन्मुक्त्यनुपपत्तिरूपं दूषणं तु निवृत्तमित्याशङ्कायामाहुः ॥ अपरं चेत्यादि ॥ प्रारब्धस्यादृष्टरूपत्वे कर्मरूपत्वे वा द्रव्यत्वाभावेन तत्र वेगाख्यसंस्कारस्य वक्तुमशक्यत्वात् तस्य द्रव्यधर्मत्वानङ्गीकारेऽप्यज्ञानकार्यत्वेन ज्ञाननाश्यत्वावश्यम्भावाच्चेत्यर्थः। ननु रिक्तीकृतघटस्य ह्यन्तःशोषवदनुवृत्तिरितिचेत् तत्राहुः ॥ प्रवचनेत्यादि ॥ प्रवचनमध्यापनम्। तथाचैवमङ्गीकारेऽपि तेन शेषेण कार्यांशशेषेण कार्यान्तराभाववदत्रोपदेशादिरूपकार्याभावात् संप्रदायोच्छेदोऽपि स्यादित्यर्थः। न चाऽयं दोषः सिद्धान्ते शङ्कनीयः। ब्रह्मभूतानां सर्वात्मभावेन, प्राणन्नेव प्राणो भवतीतिवत् सर्वोपपत्तेरिति। ननु मास्तु जीवन्मुक्तिः शुको मुक्तो वाम-

देवो मुक्त इति तु प्रवादमात्रमिति वादिनं प्रत्याह ॥ जीववदित्यादि-तेषां भूतार्थवादत्वेन स्वार्थे प्रामाण्यस्यावश्यकत्वात् प्रवादमात्रतोपगमस्यासंगतत्वादित्यर्थः ॥

एवं दूषिते प्रतिबिम्बवादे वादान्तरमुत्थापयति ।

स्यादेतत्. न वयं प्रतिबिम्बं जीवं ब्रूमः । किन्त्वङ्गुल्यादिसंपर्काच्चन्द्रादिद्वैताभासवदविद्यातो ब्रह्माप्यनेकवदवभासमानं द्वित्वादिसंख्यायोगि जीवपदवाच्यमिति । नैतद् विद्वदादरणीयम् । तथाहि । अविद्यासंबन्धाद् ब्रह्मणो नेकवदवभासः कस्येति विचारणीयम् । न तावद् ब्रह्मणः, भ्रमायोगात् । नापि जीवस्य तादृशावभासविषयत्वात् । न हि दोषवशाद् गृहीतचन्द्राणामिव स्वानेकत्वाभासः संभवति, चन्द्रस्य वा । तेषामलीकत्वात् । द्रष्टरि सत्येव तेषां भानाच्च । दोषाऽसंबन्धादेव न तस्य । किञ्चैवं जीवात्मनियामकत्वस्य परमात्मन्यसंभवः । तथाच, य आत्मानमन्तरो यमयतीत्यादिश्रुतिर्बाधितविषया स्यात् । अपरं च, अविद्याब्रह्मणोः कः संबन्धः ? । न तावत् संयोगः, तयोर्विभुत्वेन तदनङ्गीकारात् । नाप्यध्यासः, तस्याऽप्यभावात् । नापि स्वरूपलक्षणः, मुक्तात्मन्यपि तत्संभवेन संसारित्वापादकत्वप्रसङ्गात् । आस्तां वा यः कश्चित् संबन्धः, सोऽप्यनादिर्वाच्यः । तथाच ब्रह्माविद्यातत्संबन्धानामनादित्वेन जीवविभागस्याऽप्यनादित्वादविद्यासंबन्धजीवविभागयोः कार्यकारणभावासङ्गतिः, एककालीनत्वात् । ननु श्रुतिबोधितः कार्यकारणभावस्तर्हि तन्निर्वाहाय जीवविभागस्यार्वाचीनतामुररीकुरु । बन्धोऽस्याविद्ययाऽनादिरिति वाक्यात् सोऽप्यनादिरेव मन्तव्य इति चेन्नैवम् । न हि सर्वात्मना तत्र सादित्वनिषेधः, किन्तु घटपटादिसाधारणतन्निषेधः । यथा देवेषु मरणनिषेधोऽमरनाम्ना । अन्यथा, अविद्ययेति करणबोधक-

तृतीयान्तं न वदेत् । तच्च बन्धलक्षणकार्यात् पूर्वकालीनत्वं विनाऽस्या न निर्वहति । ननु बन्धनैकस्वभावायास्तस्या जीवस्य चादित्वे किञ्चित् कालं न बन्ध इत्यत्र को हेतुः । तदा जीवस्वरूपं कीदृशमित्यपि विचारणीयम् । मुक्तमिति तु न वक्तुं शक्यं, साधनाभावादग्रे बन्धाच्च । न वा बद्धं, तस्य भावित्वात् । एतदुभयातिरिक्ताऽवस्था चाप्रसिद्धेति नैवं वक्तुं युक्तमितिचेत् । नैतत् साधु । श्रिया पुष्टयेति वाक्ये मुख्यासु द्वादशशक्तिषु गणनादविद्याया भगवच्छक्तित्वेन तदिच्छाधीनत्वात् । तथाच यद्बन्धने तदिच्छा तमेव सा बध्नाति, नान्यम् । अत एव शुकसनकादीनां सर्वदा मुक्तैव, तेषु तथेच्छाऽभावात् । अत एव श्रुतिरपि, एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति, एष उ एवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्योऽधो निनीषतीति तदिच्छाऽधीनत्वमेवाह । जीवस्वरूपं चाग्रे वक्ष्यामः । अपिच, अविद्यासम्बन्धमात्रेण जीवभावं वदतः, शुद्धब्रह्मण्येव च तत्सम्बन्धं वदतस्तव मते जीवभावानापत्तौ हेत्वभावान्निरवयवत्वाच्चांशभेदेन तथात्वस्य वक्तुमशक्यत्वाच्च सर्वज्ञत्वादिविशिष्टपरमात्माऽसिद्ध्या सर्वश्रुत्युपप्लवः । किञ्च, जीवपरमात्मनोरनादिसिद्धं भेदं वदन् पारमार्थिकं कुतो न ब्रूषे । यतः श्रुतिरनयोरभेदं बोधयति, स च परमार्थतो भिन्नयोर्न सम्भवति इत्यवास्तवो भेदोऽत्र वाच्यः । तादृशश्च भेदो बिम्बप्रतिबिम्बयोराभासतदाश्रययोश्च दृष्टचरो लोके इति तथाऽत्रापि ब्रवीमि, अत एव महावाक्ये भागत्यागलक्षणाऽपि । बाढं ब्रवीषि, परं पूर्वाऽपरालोचनरहितः । तथाहि । स्यादेतदेवं यदि तत्त्वमसीत्येतन्मात्रं महावाक्यं स्याद्, न त्वेवम्, किन्तु सम्पूर्णः प्रपाठकः । तत्रोपक्रमे, अपि वा तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्येकविज्ञानेन सर्व-

विज्ञानं प्रतिज्ञातम् । तदेकमेव चेत् सर्वं भवेत् तदोपपद्यते । यथा सुवर्णखण्डाः सुवर्णकार्यं च सर्वं सुवर्णमिति सुवर्णज्ञानेन तज्ज्ञानं भवति । अतो ब्रह्मविज्ञानेन सर्वविज्ञानं वक्तुं सर्वस्य ब्रह्मरूपत्वं, सदेव सोम्येत्यारभ्य निरूपितम् । तत्र, ऐतदात्म्यमिदं सर्वम् इति जडस्य सर्वस्यापि तदात्मकत्वमुक्तम् । ततो जडस्य विनाशित्वद-र्शनेन अब्रह्मत्वशङ्कानिरासायाह– तत् सत्यम् इति । तेनाविर्भा-वतिरोभावावेव श्रुत्यभिमतौ, नाशोत्पत्तिप्रतीतिर्भ्रान्तेति । नन्वा-विर्भावतिरोभावौ नित्यावनित्यौ वा । नाद्यः, सततं घटोपलम्भा-ऽनुपलम्भप्रसङ्गाभ्यामनिर्वाच्यतापत्तेः । तयोर्धर्मत्वेन विरोधात् तादृग्धर्म्यसिद्धौ तयोरपि वक्तुमशक्यत्वेन शून्यवादश्चापद्येत । साधने प्रवृत्तिश्चानुपपन्ना स्यात् । किञ्च, वर्तमानस्य वस्तुनो द-र्शनयोग्यतातद्योग्यतात्मकौ हि तौ, तथा सति क्व भगवच्छक्तित्व-म् । एवं सति पटोपलम्भानुपलम्भयोः कादाचित्कत्वे हेतावुच्य-माने तत्तत्कारणस्तोमपरम्परयोस्तथात्वं तथेति वाच्यम् । एवमी-श्वरेच्छापर्यन्तधावने तस्या अपि नित्यत्वेन न पूर्वोक्तदूषणोद्धा-रः, अपसिद्धान्तश्च । नचेतरसहकार्यभावान्नोक्तदूषणमिति वा-च्यम् । उक्तरीत्या तस्यैव निरूपयितुमशक्यत्वात् । नाप्युक्तयोग्य-ताऽऽत्मकत्वं तत्त्वमिति वक्तुं शक्यम् । वाय्वाद्यव्यापकत्वात् । नच दर्शनपदमनुभवपरमिति वाच्यम् । अतीतानागतयोरपि चाक्षु-षत्वप्रसङ्गात् । एवं सति तिरोभावोच्छेदश्च । किञ्च, तौ प्रतिव्य-क्ति भिन्नावभिन्नौ वा । नान्त्यः, युगपत् सकलोपलम्भप्रसङ्गात् । नचावच्छेदकभेदान्न तत्प्रसङ्ग इति वाच्यम् । विचाराक्षमत्वात् । तथाहि । अवच्छेदको हि घटादिः । तथाच तत्तदवच्छिन्न आविर्भाव इत्यागतम्, अवच्छेदकस्य नित्यत्वात् सदोपलम्भनं स्यात् । अ-नुपलम्भो वा । नच तत्तत्कालोपाध्यवच्छेदभेदान्न तत्प्रसङ्ग इति

वाच्यम् । तस्यापि त्वन्मते घटतुल्यत्वात् । न ह्येकदोपलभ्यमानानां तथात्वमनुपपन्नम् । आविर्भावस्याविर्भावस्तत्तदवच्छेदेनेति न वक्तुं शक्यम् । तत्राप्युक्तविकल्पैरनवस्थापातात् । तिरोभावोऽप्येतेन व्याख्यातः । नाद्यः । आविर्भावतिरोभावौ शक्ती वै मुरवैरिण इति वाक्यविरोधात् । नचानन्तशक्तिमत्त्वेन तदुपपत्तिः । एकजातीयकार्यकरणे एकैव सम्भवति सत्यनेकतत्कल्पने मानाभावाद् गौरवाच्च । उक्तरीत्या कादाचित्कत्वहेतुरपि न निरूपयितुं शक्यः । न द्वितीयः, विरोधात् । भगवद्धर्माणां नित्यत्वात् । तथा सति उत्पत्तिस्तयोर्वाच्या । तर्हि घटादीनामेव तामङ्गीकुरु, किमन्तर्गडुभ्यामेताभ्याम् । अपसिद्धान्तश्च । तदुत्पादकं च दण्डमुद्गरादिकमेव त्वया वाच्यं, तच्च घटतद्ध्वंसोत्पादकमेव । तिरोभावश्च घटादेर्न वक्तुं शक्यः । तथा सति वस्तुसत्तया लौकिकप्रत्यक्षाविषयत्वेऽपि ध्वस्तो घटो योगिनोपलभ्येत, रूपवतः सतो योगिप्रत्यक्षविषयत्वनियमात् । नचैवम्, प्रमाणाभावात्, प्रजाश्चतुल्यकालीना नाधुना सन्ति कालिता इति श्रीभागवताच्चेति प्राप्ते ।

स्यादेतदिति ॥ अस्मिन् पक्षे जीवस्य वस्तुतो ब्रह्मत्वे भेदभानस्य जीवपदवाच्यतायाश्च दुष्टत्वं, न तु स्वरूपालीकत्वं, न वा मोक्षस्याऽपुरुषार्थत्वं, न वा पारलौकिकप्रयत्नप्रतिरोधः । दोषवशात्सिद्धेश्च द्वित्वं सहप्रवेशैकत्रस्थित्योर्नियामकत्वस्य च नानुपपत्तिर्वस्तुतो मुक्तत्वाज्जीवन्मुक्तेरपि नानुपपत्तिः । नीरूपत्वकृत आभासासम्भवस्तु जीवेशाभावासेन करोतीति श्रुतिबलादेव निरस्त इत्ययं पक्ष आदरणीय इत्यर्थः । एवं दोषेषु परिहृतप्रायेष्वपि द्रष्टृत्वासम्भवस्यापरिहृतत्वात्तदादाय दूषयन्ति ॥ नैतदित्यादि ॥ आभास इति ॥ करणसंस्थानैकमुखत्वान्यतरविघटकेन बाह्यदोषेण जायमानो भ्रमः ॥ अवभासविषयत्वादिति ॥ आभासमानस्यैव जीवपदवाच्यताङ्गीकारात् तथेत्यर्थः ॥ न तस्येत्यादि ॥ आभास्यस्य चन्द्रस्य ब्रह्मणश्च न । तथाच द्रष्टृभावाद्सम्भवग्रस्तोऽयं पक्ष इत्यर्थः । स्वरूपविचारेण

दूषणान्तरमाहुः ॥ किञ्चेत्यादि ॥ एवमिति ॥ ब्रह्मत्वेनैक आभासक-सम्बन्धविचारेण । तृतीयमाहुः ॥ अपरं चेत्यादि ॥ मुक्त्येत्यादि ॥ एकमुक्तानन्तरमपि सर्वमुक्त्यभावादविद्यायाः सत्त्वेनाभासजनकस्य स्वरूपसम्बन्धस्यानपेतत्वान्मुक्तात्मन्यपि तादृशसम्बन्धसम्भवेन तस्य तथात्वप्रसङ्गादित्यर्थः । एवमाभासप्रयोजकसम्बन्धदूषणेन प्रतिबिम्बप्रयोजकोऽपि सम्बन्धो निवारितः । सम्बन्धाभावेन च तस्या ब्रह्मशक्तित्वमपि निवारितम् । तेन तस्या जीवशक्तित्वे दृढीभूते तत्सम्बन्धिजीवस्वरूपस्याभासप्रतिबिम्बपक्षदूषणैर्दूषितत्वात् तस्या जीवशक्तित्वमपि दूषितप्रायम् । अतः परं तदनादित्वं दूषयितुं विभागबन्धयोरनादित्वं दूषयन्ति ॥ आस्तामित्यादि ॥ उरीकुर्वीति ॥ विभागात् पूर्वं बन्धोक्तौ सर्वस्यैव ब्रह्मणो बन्धसम्भवात् तदभावाय तथेत्यर्थः ॥ सोऽपीति ॥ विभागोऽपि ॥ तत्रेति ॥ बन्धे । अन्यथेति ॥ अनादित्वस्यासङ्कुचितवृत्तित्वे । तथाचानादिबन्धाङ्गीकारे श्रुतिविरोधो दुष्परिहर एवेत्यर्थः । एवं दूषिते बन्धाद्यनादित्वे तत्साधयितुं प्रत्यवतिष्ठते ॥ नन्वित्यादि ॥ तथाच बन्धाभावहेत्ववचने सिद्धमेव तदनादित्वं प्रकारान्तरेणापि साधयति ॥ तदेत्यादि ॥ कीदृशमिति ॥ ब्रह्मरूपं जीवरूपं वा । यदि ब्रह्मरूपं तदा मुक्तं वक्तव्यं, यदि जीवरूपं तदानादिबद्धमेवावश्यं वक्तव्यम् । तदुभयमप्यसङ्गतम् । अतः किमवस्थं किम्प्रकारकं चेति विचार्य मदुपरि दूषणं देयं, नाऽविचार्येत्यर्थः । तद् दूषयन्ति ॥ मेत्यादि ॥ एवं हेत्वादिप्रश्नमात्रेण बन्धाद्यनादित्वं न सिद्ध्यतीत्यर्थः । बन्धस्य कादाचित्कत्वे अवस्थायां च हेतुं वदन्तोऽविद्याया जीवशक्तित्वं निरस्यन्ति ॥ श्रियेत्यादि ॥ तथाच यथेदानीं शुकादीनां मुक्तता तथाऽन्येषां बन्धात् पूर्वमपीति बन्धे तदभावे पुनर्बन्धे मोक्षे चेच्छैव हेतुरिति न त्वदुक्तरीत्या बन्धाऽनादित्वस्याविद्यानादित्वस्य च सिद्धिरित्यर्थः । ननु शुकादीनां योगचालितत्वात् प्राचीनसाधनानामेव मुक्तिहेतुत्वं नेच्छाया इत्याशङ्कायामाहुः ॥ अत एव श्रुतिरित्यादि ॥ तथाच साधनान्यपि तदिच्छां नातिवर्तन्ते इति यथा तत्र सव्यापारेच्छा कारणं, तथात्र निर्व्यापारा सेति पूर्वोक्तं निर्बाधमित्यर्थः । एवञ्च मुक्तित्वेन जीवकृतसाधनसाध्यत्वेन व्याप्त्यभावबोधनात्तदुक्तं साधनाभावरूपं दूषणं परिहृतम् । इच्छाप्राधान्यबोधनेनाग्रे बन्धस्यापि प्राका-

लीनमुक्तताविघातकत्वं च परिहृतम् । तेन जीवस्वरूपं विभागात् पूर्वं ब्रह्मरूपमेव । तदुत्तरं तु सदामुक्तबन्धयोग्यमुक्तबद्धमुक्तभेदेनावश्यं चतुरवस्थं चेति बोधितम् । पूर्वं कीदृशमिति प्रश्ने बन्धाभावदशायामविद्यासंबन्धाभावादवच्छिन्नरूपत्वस्याप्यभावेन किम्प्रकारकमिति यत् पृष्टं तत्राहुः ॥ जीवेत्यादि ॥ तथाच बन्धात् पूर्वं विभागादुत्तरं यादृशं तदग्रे वक्ष्याम इत्यर्थः ।

एवं जीवानादित्वं दूषयित्वा देवाऽसुरन्यायदार्ढ्याय जीवादित्रयानादित्वसाधिकामविद्यासंबन्धानादितां दूषयन्ति ॥ अन्यच्चेत्यादि ॥ अविद्यायाः सतत्वाङ्गीकारान्न स्यादनादिः संबन्धो, यदि सार्वदेशिकस्तदा कृत्स्नब्रह्मणो जीवत्वापत्तिः । अथ प्रादेशिकस्तदा अविद्याया विभुत्वहानिस्तत्तन्मतीयविभूतीनां निरवयवत्वस्यैवापगमादतस्तथेत्यर्थः । एतेन विशुद्धचिदीशयोरनादित्वमपि दूषितम् । अविद्यानादित्वं तु प्रागेव दूषितमित्येवं, षडस्माकमनादय इति तत्प्रतिज्ञां दूषयित्वा अनादिसिद्धजीवपरमात्मभेदोपपादकमाभासीकर्तुं प्रतिवादिनं प्रति तादृशाभ्युपगमहेतुं पृच्छन्ति ॥ किञ्चेत्यादि ॥ तद् दूषयितुं प्रमाणस्याभासत्वं च साधयन्ति ॥ बाढं ब्रवीषीत्यादि ॥ स्यादेतदेवमिति ॥ स्याद्वास्तवो भेदो भागत्यागलक्षणा चेत्यर्थः ॥ किन्त्विति ॥ तावता प्रतिज्ञापूर्त्यसम्भवात् ॥ सम्पूर्णप्रपाठक इति ॥ छान्दोग्ये श्वेतकेतूपाख्यानरूपः । महावाक्यं यदि तावत् सर्वार्थसंग्राहकतयोपदेशत्वेनाभिप्रेतं, यदि वा वाक्यसमुदायत्वेन, उभयथाऽपि, ऐतदात्म्यमित्यादेरष्टादशाक्षरस्य संपूर्णस्य वा तथात्वं, न चतुरक्षरस्येति भागत्यागलक्षणाया अयुक्तत्वमुपक्रमविरोधादिति वक्तुमाहुः ॥ नत्वित्यादि ॥ यथा सुवर्णेत्यादि ॥ यथा सोम्यैकेन लोहमणिना लोहमयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यमिति श्रुतिदृष्टान्तात् । लोहं सुवर्णं, दार्ष्टान्तिके खण्डाः जीवाः, कार्यं जगदिति फलिष्यति । एवं ब्रह्मपरिणामत्वबोधनात् तस्या विच्छिन्नपरिणामशीलत्वं निरस्तं भविष्यति ॥

तत्रेति ॥ प्रपाठकार्थसंग्राहकं, ऐतदात्म्यमिदं सर्वं, तत् सत्यं, स आत्मा तत्त्वमसि श्वेतकेतो इत्यस्मिन्नुपदेशवाक्ये । इदं हि नवकृत्व उपदिष्टम् । अर्थस्तु– सदेव सोम्येदमित्यादिना असतः सत्तां कण्ठतो युक्तिपूर्वकं निराकृत्य, तदैक्षत बहु स्यां प्रजायेयेतीक्षणोक्तिपू-

षेकं तस्मात् सतस्तेजआदिक्रमेण सृष्टिमुक्त्वाऽग्रे वदति । स य ए-षोणिमैतदात्म्यम् । एतत् आत्मा एतदात्मा । मयूरव्यंसकादित्वात् समासः । न तु बहुव्रीहिः । एतदात्मा यस्य तदेतदात्मं, तद्भाव ऐतदात्म्य-मित्युक्तौ श्रुयमाणपदवैयर्थ्यापत्तेः । अत उक्त एव समासः । एतदात्मनो भाव ऐतदात्म्यम् । मृल्लोहकृष्णायसदृष्टान्तस्य उपक्रमे उक्तत्वात् तद्वत् सन्मयमित्यर्थः ॥ तत्सत्यमिति ॥ तत्पूर्वोक्तं स-त्यं सर्वकालं सदित्यर्थः । तेन वैनाशिकार्द्धवैनाशिकप्रतिपन्ने अस-त्त्वविनाशित्वे, मायावादप्रतिपन्नं मायिकत्वं च निरस्तम् । स आत्मे त्यनेन सर्वस्यानागन्तुकानारोपितं रूपं स इत्युक्तम् । तत्त्वमसीत्यनेन जीवस्य तदात्मकत्वमुक्तम् । तस्य भावस्तत्त्वमिति । तेन जीवानामंशत्वं, जगतः कार्यत्वम्, उभयोरपि ब्रह्माभेदात् प्रतिज्ञादिपूर्तिः । तमेतम-र्थं विवृण्वन्ति ॥ तत्रैतदात्म्यमित्यादि ॥ अत्र मध्ये वैनाशिकवाद-निरासं श्रुत्वा प्रमाणज्येष्ठत्वादग्रे बाधाभावाच्चोत्पत्तिनाशप्रतीत्यो-रभ्रान्तत्वं सांख्यप्रतिपन्नयोराविर्भावतिरोभावयोः प्रतिबन्दिपर्यव-सितत्वेन तदसाधकत्वं च मन्वानो नैयायिकादिः प्रत्यवतिष्ठते ॥ नन्वित्यादि ॥ सार्वजनीनां प्रतीतिमनादृत्य जडस्य सर्वदा सत्त्वसा-धनाय यावाविर्भावतिरोभावावङ्गीक्रियेते तौ सांख्यमतेऽभिव्यक्ति-तदभावात्मकत्वाज्ज्ञानविषयतदभावात्मकौ पदार्थान्तररूपौ । तथाच ज्ञानतदभावसमनियतौ । अतस्तयोर्नित्यत्वे ज्ञानतदभावयोरपि नि-त्यत्वम् आवश्यकम् । तथा सति सततं तदाधारभूतघटोपलम्भानु-पलम्भप्रसङ्गाभ्यां तयोरभिव्यक्त्याद्यात्मकत्वेन निष्कष्टुमशक्यत-या तदाश्रयस्य घटादेश्चोपलब्धोऽनुपलब्ध इति निष्कष्टुमशक्यत-या तयोस्तस्य चानिर्वाच्यतापत्तेः । अत्राह कृत्ये ण्यत् । नितरामि-दमित्थतया वक्तुं योग्यत्वं निर्वाच्यत्वम् । तदभावः अनिर्वाच्यत्वम् । प्रकृते कम्बुग्रीवत्वादिना निर्वाच्यत्वेऽपि सततमुपलम्भानुपलम्भा-भ्यां तथात्वमापद्यते । यदि तौ नित्यौ स्यातां तदाधारो घटादिः सा-मग्रीसमवधाने सदोपलम्भानुपलम्भविषयः स्यात् । यदि तथा स्या-त्ताभ्यां निर्वाच्यो न स्यादिति तर्के ह्यापादकापाद्ययोर्व्याप्तिः । य-था निर्वह्निः स्यान्निर्धूमः स्यादित्यत्र वह्न्यभावधूमाभावयोः । प्रकृते यद्यपि नित्यत्वसदोपलम्भानुपलम्भविषयत्वयोर्धर्मनित्यत्वधर्म्यनि-र्वाच्यत्वयोश्च न व्याप्तिः । नित्यद्रव्येषु व्यभिचारात् । तथाप्याविर्भावा-

दिनित्यत्वतदाश्रयानिर्वाच्यत्वयोः सा निराबाधा । यद्यपि सामान्यव्याप्तौ सर्वस्य पक्षे निवेशात् सपक्षाभावेन व्याप्तिग्रहाभावे तर्कस्य मूलतः शैथिल्यं, तथा विशेषव्याप्तावपि । तथाहि । घटः, अनित्याविर्भावतिरोभाववान् कादाचित्कोपलम्भानुपलम्भविषयत्वात् यत्र यत्र कादाचित्कोपलम्भानुपलम्भविषयत्वं तत्र तत्रानित्याविर्भावतिरोभावकत्वम् । यथा पटे । व्यतिरेके तु, यत्र यत्र नित्याविर्भावतिरोभावकत्वं तत्र तत्र सदोपलम्भानुपलम्भविषयत्वमिति । घटः कादाचित्कोपलम्भविषयः । कालविशेषे ताभ्यां निर्वाच्यत्वात् । यदेवं तदेवम् । पटवत् । व्यतिरेके तु, यत्र यत्र सदोपलम्भानुपलम्भविषयत्वं तत्तत्सदा ताभ्यामनिर्वाच्यत्वम् । अनयोर्व्यतिरेकव्याप्त्योरप्रसिद्धत्वान्मूले शैथिल्यमविचार्यम् । तथापि, प्रसञ्जकं तु स्वानिष्टं परानिष्टं प्रसज्यते * विपर्यये पराभीष्टं स्वाभीष्टे पर्यवस्यतीति तर्के जयोपायस्याभियुक्तैरुक्तत्वात् पूर्वपक्षी स्वानिष्टं नित्यत्वं, परानिष्टं सदोपलम्भानुपलम्भविषयत्वमनिर्वाच्यत्वं चापादकापाद्यीकृत्य सिद्धान्तिनं जेतुं तथोक्तवानिति बोध्यम् । एतावतापि तर्कदोषानपायाद् दूषणान्तरमाह ॥ तयोरित्यादि ॥ तथाच मास्त्वनिर्वाच्यत्वमुक्तरीत्या तथापि जडगतोत्पत्तिनाशौ स्तः । तयोरङ्गीकारात् तौ धर्मत्वेन निश्चितौ । तयोर्विरोधप्रयोजकत्वं च न धर्मत्वम् । रूपरसादौ व्यभिचारात् । नापि भावाभावरूपत्वम् । घटतदभावसमूहालम्बनाभावप्रसङ्गात् । किन्तु भावाभावरूपत्वे सत्युभयनित्यत्वम् । तदोत्पत्तिनाशवत्कालभेदन स्थित्यभावात्तद्धर्मिभूतस्य जडस्य विरुद्धधर्माधारत्वमभ्युपगन्तव्यम् । तच्च तन्नित्यत्वाधीनम् । नित्यत्वं च तादृग्धर्मिसिद्ध्यधीनमित्यन्योन्याश्रयाद्धर्मिगस्तयोश्चासिद्धौ शून्यवादापत्तिरिति सत्कार्यवादस्थापनाय प्रवृत्तस्य वैनाशिकमतापत्तिरित्यर्थः । उक्तदूषणस्य व्यावहारिकत्वाल्लोकव्यवहारस्य गुणसन्निपातजन्यत्वेनाप्रामाणिकत्वात् तत्सिद्धस्य दूषणस्याप्रयोजकत्वमित्याशङ्क्य लोकवेदसाधारणं दूषणान्तरमाह ॥ साधनेत्यादि ॥ साधने = घटयागब्रह्मज्ञानादौ प्रवृत्तिस्तत्करणोद्यमः । साऽपि वस्तुमात्रनित्यत्वेन तत्फलस्यापि तथात्वादनुपपन्ना स्यात् सिद्धसाधनदोषग्रस्ता विधिविशेषविचारजन्यत्वहानि च स्यात् । तथाच श्रुतितात्पर्योद्घाटनाय प्रवृत्तस्य

श्रुतिविरोध इति महदेव दूषणमित्यर्थः । एवं धर्मविचारेण दूषयित्वा तयोर्विरोधदृढीकरणाय स्वरूपविचारेण दूषयिष्यन् स्वरूपस्यानुक्तत्वात् तद्बोधयितुं तौ लक्षयति ॥ किञ्चेत्यादि ॥ योग्यता च बाधाऽभावः । बाधश्च शून्यत्वरूपोऽभावात्मेति तदभावरूपाया योग्यताया भावरूपत्वम् । एवंलक्षणकत्वे सिद्धान्तापघातरूपं दूषणमाह ॥ तथा सतीत्यादि ॥ वस्तुधर्मत्वे सति, वक्ष्यमाणवाक्येनाङ्गीक्रियमाणं भगवदुक्तत्वसिद्धान्तमपहनिष्यतीत्यर्थः । वाक्यस्याऽनङ्गीकृतौ नोक्तं दूषणमित्यतो दूषणान्तरमाह ॥ एवं सतीत्यादि ॥ मास्तु भगवदुक्तत्वं तथापि प्रत्ययं वाक्यस्याङ्गानुरोधेन वस्तुधर्मत्वं तु तयोरङ्गीकार्यम् । एवं सति लोकवेदसाधारणघटोपलम्भानुपलम्भकादाचित्कत्वरूपमर्यादाया निर्वाहाय पटादेराविर्भावादेश्च नित्यत्वेऽपि उपलम्भादिकादाचित्कत्वहेतौ विचार्यमाणे तत्कारणस्तोमपरम्परयोरुपलम्भकारणभूता या घटस्य विषयता चक्षुरादिः सन्निकर्षश्च तादृशविषयताया अपि कारणरूपादिमत्त्वं सन्निकर्षस्य च कारणमिन्द्रियमनःसंयोगः । तत्कारणमात्ममनःसंयोगः । सूर्यपरिस्पन्दः क्षणविशेषसंबन्धश्च । एवमनुपलम्भे अविषयत्वादिकं तेषां स्तोमस्य परम्परायाश्च कादाचित्कत्वमुपलम्भादिकादाचित्कत्वे हेतुरिति वाच्यम् । तत्र सर्वकारणभूताया ईश्वरेच्छायाः कारणत्वमपि वाच्यम् । तथा सति तस्यानित्यत्वेन तत्कृतसूर्यपरिस्पन्दानामपि तथात्वेन सदोपलम्भाद्यापत्तौ, न घटानिर्वाच्यतापत्तिशून्यवादयोरुद्धारः । यद् भूतं यच्च भाव्यमिति श्रुत्युक्तभूतादिव्यवहारोच्छेदापत्त्यापसिद्धान्तश्चेत्यर्थः । ननु सहकारिसमवधानाभावेनोपलम्भादेः कादाचित्कत्वोपपत्तौ नाऽनिर्वाच्यतापत्तिशून्यवादावित्यत आह ॥ नचेति ॥ यः कोऽपि सहकारित्वेनाभिमन्तव्यस्तस्य सर्वस्यापि स्तोमान्तःपातित्वेन कारणकोटावेव निवेशात्तदतिरिक्तस्य तस्य तथात्वादित्यर्थः । सहकारिणोऽपि धर्मित्वेन तस्याप्याविर्भावतिरोभावयोर्वक्तव्यत्वे तत्कादाचित्कहेत्वनिर्वाच्यत्वेन तथात्वादित्यर्थः । एवं पूर्वोक्तदूषणस्थापनेन तयोर्वस्तुधर्मत्वं दूषयित्वा तत्स्वरूपं दूषयितुं तल्लक्षणं दूषयति ॥ नापीत्यादि ॥ वाय्वादीत्यादिपदेन कालदिगाकाशाद्याः ॥ अव्यापकत्वादिति ॥ आविर्भावलक्षणस्य वाय्वादावाविर्भावेन तथेत्यर्थः ॥ चाक्षुषत्वप्रसङ्गादिति ॥ अनुभवसामा-

न्यमध्ये चाक्षुषस्यापि प्रवेशात्तथेत्यर्थः । नन्वनुभवपदं विभागेन तत्र तत्र तत्तदनुभवपरमित्यतो न दोष इतिचेत्तत्राह ॥ एवं सतीति ॥ अनुभवयोग्यत्वस्याविर्भावलक्षणत्वेनातीतानागतातीन्द्रियविप्रकृष्टव्यवहितानामाविर्भूतत्वे सति । एवं लक्षणं दूषयित्वा तयोर्भगवच्छक्तित्वं दूषयितुं भेदाभेदविकल्पेन तौ दूषयति ॥ किञ्च, तौ प्रतीत्यादि ॥ युगपदिति ॥ वस्तूनां सर्वेषां नित्यत्वेन तद्धर्मस्याविर्भावस्यैकत्वेनैकोपलम्भसमये तथात्वादित्यर्थः । एवमेकानुपलम्भदशायां सर्वानुपलम्भोऽपि तिरोभावविचारेण बोध्यः । यथैकसमवायवादिमते घटनिरूपितसमवायस्य तन्तुषु सत्त्वेऽपि न घटे तन्तुसमवेतत्वप्रसङ्गः, प्रतीतिर्वा । अवच्छेदभेदात् । तथा आविर्भावस्यैकत्वेऽप्यवच्छेदभेदान्न युगपत् सकलोपलम्भप्रसङ्ग इतिचेत्तत्राह ॥ नचेत्यादि ॥ सदोपलम्भ इत्यादि ॥ तथाच तत्कादाचित्कत्वमर्यादाभङ्गः, प्रत्यक्षविरोधश्चेत्यर्थः ॥ नन्ववच्छेदकस्य घटादेर्नित्यत्वेऽपि अवच्छेदकान्तरस्य कालोपाधेरनित्यत्वेन तदवच्छेदभेदान्न सदोपलम्भप्रसङ्ग इतिचेत्तत्राह ॥ न हीति ॥ नित्यत्वादिति ॥ घटवन्नित्याविर्भावधर्मकत्वात् । ननु दिनरात्र्यादिभेदस्योपलभ्यमानत्वात् तन्नित्यत्वमनुपपन्नमितिचेत्तत्राह ॥ न हीति ॥ नित्यत्वं हि सर्वकालवर्तमानत्वम् । तथैकदोपलभ्यमानानां घटकालाविर्भावानां वर्तमानत्वेन सिद्धे सत्त्वे उत्पत्तिनाशयोरनङ्गीकारान्नायुक्तम् । अतः कालस्यापि घटतुल्यत्वे सिद्धे नोक्तदूषणस्य परिहार इत्यर्थः । नन्वस्त्वेवं, तथाप्याविर्भावायाविर्भावान्नोक्तदोष इतिचेत् तत्राह॥आविरित्यादि॥तत्तदवच्छेदेनेति॥तत्तत्कालावच्छेदेन॥ तत्रापि तस्मिन्नाविर्भावाविर्भावेऽपि । उक्तविकल्पैस्तन्नित्यत्वप्रतिव्यक्त्यभिन्नत्वतदवच्छेदककालनित्यत्वविकल्पैर्दोषतादवस्थ्ये पुनस्तस्यापि तस्यापीत्येवमनन्ताविर्भावकल्पनेऽनवस्थापातादित्यर्थः । एतद् दूषणं तिरोभावेऽप्यतिदिशति ॥ तिरोभावोऽपीति ॥ तिरोभावस्य नित्यत्वे सदोपलम्भापत्तौ तन्निवारणाय तिरोभावस्य तिरोभावस्तदानीं कल्पनीयः । तस्मिन्नपि नित्यत्वप्रतिव्यक्त्यभिन्नत्वतदवच्छेदककालनित्यत्वविकल्पैः सदोपलम्भापत्तितिरोभावोच्छेदापत्तिदूषणग्रासात् सोऽप्येतेनाविर्भावदूषणेन दूषित इति पुनः संरम्भो न क्रियत इत्यर्थः । एवमभेदपक्षदूषणेन वस्तुधर्मतादृढीकरणात्तयोर्भगवच्छक्तित्वं दूषितम् । एतदेव द्रढयितुं भेदविकल्पेना-

ऽपि साक्षात्तद् दूषयति ॥ नाद्य इति ॥ ननु परास्य शक्तिर्विविधै-व श्रूयत इति श्रुतेर्भगवतोऽनन्तशक्तित्वात् प्रतिव्यक्तिभेदो न तद्बाधक इत्यत आहुः ॥ नचेत्यादि ॥ अनन्तशक्तिमत्त्वेनेति ॥ अत्रानन्त-श्चासौ शक्तिमाँश्चेति समासः । अनन्ताश्च ताः शक्तयश्चेति समासे न कर्मधारयान्मत्वर्थीय इति परिभाषासु निषेधान्मतुबभावापत्तेः । तथाच ब्रह्मवादे भगवतः सर्वरूपत्वात् तत्तच्छक्तिमत्त्वाच्च नोपपत्तिः। अनन्तशक्तित्वेनेति पाठे तु न कश्चित्संदेहः । तत्र हेतुः ॥ एकेत्या-दि ॥ तावताऽपि श्रुतेः कार्यस्य चोपपत्तौ अनेकतत्कल्पने श्रुत्यन्तरा-देर्मानस्याऽभावात् । व्यसनमात्रेण कल्पनेऽपार्थनानापदार्थकल्पना-गौरवाच्चेत्यर्थः । उक्तश्रुतेरेव ग्रहिलतया तत्रापि प्रामाण्याङ्गी-कारे दूषणान्तरमाह ॥ उक्तेत्यादि ॥ अनित्यविकल्पस्यावशिष्टत्वा-त्तमपि दूषयति ॥ न द्वितीय इत्यादि ॥ अनित्यत्वपक्षो नेत्यर्थः ॥ अपसिद्धान्त इति ॥ प्रपञ्चमध्यपातिनोस्तयोरुत्पत्तिमत्त्वेनाब्रह्मत्वप्र-सक्तौ सर्वस्य ब्रह्मात्मकत्वमिति सिद्धान्तहानिरित्यर्थः। अस्मिन् पक्षे तयोः स्वरूपाऽसत्त्वं व्युत्पादयन्ति ॥ तदुत्पादकमित्यादि ॥ सर्वपक्ष-साधारणं दूषणान्तरमाह ॥ तिरोभाव इत्यादिना ॥

एवं पूर्वपक्षेण तयोर्निःस्वरूपतया खपुष्पतुल्यत्वे साधिते प्रथ-मतः खपुष्पतुल्यतां निराकर्तुं तत्स्वरूपनिरूपणं प्रतिजानते ॥

अत्रोच्यते तत्स्वरूपं तच्छ्रुत्वाऽपास्य संशयान् ।
ब्रह्मवादे कृतात्मानः प्राप्नुवन्ति हरिं बुधाः ।

अनुभवविषयत्वयोग्यता आविर्भावः, तदविषयत्वयोग्यता तिरोभावः । ते च वस्तुसत्त्वेनैवावच्छिद्येते । न ह्यलीके ते सम्भ-वतः, तयोर्धर्मत्वेन निराश्रयत्वासम्भवात् । किञ्च, भावित्वेन भू-तत्वेन च व्यवह्रियमाणयोर्वस्तुनोः सत्ता त्वयाऽप्युरीकार्या, त-योर्घटादिधर्मत्वेन तदभावे निराश्रयत्वप्रसङ्गात् । एतेन वर्तमान-प्रागभावप्रतियोगित्वं भावित्वं, वर्तमानध्वंसप्रतियोगित्वं ध्वस्तत्व-मितिनिरस्तम् । नच कालोपाधिरेव तदाश्रय इति वाच्यम् । तत्र तद्वैशिष्ट्यप्रतीतिप्रसङ्गस्य दुर्निवारत्वात् । ननु यथा तन्त्वधिकर-

त्मक—पटनिरूपितसमवायस्य काले सत्त्वेऽपि तत्समवेतत्वेन न पटे प्रतीतिः, तेन सम्बन्धेन तत्रासत्त्वात् । तथात्र तत्प्रतियोगित्वाभावान्न तथा प्रतीतिरितिचेन्न । प्रतियोगित्वस्य स्वरूपसम्बन्धविशेषत्वेनाङ्गीकारात् । तस्य च स्वरूपद्वयात्मकत्वात् तस्य चात्रापि सत्त्वात् । ननु तत्सत्त्वेऽपि स विशेषो नात्रेति चेत्, हंत ! स को वा ? यत्रेदृशी तव श्रद्धा । न दृष्टः, प्रमाणाभावात् । ननु तद्द्वयसत्त्वेऽपि वैशिष्ट्याप्रतीत्यन्यथानुपपत्त्या सम्बन्धान्तरमन्तरेण विशिष्टप्रत्ययजननयोगत्वलक्षणः कल्प्यते इति चेद्, मैवम् । उक्तरूपस्यापि काले एव सत्त्वं त्वया वाच्यम् । तथाचोक्तदूषणभिया तत्समवायस्य प्रयोजकत्वं वाच्यम् । तथाच तदा समवायभावेन उक्तयोग्यत्वसमवायस्य कुत्रापि वक्तुमशक्यत्वात् कालाश्रयत्वस्याप्यसिद्धेः । जन्यभावस्यान्यत्र समवेतस्यैव कालाधारत्वनियमात् । अन्यथा असतोऽप्याश्रयः काल इत्यङ्गीकार आपद्येत । न ह्यन्यधर्मस्य कालाश्रयत्वेनैव सिद्धिः क्वचिद् दृष्टचरी । तथा सत्यन्यधर्मत्वव्याहतेः । अतो भावित्वभूतत्वव्यवहारकालेऽपि घटादिसत्ता उररीकार्या । किञ्च, त्वदुक्तयोग्यता केनावच्छिद्यत इति पृच्छामः । तत्र चेद्यदा कदाचिद् वस्तुसत्तयैवावच्छिद्यत इति ब्रवीषि, तदा, 'यदा कदा चिद्' इति त्यज । अप्रयोजकत्वाद्, गौरवाच्च । तथा, सम्बन्धान्तरमन्तरेणेति च । स्वरूपस्य सम्बन्धत्वे सिद्धे सम्बन्धान्तरपदं सार्थकं भवेत् । तथाचात्माश्रयः । नच षोढासन्निकर्षाभावेऽपि तथात्वं तदर्थ इति वाच्यम् । योगजधर्मेऽतिव्याप्तेः । नच लौकिकतज्जननयोग्यत्वं विवक्षितमिति वाच्यम् । तद्व्याप्तिवैशिष्ट्यज्ञानजनकसामान्यलक्षणाजन्यप्रत्यासत्तावतिव्याप्तेः । नच सामान्ययोगजधर्मज्ञानलक्षणषोढाप्रत्यासत्त्यभावेऽपि तथात्वं तदर्थ इति वाच्यम् । असिद्धेः । न ह्युक्ततदभावे तथात्वं क-

चित् सिद्धम् । विवादास्पदीभूतभावित्वादेस्तु पूर्वोक्तयुक्त्या निराश्रयत्वप्रसङ्गस्य दुर्निवारत्वेन तदापि धर्मिसिद्धावनुमानादिना तज्ज्ञाने तत्समवेतोक्तप्रतियोगित्वमपि विषयीभवतीति नोक्तप्रत्यासत्त्यभाव इति सर्वमनवद्यम् ॥

अत्रोच्यते तत्स्वरूपमित्यादिना ॥ संशयानिति ॥ पूर्वोक्तश्रुतितद्विरुद्धयुक्तिकृतान् । कृतात्मानः कृतबुद्धयः । तत्पूर्वोक्तदूषणसञ्चाराय पूर्वं तयोर्लक्षणमाहुः ॥ अनुभवेत्यादि ॥ अत्रानुभवपदं साक्षात्कारपरम् । तदन्यज्ञानोत्तरमनुभवामीत्यनुव्यवसायाभावात् । विषयत्वं विषयविषयिणोः संबन्धरूपं पदार्थान्तरम् । अविषयत्वं तदभावस्तद्विरुद्धमर्थान्तरं वा । योग्यतापदं तु तदुक्तार्थनिष्कर्षार्थमनुवादमात्रम् ॥ तद्रूपायोग्यतेति ॥ तथाच साक्षात्कारविषयत्वमाविर्भावस्तदविषयत्वं तिरोभाव इत्यर्थः । तत्स्वरूपमुक्त्वा ताभ्यां वस्तुसत्तां साधयन्ति ॥ ते चेत्यादि ॥ एवं विवक्षया पूर्वोक्तलक्षणे स्वरूपे चाङ्गीकृते तिरोभावदशायामपि वस्तुसत्तोपगमने तद्धर्मभूतयोर्विरुद्धत्वस्यानपेतत्वेन वस्त्वनिर्वाच्यत्वशून्यवादापत्तिसाधनप्रवृत्त्यनुपपत्त्युपलम्भादिकादाचित्कत्वानुपपत्त्यपसिद्धान्ता अवशिष्यन्ते । तेषु पूर्वं शून्यवादापत्तिं परिहर्तुं वादिनं प्रत्यनिर्वाच्यतापत्तिं प्रतिबन्द्या वदिष्यन्तो भूतभावित्वदशायामर्द्धवैनाशिकेनानङ्गीक्रियमाणां वस्तुसत्तां, गलं पादुकान्यायेनाङ्गीकारयन्ति ॥ किञ्चेत्यादि ॥ त्वयेति ॥ वर्तमानकाले वस्तुसत्तामुपगच्छतार्द्धवैनाशिकेन । तत्र हेतुः– तयोरित्यादि ॥ भावित्वं यदि कारणेन सम्बद्धं तदा वर्तमाने कपाले भाविकपालमिति प्रतीतिः स्यात् । अथाजन्यं तद् घटत्वादिवत्कार्येणैव सम्बद्ध्यते, न कारणेनेतिचेत्, तदा अजन्यभावत्वेन नित्यत्वात् कारणव्यापारोत्तरं तदविनाशेन कदापि घटादिकार्ये सत्तासम्बन्धो न स्यादिति शून्यवादापत्तिः । प्रत्यक्षविरोधश्चातो घटादीनां सत्ता आवश्यकी । तथा सति भावित्वमनित्यम् । अनित्यभावत्वाच्च जन्यम् । जन्यत्वाच्च न पूर्वकाल इति कारणव्यापारात् पूर्वं घटादिसत्ताङ्गीकार्या । साचेन्नाङ्गीक्रियते तदा भावित्वस्य निराश्रयत्वम् । एवं भूतत्वमपि कारणासम्बद्धं चेद्वर्तमाने कपाले ध्वस्तकपालमित्यापत्तिः । अतस्तदापि घटादिसत्ताङ्गीकार्या । अतस्तयोर्धर्म-

त्वेन वृत्तिमत्त्वेन तदभावे प्रागभावध्वंसाधिकरणकाले घटादिसत्ताऽभावे । तथा नित्यत्वपक्षे वर्तमानवस्त्वनिर्वाच्यतापत्तिर्यथा मम तथा वस्त्वनित्यत्वपक्षे भूतभावित्ववस्त्वनिर्वाच्यत्वं तवापीति तौल्यान्न वयं पर्यनुयोज्या इत्यर्थः । ननु भावित्वे भूतत्वे च निरुक्ते भाविभूतत्ववस्तूनां निर्वाच्यत्वस्यानायासिसद्धत्वान्न तौल्यमित्यत आहुः ॥ एतेनेत्यादि ॥ एतेन निराश्रयत्वप्रसङ्गरूपेण दूषणेन तथाचोक्तदूषणस्य निरुक्त्यनन्तरमपि तादवस्थ्यान्न तौल्यपरिहार इत्यर्थः । वर्तमानकालोत्तरकालिकत्वं भावित्वमिति लक्षणेऽपि दूषणतादवस्थ्यं बोध्यम् । ननु प्रागभावाद्यवच्छेदकस्य सूर्यपरिस्पन्दादिरूपकालोपाधेर्भावित्वाद्याश्रयत्वाङ्गीकारान्न पूर्वोक्तदूषणावकाश इत्यत आहुः ॥ नचेत्यादि ॥ स कालोपाधिर्भावी भूतो वर्तमानो वा । यद्याद्यौ तदा दोषतादवस्थ्यम् । यद्यन्त्यस्तदा वर्तमाने प्रागभावाद्यवच्छेदके तस्मिन् भाविभूतप्रतीतिप्रसङ्ग इत्युन्नयत पाशपात इत्यर्थः । उक्तदूषणं वारयितुं प्रयतन्ते ॥ नन्वित्यादि ॥ तेन संबन्धेन नञासत्त्वात् । काले समवायस्योदासीनपटवृत्त्यनियामकतया पटस्य कालविशेषणतया काले सत्त्वमिति समवायसंबन्धेन काले अवर्तमानत्वात् । तथात्र तत्प्रतियोगित्वाभावात् । येन संबन्धेन प्रागभावादिप्रतियोगित्वं घटादौ तेन संबन्धेनात्र प्रागभावाद्यधिकरणकाले तत्प्रतियोगित्वाभावान्न तथा प्रतीतिः । न प्रागभावाद्यधिकरणकाले भावित्वादिवैशिष्ट्यप्रतीतिरित्यर्थः ।

एतां युक्तिं दूषयन्ति ॥ नेत्यादि ॥ त्वदुक्तरीत्या काले भावित्वादिवैशिष्ट्यभावो नोपपद्यते । कुत । पटस्थले पटस्वरूपस्य तत्र तत्र तद्वृत्तिनियामकसम्बन्धयोश्च भेदान्न पटे कालसमवेतत्वप्रतीतिः । प्रकृते तु प्रतियोगित्वस्य स्वरूपसम्बन्धविशेषत्वेनाङ्गीकारात् तस्य च स्वरूपद्वयात्मकत्वात् । अभावविरहात्मत्वं वस्तुनः प्रतियोगित्वमिति प्राचीनलक्षणस्य भेदप्रतियोगिनि घटादावव्याप्तेस्तद्धर्मे घटत्वादावतिव्याप्तेश्च दुष्टतया प्रतियोगित्वस्य स्वरूपसम्बन्धविशेषत्वेन नव्यैरङ्गीकारात्तस्य प्रतियोगित्वस्यानुयोगिज्ञानाधीनज्ञानकत्वेनानुयोगिस्वरूपद्वयात्मकत्वात् । तस्य स्वरूपद्वयस्यात्रापि कालस्थलेऽपि सत्त्वात् । तथाचात्र स्वरूपद्वये विचार्यमाणे प्रागभावादिस्वरूपं प्रतियोगिस्वरूपं चेति वक्तव्यम् । तथा सति यथा तत्र प्रतियोगिस्वरू-

पमादाय सम्बन्धसिद्धिस्तथात्र कालस्वरूपमादायेति सम्बन्धस्य स्वरूपस्य च तौल्येन तस्य स्वरूपसम्बन्धस्यात्र कालेऽपि सत्त्वान्न समवायदृष्टान्तेनेष्टसिद्धिरित्यर्थः ॥ सविशेष इत्यादि ॥ प्रतियोगिनि प्रतियोगिस्वरूपकृतः सम्बन्धः काले कालस्वरूपकृत इति सम्बन्धघटकीभूतस्वरूपभेदाद्यो विशेषः प्रतियोगिनि स न काले इति तादृशप्रतीत्यभाव उपपद्यते इत्यर्थः। तं विशेषं निश्चेतुं पृच्छन्ति ॥ हंतेत्यादि ॥ प्रतियोगिस्वरूपकृतः, अभावनिरूपकत्वरूपो वा, अन्यो वा, सोऽपि दृष्टः कल्प्यो वेति विकल्प्याद्यं दूषयन्ति—

नेत्यादि ॥ प्रमाणाभावादिति ॥ प्रतियोगिनोऽन्यस्य वा सत्त्वेनाविषयतया तदभावादित्यर्थ ॥ कल्प्यत इति ॥ स्वरूपसंबन्धस्य स्वरूपात्मकत्वात् तत्र सखण्डोपाधिसामान्यरूपो नियतपदार्थवादित्वात् कल्प्यत इत्यर्थः । तद् दूषयन्ति ॥ नैवमित्यादि ॥ कस्य स्वरूपे कल्प्यते । प्रतियोगिनो वा, निरूप्यस्य प्रागभावादेर्वा, कालस्य वा। नाद्य.। तस्यैवासत्त्वात् । न द्वितीयः। निरूप्ये निरूपकधर्माधारत्वस्य काप्यसिद्धत्वात्। वर्तमाने तस्मिन् भावित्यादिप्रतीत्यापत्तेश्च । अतः परिशेषात् कालतत्सत्त्वं वाच्यम् तथा सत्युक्तरीत्या तदसिद्धेरित्यर्थः। तत्र हेतु—जन्यभावस्येति॥ नश्वरभावत्वेन जन्यत्वेन व्याप्तेर्भावित्वप्रतीतिजनकस्य तस्य जन्यत्वं, ध्वस्तत्वप्रतीतिजनकस्य तु स्फुटमेवजन्यत्वमिति तस्यापि तथात्वं नियतमिति तस्यापि तदाश्रितत्वासिद्धिरित्यर्थः तथा च विनष्टे घट, ज्ञातो घट इति प्रतीतिस्थले यथा समवाय्यभावेन ज्ञाततोत्पत्तिर्दूष्यते तथात्रापि बोध्यमिति भावः । नन्वजन्यभावस्येव जन्याभावस्यान्यत्रासमवेतस्यापि कालाधारत्वाङ्गीकारे बाधकाभावादुक्तनियमोऽप्रयोजक इति चेत्तत्राहुः ॥ अन्यथेत्यादि ॥ असमवेतत्वस्य नष्टघटादौ शशशृङ्गादौ चाऽऽसत्तितौल्यात् तदाश्रयेऽपि कालः स्यात् । तथा सति, प्रजाश्च तुल्यकालीना इति त्वदुक्तवाक्यस्यैव विरोध इत्यर्थः । नन्वन्यथानुपपत्तेर्बलिष्ठत्वाद्वाक्यविरोधं सोढ्वाऽपि यथा तथाङ्गीक्रियते इतिचेत् तत्राहुः॥ न हीत्यादि ॥ तथाच प्रसिद्धविरोधः, पूर्वोक्तदूषणानुद्धारश्चेत्यधिकदूषणद्वयापत्तिरित्यर्थः । उक्तं निगमयितुं सिद्धमाहुः ॥ अत इति ॥ भावित्वादिव्यवहारसाधनस्यावश्यकत्वात् ॥ ऊरीकार्येति ॥ उक्तविशेषस्य साश्रयत्वायोरीकार्या । तथाचैवं वस्तुसत्तासिद्धौ प्रागभावध्वंसयो-

देवाभावात् तल्लक्षणमप्रयोजकमित्यर्थः । ननु निराश्रयत्वाद् घटादि-
सत्तापि तद्बाधिकेति तात्पर्यमेवेति शङ्कायां घटादिसत्ताया व्यवहा-
राबाधकत्वं व्युत्पादयितुं तां साधयन्ति ॥ किञ्चेत्यादि ॥ उक्तयो-
ग्यता निरवच्छिन्ना, किञ्चिदवच्छिन्ना वा । नाद्यः । व्याप्यधर्मस्य
किञ्चिदवच्छिन्नत्वनियमात् । यत्र पुनस्तादृशे निरवच्छिन्नत्वं क्वचि-
दुपगम्यते । तत्रावच्छिन्नस्यानुपयोगादेव, न तु सर्वथा तदभावात् ।
अतो द्वितीयस्यैवादरणीयत्वात्तस्याः किञ्चिदवच्छेदकं व्यापकं च
वक्तव्यम् । तच्च निराश्रयत्वप्रसङ्गेन भावित्वादविवादास्पदत्वाद-
न्ततो गत्वा वस्तुसत्ताया एव तथात्वं वाच्यम् । तत्रापि तादृशा-
व्यवहारकाले वस्तुनि सत्तासत्त्वम् । ध्वंसस्याभावेन सत्तायां ता-
दृशाव्यवहारानवच्छिन्नवर्तमानकालविशिष्टत्वं वाच्यमिति यदाकदा-
चिद्वस्तुसंबन्धिन्या सत्तयाऽवच्छिद्यत इति चेद् ब्रवीषि तदा, यदा
कदाचिदिति सत्ताविशेषणं त्यज । तत्र हेतुः–अप्रयोजकत्वाद्गौर-
वाच्चेति ॥ सत्तायां यदोक्तकालवैशिष्ट्यं तदानीमुक्तयोग्यतारूपा-
वच्छेद्याभावात् सा कामवच्छिन्द्यात् । यदा चोक्तयोग्यता तदप्रयो-
जकं, विशेषणीभूतकालस्याभावात् तद्विशिष्टसत्ताया अभाव इति
का वा तामवच्छिन्द्यात् । अतोऽनुकूलतर्काऽभावादप्रयोजकं वि-
शेषणम् । सत्ताया नित्यत्वेऽपि वैशिष्ट्यांशेन जन्यत्वाद् गुरु-
भूतं च । तस्मादित्यर्थः । तथाच निराश्रयत्वमेव व्यवहारबाधकं,
न तु सत्तेति भावः । एवं तदुक्तमुपगम्य दूषितम् । अतः परं विशे-
षोपगम एवासंगत इति बोधयितुं तल्लक्षणं दूषयन्ति ॥ तथेत्या-
दि ॥ तथाचात्माश्रय इति ॥ स्वरूपस्य संबन्धत्वसाधने चात्माश्रयः ।
स्वरूपसंबन्धस्य स्वरूपाऽनतिरिक्तत्वाङ्गीकारान्नष्टघटादिस्वरूपस्य
संबन्धत्वासिद्धेर्नष्टघटादिस्वरूपस्यापेक्षितत्वेन स्वोत्पत्त्यधीनोत्पत्तिक-
त्वात्तदुत्पत्तावात्माश्रयः । यद्वा संयोगादेः केवलस्यैव विशिष्टप्रत्ययजनन-
योग्यत्वेन संबन्धान्तरमन्तरेणेति पददानोत्तरमप्यतिव्याप्तिवारणाय नाद्यवस्थ्या-
द्वावित्वादिवैशिष्ट्यप्रतीतिस्थले च संयोगादिप्रत्यासत्तीनामभावात्
संबन्धान्तरपदे स्वरूपसंबन्धो विवक्षणीयः । तत्र संयोगादिषु संब-
न्धत्वस्य स्वरूपत एव कारणत्वान्न तज्ज्ञानापेक्षा । स्वरूपसंबन्धे
तु स्वरूपस्यौदासीन्ये विशिष्टप्रत्ययानुदयात्तस्य संबन्धज्ञानमप्य-
पेक्ष्यते । संबन्धत्वं च न संयोगसमवायान्यतरत्वम् । विशेषणतादा-

वव्याप्तेः । किन्तु विशिष्टप्रत्यययोग्यत्वमेव । स्वरूपस्य च तथात्वे ज्ञाते संबन्धत्वमिति संबन्धज्ञानाधीनं संबन्धत्वज्ञानमिति ज्ञप्तावात्माश्रयः । तथाच संबन्धत्वज्ञानाभावात् संबन्धान्तरपदवैयर्थ्यम् । यदि तत्सार्थक्यायातिव्याप्तिवारणाय च संबन्धान्तरपदे षोढा प्रत्यासत्त्यभाव उपेयते तदाप्यन्यत्रातिव्याप्तिरित्याहुः ॥ नच षोढेत्यादि ॥ तद्वारणार्थं क्रियमाणं विवक्षान्तरमपि दूषयन्ति ॥ नच लौकिकेत्यादि ॥ तत्र हेतुः— सव्याप्तिरित्यादि ॥ सामान्यं च ज्ञायमानमेव प्रत्यासत्तिः । अन्यथा निमीलितनयनस्यापि, तेन धूमा इति ज्ञानापत्तेः । तज्ज्ञानं चेन्द्रियसंबन्धेन । स च संबन्धः संयुक्तसमवायो वा, इन्द्रियसंबद्धविशेषणता वा, तदन्यतरेण पूर्वं धूमत्वज्ञानम् । ततो ज्ञायमानेन तेन धूमत्वेन सामान्येन यावद्धूमा इत्याकारकं ज्ञानं, ततस्तेषु वह्निव्याप्तिवैशिष्ट्यज्ञानम् । तच्च योगजधर्मजनितानागतातीन्द्रियादिविषयकज्ञानवन्न लौकिकविलक्षणम् । इन्द्रियसंबद्धविशेषणताजन्यतादृग्ज्ञानसादृश्यात् । तच्च सामान्यप्रत्यासत्तिप्रयुक्तमिति तस्यामतिव्याप्तिरित्यर्थः । एतद्वारणाय क्रियमाणं विवक्षान्तरं दूषयन्ति ॥ नच जन्येत्यादि ॥ जन्या ज्ञानलक्षणसंयोगादिरूपा, लौकिकी समवायादिरूपा । तथात्वं विशिष्टप्रत्ययजननयोग्यत्वं न तु लौकिकतज्जननयोग्यत्वम् । तथा सति योगजधर्मेऽतिव्याप्त्यभावेन ग्रन्थाऽसंगत्यापत्तेः । योगजधर्मपदं सामान्यलक्षणाया अप्युपलक्षकम् । यदि च जन्यपदेन योगजधर्मोऽपि संगृह्यते तदा सामान्यलक्षणायामेवातिव्याप्तिरिति तन्नोट्टङ्कितम् । यदि च जन्यपदं लौकिकप्रत्यासत्तिविशेषणं, तथात्वं च लौकिकतज्जननयोग्यत्वम् । तदा समवायेऽतिव्याप्तेर्ग्रन्थासंगतिरिति लौकिकतज्जननयोग्यत्वं न विवक्षणीयम् । तदापि योगजधर्मपदं समवायादेरप्युपलक्षकम् । वस्तुतस्तु, नच जन्येत्यत्र अकारः पतित इति प्रतिभाति । सामान्यलक्षणायामतिव्याप्तेरुक्तत्वात् । तद्वारणाय जन्यपदस्यैव वक्तव्यत्वादिति । तदा लौकिकपदं षोढाप्रत्यासत्तिपरम् । योगजधर्मपदं ज्ञानलक्षणाया अप्युपलक्षकम् । यदि चाकारं प्रश्लिष्य तथात्वं यदि लौकिकत्वमपि विवक्ष्यते तदा तु वक्ष्यमाणप्रसिद्धिरेव दूषणमिति बोध्यम् । स्फुटमन्यत् । इदं च विवक्षाद्वयं मज्जतः फेनावलम्बनरूपमित्यनास्थया दूषितं ज्ञेयम् । एवं लक्षणेन कल्प्यस्य सविशेषस्य

लक्षणदूषणेन स्वरूपमेव दूषितं ज्ञेयम् । ननु माऽस्तु विशेषादिस्तथापि भावित्वादिप्रतीतिस्तूपपादनीया । सामग्र्यन्तराभावाद्भावित्वादिधर्मादेवाङ्गीकरणीया । तथा सति फलप्रत्यासत्त्यभावेऽपि तथात्वमत्रैव सिद्धमिति नाप्रसिद्धिरित्यत आहुः ॥ विवादेत्यादि ॥ सत्यं प्रतीतिर्जायते, तथापि स धर्मो निराश्रयत्वे स्वस्वरूपमलभमानो न तां जनयितुं शक्त इति तेन दूषणेन प्रयोजकेन कारणव्यापारात् पूर्वं तद्धर्मव्यवहारकालेऽपि सन् अनुभूयमानधर्मकत्वात् । वर्तमानकालीनघटवदित्यादीनां सांख्योक्तरीतिकाभ्यामनुमानतर्काभ्यां वक्ष्यमाणागमेन वा समुदितैर्वा धर्मिज्ञानेन तत्समवेतं यद्युक्तप्रतियोगित्वं वर्तमानप्रागभावादिप्रतियोगित्वं तदपि संयुक्तसमवेतसमवायेन विषयीभवतीति भावित्वादेर्विषयत्वेनैव जनकता । प्रत्यासत्तिस्तु संयुक्तसमवेतसमवाय एवेति नोक्तप्रत्यासत्त्यभाव इत्यर्थः । एवं युक्त्या धर्मिसत्तासाधनेनान्योन्याश्रये निवृत्ते आविर्भावादेरपि सिद्ध्या शून्यवादापत्तिः परिहृता । सांख्योक्तरीतिस्तु— असदकरणादुपादानग्रहणात् सर्वसंभवाभावात् * शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यमितिकारिकाव्याख्याने वाचस्पतिमिश्रैः स्फुटीकृता । तथाहि । कार्ये हि वादिनां विप्रतिपत्तयो बहुविधाः । असत अलीकादेव सज्जायते । श्रुतिश्च, असद्वा इदमग्र आसीत्ततो वै सदजायतेति बाह्याः । एकस्य सतो विवर्तः कार्यजातं, न वस्तु सदिति मायावादिनः । अन्ये तु, सतः असज्जायत इति । सतः सज्जायत इति सांख्यवृद्धाः । तत्र नाद्यः । कार्ये कारणतादात्म्यस्य लोके दर्शनात् सुखदुःखमोहभेदशब्दाद्यात्मकस्य कार्यस्य निरुपाख्यालीकतादात्म्यानुपपत्तेः । वैलक्षण्यात् सदसतोः । न द्वितीयः । अद्वयस्य सतो नानात्वानुपपत्तेः । प्रपञ्चप्रतीतेर्भ्रमत्वापत्तेश्च । असति बाधके तस्या भ्रमत्वायोगात् । न तृतीयः । सदसतोरैक्याभावेन तादात्म्यानुपपत्तेः । अतश्चतुर्थमेव प्रतिजानीते ॥ सत्कार्यमिति ॥ कारणव्यापारात् प्रागपि सदित्यर्थः । न च सिद्धसाधनम् । कारणानामभिव्यञ्जकत्वात् । अभिव्यक्तिः प्राकट्यं, स एव च कारणाद्विवेचकः । सोऽपि लौकिकप्रत्यक्षविषयत्वं, तदेवाविर्भाव इति तज्जनकत्वादित्यर्थः । नच बीजमृत्पिण्डादिप्रध्वंसोत्तरमङ्कुरघटाद्युत्पत्तिदर्शनात् प्रध्वंसस्य कारणत्वं शङ्क्यम् । तस्य भावत्वेना-

न्यत्रापि सुलभतया बीजादिकं विनापि तत्प्रसङ्गात् । अतो बीजाद्यवयवस्यैवम् अवधेर्नियतत्व इत्यनेन अतत्कारणत्वम् । इदमेव नियतावधिककुसुमाञ्जलावपि प्रोक्तं–हेतुभूतनिषेधो न स्वानुपाख्यविधिर्न च * स्वभाववर्णना नैवमवधेर्नियतत्वत इत्यनेन। अतः परं विनाशस्य सहकारित्वं बीजाद्यवयवानामेव कारणत्वं, ततोऽसतः कार्यस्य जन्मेतिकणभक्षाक्षचरणमतवशिष्यते। तद् दूषयति ॥ असदकरणादित्यादिना ॥ असतः कारणव्यापारात् प्राग् अविद्यमानस्यासद्रूपस्य अकरणात् सद्रूपेण कर्तुमशक्यत्वात् । नीलरूपस्य पीतत्ववत् सदसत्त्वे वस्तुनो घटादेधर्माविति चेत्, तथाप्यसति धर्मिणि धर्मस्य वक्तुमशक्यत्वात् तदनुरोधेन कारणव्यापारात् प्रागपि सत्त्वमेवाङ्गीकार्यम् । इदमेव दूषणं, भावित्वादेर्निराश्रयत्वसाधने विद्वन्मण्डने प्रपञ्चितं बोध्यम् ॥

किञ्च, असत्त्वं न कारणे सम्बद्धं; न वा तदात्मकम् । घटश्चेत्तद्धर्मवान् तदा कारणव्यापारोत्तरं कथं कारणात्मकः स्यात् । तस्यासत्त्वस्य स्वरूपधर्मस्यानागन्तुकत्वेनापायानर्हत्वात् । अतः सदेव कार्यमास्थेयम् । तिलेषु तैलं, दधिन सर्पिस्तथा मृदादौ घटादिरिति। अत्यन्तासत उत्पत्तेरभिव्यक्तेश्च दृष्टान्ताभावादपि । किञ्च, उपादानग्रहणात् ॥ उपादानैः सह कार्यस्य ग्रहणात् सम्बन्धात् । कार्येण सम्बद्धस्यैव कारणस्य कार्यजनकत्वादित्यर्थः । ननु कारणासम्बद्धमसदेवोत्पद्यताम् । संबद्धस्यैवोत्पत्तौ नियमाभावात् । घटादेरसंबद्धस्यैवोत्पद्यमानत्वदर्शनादिति चेत्तत्राह ॥ सर्वसंभवाभावादिति ॥ असम्बद्धस्य जन्यत्वे सर्वतः सर्वकार्योत्पत्तिप्रसङ्गादव्यवस्था । असम्बद्धत्वस्य सर्वत्राविशिष्टत्वात् । अतो घटादीनामपि सम्बन्धः कारणव्यापारात् पूर्वं वक्तव्यः । स च सत्त्व एव सम्भवतीति तदानीमपि कार्यं सदेवेत्यर्थः । नन्वसम्बद्धमपि कार्यं शक्तेन कारणेन जन्यते । शक्तिश्च कार्यदर्शनोन्नेया । तथाच यद् यत्र शक्तं तेनासम्बद्धमपि तदेव जन्यत इत्यदोष इतिचेत्तत्राह ॥ शक्तस्य शक्यकरणादिति ॥ कारणाश्रया सा शक्तिः किं सर्वं प्रति शक्यं प्रति वा । नाद्यः । पूर्ववदनवस्थापातात् । न द्वितीयः । शक्यस्यैवाभावेन तस्या अशक्यवचनत्वात् । अथ शक्तिस्वभाव एव कश्चित्तादृशो यः किञ्चिदेव जनयति, न सर्वमितिचेन्न । तस्य

शक्यसम्बद्धत्वे सम्बन्ध्यपेक्षया तदानीं कार्यसत्तापत्त्या भवत्सि-द्धान्तहानिः । असम्बद्धत्वे सैवाव्यवस्थेति । अतः शक्तस्य शक्यकरणात् सदेव कार्यम् । इदं च शक्त्यङ्गीकर्तृमते दूषणं, न तु प्रागभावाङ्गीकर्तृमते । तद्दूषणं तु निबन्धविवृतौ प्रकृतौ सृष्टिभेदवादे च द्रष्टव्यम् । किञ्च, कारणभावात् कार्यस्य कारणात्मकत्वात् । कारणस्य सत्त्वेन कार्यमपि सदेवेत्यर्थः । अभेदसाधकानुमानप्रयोगस्त्वेवं बोध्यः—पटस्तन्तुभ्यो न भिद्यते । तन्तुधर्मत्वात् । यद्यतो भिद्यते तन्न तस्य धर्मः । यथा गौरश्वस्येति । तथा, पटः तन्त्वभिन्नः । तन्तूपादेयत्वात् । यन्नैवं तन्नैवं, घटवत् । तथा पटस्तन्त्वभिन्नस्तन्निरूपितसंयोगरहितत्वात् । यन्नैवं तन्नैवम् । कुण्डबदरवत् । तथा पटस्तन्त्वभिन्नः । अप्राप्त्यभावात् । यन्नैवं तन्नैवम् । हिमवद्विन्ध्यवत् । तथा पटस्तन्त्वभिन्नः । तन्तुगुरुत्वातिरिक्तगुरुत्वानारम्भकत्वात् । यन्नैवं तन्नैवम् । घटवदिति । तस्मान्न तन्तुभ्योऽर्थान्तरं पट इति । नच पटस्तन्तुभ्यो भिन्नः । भिन्नप्रतीतिविषयत्वात् । भिन्नार्थक्रियाकारित्वाच्च घटवदिति प्रत्यनुमानेन पूर्वोक्तहेतूनां सत्प्रतिपक्षत्वमिति वाच्यम् । उक्तहेतूनामनैकान्तिकत्वात् । पटस्तन्त्वभिन्नः । भिन्नप्रतीतिविषयत्वात् । भिन्नव्यपदेशकत्वाच्च । वने तिलका इतिवत् । भिन्नार्थक्रियाकारित्वात् । दाहकपाचकवह्निवदिति । नच स्वात्मनि क्रियाविरोधाद्भेदसिद्धिः । कूर्माङ्गदृष्टान्तेनाविर्भावतिरोभावाभ्यामेव तदुपपत्तेरिति । एतदग्रे आविर्भावतिरोभावयोः सत्त्वमसत्त्वं वा कारणव्यापारात् प्रागिति विचारितम् । तदेव विद्वन्मण्डने प्रपञ्चितम् । तत उत्पत्तिपक्षे प्रतिबन्दी उक्ता । सा सती असती वा । आद्ये कृतं कारणैः । द्वितीये तस्या अप्युत्पत्त्यन्तरापेक्षायामनवस्था । अनपेक्षायां सत्यां सर्वदा सत्तापत्त्या कारणवैयर्थ्यम् । अथ उत्पत्तिः पट एव । तदा पट उत्पद्यत इति न वाच्यम् । पौनरुक्त्यापत्तेः । अयं प्रतिबन्दी सर्वनिर्णये श्रीमदाचार्यैरप्युक्तो बोध्यः । तस्मादुत्पत्तिः स्वकारणं समवायो वा स्वसत्तासमवायो वा । उभयथापि नोत्पद्यते । तथापि तदर्थानि कारणानि व्यापार्यन्त एव । पटादेराविर्भावाय कारणापेक्षेत्युपपन्नम् । न च पटरूपेण कारणानां सम्बन्धः । तद्रूपस्याक्रियत्वात् । कारणानां च क्रियासम्बन्धित्वात् । अन्यथा कारकत्वव्याहतेरिति सांख्योक्तरीतिः प्रसङ्गाद्दर्शिता ॥ प्रकृतमनुसरामः ।

एवं शून्यवादापत्तिपरिहारेऽप्यनिर्वाच्यतापत्तेः प्रतिबन्द्या परिहृतत्वेन प्रतिबन्देश्चानुत्तरत्वेन तन्निरासममन्वानोऽसत्कार्यवादी वितण्डया पुनः प्रत्यवतिष्ठते ।

ननु मम तु यथाकथञ्चिद् गतिः काचन भवित्री, तव तु न कापि । तथाहि, त्वन्मते घटादेः सदा सत्त्वेन भावित्वं न वक्तुं शक्यम् । श्रुतिस्मृतिलौकिकव्यवहारासिद्धत्वेन नेष्टापत्तिः कर्तुं शक्या नच लौकिकप्रत्यक्षविषयत्वगतं भावित्वं घटादावुपचर्यतइतिवाच्यम् तस्यापि घटसमानयोगक्षेमत्वात् । न हि प्रपञ्चातिरिक्तं तत् । स्वोक्तदूषणभियापि नैवं वक्तुं शक्यम् । तथा सति घटस्यापराधः को वेति न विद्मः । तथाच जीर्णतार्णपर्णाऽऽकीर्णविविधमतभवनमये वर्णपुरे स्वयमपि वसन् दूषणदहनमुद्भावयन् निजभवनदाहं किं नानुसन्धत्से इति चेद्, वत्स ! न वेत्सि किं, युक्तिकनकपङ्कसङ्कट्टितविविधनिगममहामणिविरचितब्रह्मवादभवनं मम । तथाहि । स हैतावानास ऐतदात्म्यमिदं सर्वं, तत्सत्यं, पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् इत्यादिश्रुतिभ्यः प्रपञ्चस्य ब्रह्मात्मत्वमवगम्यते । अत्र सर्वपदेनासंकुचितवृत्तिना भूतभव्ययोरपि प्राप्तावपि तदुक्तिर्या सा पुरुषस्य नित्यत्वेन तदात्मकस्य वर्तमानदशैव सम्भवतीति भावित्वभूतत्वव्यवहारोऽप्रामाणिक इति शङ्कानिरासायेति ज्ञायते । तथा धर्माणामपि ब्रह्मरूपत्वाद् घटादिषु तदात्मकतत्सत्त्वं न विरुद्धम् । स्वतःसिद्धप्रामाण्यश्रुतिवाक्यबलात् । नन्वेवं दर्शनसमयेऽपि तद्व्यवहारापत्तिर्वैपरीत्यापत्तिश्च, विरोधोच्छेदश्चेति चेन्न । यथा पृथिव्यात्मक एव तस्मिन् गन्धात्मकतत्सत्ता, नापरास्मिँस्तथा यदा यस्मिन् यथा व्यवहाराभावनियमस्तदा तस्मिन्नेव तथाविधविरोधात्मकतत्सत्त्वमिति तथेति नोक्तदूषणगन्धोऽपीति बुद्ध्यस्व । यत्रोक्तानियमाभावस्तत्र तु न तथा ।

तथाचोक्तमाश्रमवासिके पर्वणि गान्धारीं प्रति बादरायणेन—

देवाश्च दानवाश्चैव तथा ब्रह्मर्षयोऽमलाः ॥

त एते निधनं प्राप्ताः कुरुक्षेत्रे रणाजिरे इत्युपक्रम्य, धृतराष्ट्रादिभीष्मान्तानां स्वरूपमुक्त्वा गान्धार्या दुःखनिवारणायाह ।

सर्वे भवन्तो गच्छन्तु नदीं भागीरथीं प्रति ।

ततो द्रक्ष्यथ सर्वांस्तान् ये हताः स्म रणाजिरे, इति ॥

ततो धृतराष्ट्रपाण्डवादयः सस्त्रीकास्तत्र गत्वा स्नात्वा निशायां जातायां व्याससमीपं गताः ।

ततो व्यासो महातेजाः पुण्यं भागीरथीजलम् ।

अवगाह्याजुहावाऽथ सर्वांल्लोकान् महामुनिः ॥

पाण्डवानां च ये योधाः कौरवाणां च सर्वशः ।

राजानश्च महाभागा नानादेशनिवासिनः ॥

ततः सुतुमुलः शब्दो जलान्ते जनमेजय ! ।

प्रादुरासीद् यथापूर्वं कुरुपाण्डवसेनयोः ॥

ततस्ते पार्थिवाः सर्वे भीष्मद्रोणपुरोगमाः ।

ससैन्याः सलिलात् तस्मात् समुत्तस्थुः सहस्रश इत्यादिना सर्वान्नामपूर्वकं निरूप्याह—

एकां रात्रिं विहृत्यैव ते वीरास्ताश्च योषितः ।

आमन्त्र्यान्योऽन्यमाश्लिष्य ततो जग्मुर्यथागतम् इत्यादि । एतच्छ्रुत्वा जनमेजयः पप्रच्छ । कथं च त्यक्तदेहानां पुनर्दर्शनमिति । तदा वैशम्पायन आह—

अविप्रणाशः सर्वेषां कर्मणामिति निश्चयः ।

कर्मजानि शरीराणि तथैवाकृतयो नृप ! ॥

महाभूतानि नित्यानि भूताधिपतिसंश्रयाद् इत्यादि । एतदग्रे,

अविनाशी तथा नित्यः क्षेत्रज्ञ इति निश्चयः ॥

भूतानामात्मभावो यो ध्रुवोऽसौ संप्रजानताम् इत्याद्यनेक-

मुक्ताह—

अदर्शनादापतितः पुनश्चादर्शनं गतः ।

नाहं तं वेद्मि, नाऽसौ मां, नच मेऽस्ति विरागतेति ॥

नचेदं मायया प्रदर्शितं व्यासेनेति वाच्यम् । तथा वचनाभावात् । प्रसादात्तस्य वै मुनेरिति वाक्याच्च । पतिव्रतानां तासां स्वस्वभर्तृभिः सह विहारकथनाच्च । गङ्गास्नानादिसाधनोपदेशानुपपत्तेश्च । अदर्शनादापतित इत्यत्र ल्यब्लोपे पञ्चमीति, पुनःशब्दाच्च, दर्शनात् पूर्वं वस्तुसत्ता प्राप्यते । एवं सति यद्यद्देशकालावच्छेदेन यस्य यथा प्रतीतिर्भगवतेच्छाविषयः कृताऽस्ति तत्तद्देशकालावच्छेदेन तथा प्रतीतिर्भवतीति सिद्धम् । इदं तु यथा तथा, परान्तु तच्छुरित्यधिकरणे निरूपयिष्यामः । एतेन घटोपलम्भानुपलम्भयोः कादाचित्कत्वमनुपपन्नं, तादृशतद्धेतोर्वक्तुमशक्यत्वादितिनिरस्तम् । लौकिकप्रत्यक्षाविषयत्वेऽपि वस्तुसत्तया योगिप्रत्यक्षविषयत्वं स्यात् । भूतभाविनां वस्तूनामपि यतस्तथा तदिच्छा न तत्र चकास्ति । फलबलकल्प्या हि सा । अस्तु वा तद्विषयत्वं बाधकाभावात् । उक्तप्रमाणैर्वस्तु सत्त्वे सिद्धे तस्य न्यायप्राप्तत्वाच्च । अनागतमतीतं च वर्तमानमतीन्द्रियम् * विप्रकृष्टं व्यवहितं सम्यक् पश्यन्ति योगिन इति वचनाच्च । एवं सत्यस्मिन् कालेऽस्मिन् देशे इदं कार्यमेवं भवत्वितीच्छाविषयत्वमाविर्भावः, तदा तत्र तथा तन्मा भवत्वितीच्छाविषयत्वं तिरोभाव इत्यपि सुवचम् । एतयोरेव उक्तयोग्यतारूपत्वात् । नच तत्तद्देशकालयोरपि नित्यत्वाद् युगपत् सकलोपलम्भप्रसङ्गोऽनुपलम्भप्रसङ्गो वा स्यादितिवाच्यम् । अस्मिन् सृष्टिकालात्मके स्थूले कालोपाधौ तदवयवात्मकतत्कालोपाधौ क्रमिके तस्य तस्य पुरुषस्य तत्तदुपलम्भो भवत्वितीच्छाविषयत्वस्य तत्त्वात् । अत्रैतदिच्छाप्रकारमापन्नानां तत्तद्देशकालादीनाम् आविर्भावात्मकैत-

दिच्छाविषयत्वादेतदाविर्भावरूपं तेषामपि बुध्यस्व । भगवदाविर्भावस्य भगवच्छक्तित्वमिति नानुपपत्तिः काचित् । एवं सति यत्कालावच्छेदेन सर्वेषां मिथोऽनुभवविषयत्वं तथा स सृष्टिकाल इत्युच्यते । सर्वत्र विशिष्टेच्छैव नियामिकेति सर्वमनवद्यम् ।

आविर्भूयारविन्दाक्षे भक्तिमाविष्करोति यः ।
सोऽव्यान्नः पितृपद्रेणुस्तिरोधानं च दुर्हृदाम् ॥

ननु ममेत्यादि ॥ न वक्तुं शक्यमिति ॥ सार्वकालिकसत्ताविरोधित्वान्न वक्तुं शक्यम् । ननु व्यवहारस्य गौर्वाहीक इतिवदुपचारेणापि सिद्धेः सुखेन वक्तुं शक्यत्वमिति चेत्तत्राह ॥ न चेत्यादि ॥ एकत्र मुख्यत्वसिद्धावन्यत्रोपचारो भवति । त्वन्मते सर्वस्यापि मुख्यत्वेन तस्यावकाशादिति भावः । ननु त्वयेव मया तावन्मात्रस्याऽसत्त्वमेवाङ्गीकार्यमितिचेत्तत्राह ॥ स्वोक्तदूषणेत्यादि ॥ लौकिकप्रत्यक्षविषयत्वस्य तदानीमसत्त्वेन तद्भावित्वादेर्निराश्रयत्वप्रसङ्गभिया ॥ तथा सतीति ॥ तादृशविषयत्वस्याऽसत्त्वेऽङ्गीकृते सति ॥ तथाचानित्यत्वाङ्गीकारेऽपसिद्धान्तः । अनङ्गीकारे भूतभावित्वस्वऽनिर्वाच्यतापरिहार इत्युभयतः पाश इत्याशयेनाहुः ॥ तथाचेत्यादि ॥ तत्र सांख्योक्तस्य यौक्तिकत्वात् प्रतिबन्धामेव पर्यवसितत्वाच्च तदनादृत्य ब्रह्मवादेनैव समादधते ॥ वत्स न वेत्सीत्यादिना ॥ तथाच केवलयौक्तिकवाद एवेदं दूषणं, न तु श्रुतिप्रमाणयुक्ते वादे इत्यर्थः ॥ तदुपपादयन्ति ॥ तथाहीत्यादि ॥ नन्वेवं भावित्वादिव्यवहारस्य प्रामाणिकत्वेनावस्तु वक्तुं शक्यम् । तथापि कथं विरोधस्य परिहार इत्यत आहुः ॥ तथाचेत्यादि ॥ धर्माणामिति ॥ भावित्वभूतत्ववर्तमानत्वानाम् ॥ तदात्मकतत्सत्त्वमिति ॥ ब्रह्मात्मकभावित्वादिसत्त्वम् । विरोधो हि प्रमाणानां तुल्यबलत्वे प्रत्यक्षादीनां स्वविद्यादिपुरुषदोषदुष्टत्वेनाऽप्राबल्यात्तद्रहितायाः श्रुतेरेव प्राबल्यं श्रुत्या वा भेदेऽपि धर्मधर्मिभावस्य विरुद्धधर्माश्रयत्वस्य च मूलरूपे बोधनात्तत्रापि सर्वस्मिन् ब्रह्मरूपत्वस्य तयोश्चित्वेन त्रयाणां सत्ताबोधनात् तादृशतत्सत्त्वं न विरुद्धमिति तत्परिहार इत्यर्थः । अत्राशङ्कते ॥ नन्वित्यादि ॥ एवं प्रपञ्चस्य विरुद्धतत्त्रयाधारत्वेन विरोधाभाव दर्शनसमयेऽपि भावी-

त्यादिव्यवहारापत्तिः । प्रागभावादिकाले वर्तमानत्वादिप्रतीत्यापत्तिः । सर्वदा तत्त्रितयसत्त्वात्तत्त्रितयविरोधोच्छेदश्चेत्यर्थः । अत्र समादधते ॥ यथेत्यादि ॥ यथा येन प्रकारेण पृथिव्यात्मके ब्रह्मण्येव गन्धात्मकब्रह्मधर्मसत्ता सर्वावेद्यगन्धसत्त्वेऽपि तत्तद्देशकालावच्छेदेन तत्तदुद्भवनियता सत्ता नापरस्मिन् जलादौ नियता अनियता वा सा । तथा प्रपञ्चात्मके तस्मिन् यदा यस्मिन् यथा व्यवहाराभावनियमः यस्मिन् काले यस्मिन् देशे यदवच्छेदेन भूतभाविवर्तमानादिव्यवहाराभावनियमस्तत्काले तद्देशे तदवच्छेदेन तथाविधविरोधात्मकतत्सत्त्वं भूतादिविरोधात्मकब्रह्मधर्मसत्त्वमिति हेतोस्तथा न दर्शनसमय इत्यादिनोक्तं दूषणत्रयमित्यस्माद्धेतोर्नोक्तदूषणगन्धोऽपि नानिर्वाच्यत्वापत्त्यादीनि दूषणानीत्यर्थः । तथा चैकत्र तत्त्रितयसत्त्वेऽपि तत्तदुद्भूतत्वेन व्यवहारप्रतीत्योः सामञ्जस्यम् । अन्यानुद्भवेन च सहानवस्थानप्रतीत्या विरोधोऽनुच्छेदः । एवमनुच्छिन्ने तस्मिन् देशकालाभ्यां वस्तुषु नियमितेषु वस्तूनां न युगपदुपलम्भो नापि सदा तौ । एवं तयोः सातत्ये यौगपद्ये च निवृत्ते आविर्भावतिरोभावयोरपि नानिर्वाच्यत्वमिति निःशेषदूषणनिवृत्तिरिति भावः । नन्वत्र नियमस्वरूपकथने सप्तम्यन्तयत्तदाभ्यां वस्तुनिवेशो न युक्तः । विरोधस्य सार्वत्रिकत्वात् । तथा सत्यविरोधव्युत्पादनमसङ्गतमित्यत आहुः ॥ यत्रेत्यादि ॥ यथा गीतायां. केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैरित्यत्र दर्शितानां ध्वस्तत्ववर्तमानत्वयोस्तद्ध्वंसीयभावित्ववर्तमानत्वयोश्चेति । उक्तोदाहरणस्यार्जुनमात्रगोचरत्वात्तदनुक्त्वा सार्वजनीन प्रमाणान्तरमाहुः ॥ तथाचेत्यादि ॥ अत्र च यथागतमित्यन्तेन नष्टानां शरीराणां पुनरुन्मज्जनं विहारादिरूपा चेतनक्रिया चोक्ता । तत्र पुनरुन्मज्जनकथनेन ध्वंसस्य ध्वंसाप्रतियोगित्वनिवारणात्तस्य सामयिकात्यन्ताभावरूपतया तिरोभावरूपता बोधिता । ततो नैयायिकादिवज्जनमेजयस्याज्ञानं बोधयितुं तत्प्रश्न उपन्यस्तः । सामयिकात्यन्ताभावो हि प्रतियोगिनित्यत्वे भवति । तदनित्यत्वं चागोपालपण्डितं प्रसिद्धमिति कथं तस्य सामयिकत्वमिति तदाशयः । तत्र प्रतियोगिनित्यत्वं साधयितुं तत्कारणकलापनित्यत्वं वैशम्पायन आह ॥ अविप्रणाश इति, सार्द्धेन ॥ अत्र विप्रणाशपदेनाऽपाततो नाशप्रतीतिर्वस्तुतः अनाश इत्युक्तम् । अत्र

शरीराकृती कार्यभूते । कर्मणि निमित्तानि महाभूतानि समवायीनि । तथाच यथा कटसंवेष्टनहस्तमुष्टिजनकक्रियावेष्टनाद्युत्तरमपि प्रतीयमानत्वेऽपि हस्तयोगत्यागेऽपि कटप्रसारणदर्शनाद्धस्तसंयोगरक्षिता क्रियासत्ता निश्चीयते, तथाऽत्र सर्वकर्मसत्ता महाभूतनित्यत्वं, तत्र क्रियाभूतयोरेव नित्यत्वं कुत इत्याकाङ्क्षायां, भूताधिपतिसंश्रयादित्यनेनोभयोर्भगवदाश्रितत्वकथनाद्भगवद्धर्मत्वं हेतुरुक्तः । तेन नष्टशरीरोन्मज्जनमुपपादितम् । ततो विहारादिक्रियोपपादनाय शरीरेषु जीवप्रवेशं वक्तुं जीवनित्यत्वमाह ॥ अविनाशीत्यादि ॥ तत प्रवेशे हेतुमाह ॥ भूतानामिति ॥ भूतानां शरीराणामात्मभाव.–आत्मत्वेन ज्ञानमसौ संप्रजानतां ज्ञानिनां ध्रुवः वामदेवस्येव सर्वात्मभावरूपत्वात् । स एवार्थादज्ञानिनामध्रुवः । अभिमानित्वात् । तथाचानेन विद्वदविद्वत्साधारणो देहप्रवेशहेतुरुक्तः । तेन विहारादिक्रियाऽप्युपपन्नैवेत्यर्थः । ननु यद्येवं भवादृशां ज्ञानिनां, कथं तच्छरीरे मृतत्वव्यवहार इत्यत आह ॥ अदर्शनादिति ॥ न विद्यते दर्शनं यस्येत्यऽदर्शनं मूलकारणमक्षरम् । ल्यब्लोपे पञ्चमी । तत् प्राप्य इह संघात आगतः । यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद्विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापयन्तीति मुण्डकश्रुते । तथाच मूलकारणे लीनत्वात्तथा व्यवहार इत्यर्थः । अदर्शनं दर्शनाऽविषयत्वमित्यर्थेऽपि तत्र हेतुरक्षरं लयेन तदेकीभाव एवेति स एवाऽर्थः । ततो विश्वासार्थं स्वस्य ज्ञानित्वबोधनायाह ॥ नाहमित्यादि ॥ तं संघातं शरीररूपत्वेनाहं न वेद्मि ब्रह्मविस्त्वादसौ संघातो मामात्मानं न वेत्ति चिदंशस्य तिरोहितत्वात् । च पुनर्मे विरागतापि नास्ति । ज्ञाते हि दोषदुष्टात् पुरुषाद् विरज्यते ब्रह्मैव सर्वमिति ज्ञाने दोषस्य कुत्राप्यदर्शनान्न मे विरागता विगतो रागो यस्यासौ विरागस्तस्य भावो विरागता साऽपि सर्वस्यैवात्मत्वेन प्रियत्वान्नास्तीत्यर्थः । एवं पूर्णज्ञानित्वं बोधितम् । स्फुटमग्रिमम् । तत्रामाधिकत्वेऽनुपपत्तेश्चत्वन्ताश्चत्वारो हेतवः । शिष्टस्तु शरीराख्यवस्तुसत्तायां हेतुः स्फुट एव । नन्वस्तु विरोधस्यासार्वत्रिकत्वं, तथापि नियमतदभावौ यदि स्वाभाविकौ तदा लोके तयोर्विरोधो नियत एवेत्यविरोधव्युत्पादनमसंगतमेवेत्यत आहुः ॥ एवं सतीत्यादि ॥ तथाचानियमहेतुबोधनायायमुपाख्यानोपन्यास इति । विरोधः ऐच्छिकत्वान्न स्वा-

आविक इत्यविरोधव्युत्पादनमसंगतमित्यर्थः । ननु तथा प्रतीतिरि-
च्छाहेतुरस्तु, क्रियायां तु चेतनस्यैव हेतुता । तथा सति विहारे पुनः
कुतो नेत्यत आहुः ॥ इदमित्यादि ॥ तथाच तत्र जीवनिष्ठस्य कर्तृ-
त्वस्यापि ब्रह्माधीनत्वे तु व्यासचरणैः प्रतिपादितत्वात् तत्क्रियापि
ब्रह्माधीनेति तत्रापि तादृशेच्छाया एव हेतुत्वान्न बन्धापत्तिरित्यर्थः ।
एवमत्र हेतुनिरूपणेन यत्सिद्धं तदाहुः ॥ एतेनेति ॥

एतादृशनियमाकारव्यक्तीकरणेन कथं निरस्तमित्याकाङ्क्षायामाहुः ॥
यत इत्यादि ॥ ननु तादृशभगवदिच्छायां किं मानमित्याकाङ्क्षायामा-
हुः ॥ फलेत्यादि ॥ तथाच कार्यलिङ्गकानुमानमेव मानमित्यर्थः ।
तत्प्रयोगस्तु– भगवदिच्छा, तत्तत्कार्यजननाऽनुकूलतत्तत्प्रकारिका ।
तत्तत्कारणत्वात् । यद्यत्कारणं तत्तज्जननानुकूलतत्तत्प्रकारकम् । घट-
कारणदण्डवत् । यद्वा, एतत्कार्यम् एतज्जननानुकूलप्रकारकभगवदि-
च्छाजन्यम् । भगवदिच्छाकार्यत्वात् । यद्यत्कार्यं तत्तज्जननानुकूल-
कारणजन्यम् । दण्डकार्यघटवदित्येवं बोध्यः । ध्वस्तादीनां योगि-
प्रत्यक्षविषयत्वस्यादूषणत्वाय इष्टापत्त्या तत्परिहरन्ति ॥ अस्त्वित्या
दि ॥ इष्टापत्तेरन्याय्यत्वपरिहारायाहुः ॥ उक्तेत्यादि ॥ अप्रामाणि-
कत्वपरिहारायाहुः ॥ अनागतेत्यादि ॥ तथाचात्रानागताद्युल्लेखाद-
पि वस्तुसत्त्वैव प्राप्यत इति पूर्वोक्तं वाक्यं सामान्यलोकपरं, न यो-
गिपरमिति, न प्रमाणयोरपीतरेतरविरोध इत्यर्थः । एवमुक्तदूषणा-
नि परिहृत्य दूषणाभावं स्फुटीकर्तुं तेन सिद्धमाविर्भावादिस्वरूप-
माहुः ॥ एवं सतीत्यादि ॥ अत्र लक्षणे कालनिवेश उपलम्भाऽऽदि-
सातत्यवारणाय । देशनिवेशस्तद्यौगपद्यवारणाय । कार्यनिवेशो नि-
त्यवस्त्वाविर्भावस्यैतद्विलक्षणत्वज्ञापनाय । प्रकारनिवेशः कार-
णाव्यवस्थावारणायेति बोध्यम् । किञ्चास्मिन् कालेऽस्मिन् देशे
इत्यत्रास्मिन् कालेऽयं देशो भवत्वस्मिन् देशेऽयं कालो भवत्वि-
त्यपि विवक्षितं ज्ञेयम् । उदाहरणं तु यथा चतुर्युगव्यवस्था भारत-
वर्ष एव, नेतरत्र । यथाच पञ्चमस्कन्धे भारतवर्षव्यतिरिक्तान्यष्टव-
र्षाणि प्रकृत्योक्तं– तत्रत्यानां त्रेतायुगसमः कालः सदा वर्तते इति ।
यथा चावान्तरप्रलयकाले त्रिलोकीनाश उपरितनचतुर्लोकीस्थिति-
रित्यादि द्रष्टव्यम् । ननु पूर्वं विषयत्वयोग्यत्वरूपं लक्षणमुक्तमिदानीं
च विषयत्वरूपमुच्यत इति स्वोक्तविरोध इति शङ्कायामाहुः ॥ ए-

तयोरित्यादि ॥ योग्यता हि बाधाभावरूपा बाधाभावस्तु भगवदिच्छयैवेति तादृशतद्विषयत्वरूपैव सा सिद्ध्यतीति न विरोध इत्यर्थः । ननूपलम्भादिकादाचित्कत्वे उक्तरूपनियमो हेतुत्वेनोक्तः । स चेश्वरेच्छया कृत इतीच्छाया एव हेतुत्वं तेन सिद्धम् । तत्रेच्छाशरीरं प्रविष्टौ देशकालौ चेदनित्यौ तदा सिद्धान्तभङ्गः । यदि नित्यौ तदा यावती सामग्र्येकैकस्योपलम्भेऽपेक्ष्यते तावती सर्वाप्यस्तीति भूतभाविवर्तमानकालीनानां सर्वेषां युगपदुलम्भप्रसङ्गः । यदि च तिरोभावस्य बाधकत्वं प्रदर्श्य स दोषो निर्वाह्यस्तदा तथैवानुपलम्भप्रसङ्ग इत्येवं पूर्वोक्तसर्वदूषणतादवस्थ्याल्लक्षणमसङ्गतमित्यत आहुः ॥ नचेत्यादि ॥ तथाच लक्षणे, अस्मिन्नित्यनेन क्रमिकत्वपर्यन्तं कालविशेषणं संगृह्यते । एवमित्यनेन प्रकारमध्ये स स पुरुषः संगृह्यते । इदमित्यनेन घटादिवदुपलम्भादिरूपापि सा सा कार्यव्यक्तिः संगृह्यत इति देशकालयोर्नित्यत्वेऽपि तदाविर्भावस्य क्रमवैशिष्ट्यादिपूर्वकमेव विषयत्वमिति सुखेन तत्परिहारान्नासंगतिरित्यर्थः । नचेदृशेच्छैवाविर्भावोऽस्तु किं विषयपर्यन्तानुधावनेनेति वाच्यम् । बहु स्यां, हंत तिरोसानीति श्रुतौ तयोर्विषयत्वेनैव सिद्धत्वात् । तयोर्भगवद्धर्मत्वेऽपि विश्लिष्टशक्तिर्बहुधेव भातीति न्यायेन सृष्ट्युत्तरं जगद्धर्मत्वाविरोधात् । तदेतदक्षयं नित्यं जगन्मुनिवराऽखिलम् * आविर्भावतिरोभावजन्मनाशविकल्पवदिति विष्णुपुराणेऽपि तथाङ्गीकाराच्च । नचानित्यत्वप्रसङ्गः । बोधनार्थमेवं कथनात् । नापि विषयभेदे नानेच्छापत्तिगौरवम् । सर्वविषयकज्ञानवदिच्छाया अपि ऐक्यात् । प्रकर्षेणैव सर्वस्या निर्वोढुं शक्यत्वाच्चेति । ननु क्रमिकत्वं नाम तत्तत्कालोपाध्यवच्छिन्नाविर्भावशालित्वम् । आविर्भावस्वरूपं च तत्राप्येतदेवेति तज्ज्ञानेऽन्योन्याश्रयात्माश्रयदोषापात इत्यत आहुः ॥ अत्रेत्यादि ॥ एतदेव उक्तविशेषणविशिष्टमेव । तथाच तत्तदाविर्भावव्यक्तिभेदेन तज्ज्ञानभेदान्न तावित्यर्थः । यद्वा । अयमर्थः । श्रुतौ हि, बहु स्यां प्रजायेयेतीच्छायाः प्रकारद्वयमुक्तम् । तत्र प्राथमिकप्रकारेण नानारूपाविर्भावे भगवतः सकाशात् कालदेशपुरुषादिविभागः । द्वितीये प्रकर्षकथनात् तत्तत्प्रकारविवेकः । तथा सति प्रथमे प्रकारे अवच्छेदकाविवेकाभावान्निरवच्छिन्न एवाविर्भाव इति तदात्मिका । आविः प्रकटं भावयतीत्याबि-

र्भावस्तदात्मिका तत्स्वरूपिणी या एतदिच्छा बहु स्यामितीच्छा तद्वि-षयत्वात्तेषामुक्तदेशकालादीनामप्येतदेव निरवच्छिन्नानुभवविषय-त्वयोग्यत्वरूपमेवाविर्भावस्वरूपमिति हेतोर्बुद्ध्यस्व = सावधानीभू-य तद्दूषणाभावमनुसन्धत्स्वेत्युपालम्भः । एवं दूषणपरिहारादा-विर्भावादेर्नित्यत्वं साधितम् । नन्वस्तु नित्यत्वं तथापि तद्विवेको-त्तरं भावित्वादाविर्भावादेर्वस्तुशक्तित्वमेव, न भगवच्छक्तित्वमि-त्याशङ्कायामाहुः ॥ भगवदित्यादि ॥ सर्वस्य ब्रह्मात्मकत्वेन तदावि-र्भावोऽपि भगवदाविर्भाव एवेति तस्य तथात्वमिति नानुपपत्तिः काचित् । प्रतिव्यक्तिभेदकृताप्यनुपपत्तिः सर्वस्य भगवद्रूपत्वात्, शक्तेर्नानाप्रकारत्वाच्च नास्तीत्यर्थः । वस्तुतस्तु विश्लिष्टशक्तिर्बहुधे-व भातीत्यादिप्रमाणेन एकस्या एव श्लेषान्नानात्वमिति भावः ।

ननु सर्वस्य नित्यत्वमुपगच्छतः प्रलयस्याशक्यवचनत्वात् तदभावे सृष्टेरप्यशक्यवचनत्वात् पूर्वोक्तविवक्षायां सिद्धान्तविरोध इत्या-काङ्क्षायामाहुः ॥ एवं सतीत्यादि ॥ एवं सतीति ॥ सर्वस्य नित्यत्वे-ऽपि भगवदिच्छया तत्तन्नियमे सति । सर्वत्र स्थूलोपाधौ तदवा-न्तरोपाधौ, विशिष्टेच्छैव प्रजायेयेत्युक्तेच्छैव नियामिकेति न सिद्धा-न्तभङ्ग इत्यर्थः ।

सर्वमुपपाद्य वादसमाप्तिं बोधयितुं श्लोकमाहुः ॥ आविर्भूयेति ॥ तिरोधानमिति ॥ कुर्यादिति शेषः ।

एवं समापिते वादे शङ्काढ्यमानी क्रमिकयोरपि देशकालयो-र्नित्यत्वमनुसंधाय पुनः शङ्कते ।

ननु तत्तद्देशकालयोरपि नित्यत्वात् सकलोपलम्भप्रसङ्गो-ऽनुपलम्भप्रसङ्गश्च स्यादितिचेत् । ननु तत्तद्देशकालावच्छिन्नतत्त-त्पुरुषतत्तद्व्यवहारावपि स्त एवेति किमनुपपन्नम् ? । तर्हि तावधु-नाप्युपलभ्येतामिति चेन्नैवम् । अनुपलम्भावच्छेदककालावच्छि-न्नत्वात् तदवच्छिन्नस्य भिन्नत्वाद्युगपत् सत्त्वाच्च तदुपलम्भानुपल-म्भयोर्युगपत् सत्त्वं न विरुद्धम् । नच योऽहं पूर्वं घटमन्वभूवं, स एवाहमधुना नाऽनुभवामीति प्रत्यभिज्ञानुपपत्तिः । सर्वस्य ब्रह्मा-त्मकत्वेन तस्य चैकत्वेन तदुपपत्तेः । नचैवमतिप्रसङ्गः । उपल-

म्भानुपलम्भयोरपि ब्रह्मात्मकत्वात् । स्वेच्छया यत्र तदुपलम्भनरूपेणाविर्भवति तत्र तथा, यत्र च तदनुपलम्भरूपेणाविर्भवति तत्र तथेति नियमात् । यथा पृथिव्यामेव गन्धरूपेणाविर्भावो, न जलादिषु । अत एवाचार्यैः श्रीभागवततत्त्वदीपे, 'अथवा सर्वरूपत्वान्नामलीलाविभेदतः * विरोधांशपरित्यागात् प्रमाणं सर्वमेव हि' इति निरूपितम् । ब्रह्मणः सर्वरूपत्वेनापि वह्नेरनुष्णत्वरूपत्वेनापि, वह्निरनुष्ण इत्यादिवाक्यान्यपि प्रमाणानि । कुतः ? यतः सर्वत्राखण्डब्रह्मभानेन विरोधांशास्फूर्त्या विरोधांशस्त्यक्त एवेति वाक्यार्थः । अत एव पूर्वमेव वाचारम्भणं विकार इति निरूपितम् । ततः पूर्वोत्तरयोर्जडजीवयोः सदात्मकत्वे मध्ये हेतुमाह, स आत्मेति । एवं जडस्य तदात्मकत्वमुक्त्वा जीवस्याप्याह, तत्त्वमसीति । अस्योपदेशत्वान्मुहुरुक्तवान् । आवृत्तिरसकृदुपदेशादिति ब्रह्मसूत्रात् । अतः संपूर्णं महावाक्यमुपदेशः । तत्र यथा, ऐतदात्म्यमित्यत्र न भागत्यागलक्षणा सदंशे, तथा, तत्त्वमसीत्यत्र चिदंशेऽपि न सेत्यवगन्तव्यम् । तथाच सर्वस्यैव ब्रह्मवाक्यत्वात् तदेकदेश एव तत्त्वमसीति वाक्यं जीवब्रह्मणोरभेदं बोधयतीति न वक्तुं शक्यं वाक्यभेदप्रसङ्गात् उपक्रमविरोधाच्च । अपरं च त्वन्मते जीवस्याऽऽभासत्वेन अलीकत्वात्, स आत्मेत्यनेन तत्पदार्थं निरूप्य, 'न त्वमसि' इत्येव वदेन्न तु तत्त्वमसीति । सत्तावाचकधातोर्मध्यमपुरुषप्रयोगानुपपत्तिश्च । किञ्च, अविद्यया कृत्वा ब्रह्मण्यारोपितं जगत् प्रतीयते, रजतमिव शुक्तिकायामिति हि तव मतम् । तदसंभवि । आरोपे ह्यधिष्ठानज्ञानं कारणम् । अत्र च, पराञ्चि खानीति श्रुतेस्तस्याविषयत्वात् क्वारोपः ? नच ज्ञाननाश्यत्वोक्त्या अस्य ज्ञानस्य चाज्ञानमात्रनिवर्तकत्वेन अस्याप्यज्ञानकार्यत्वमुच्यते इति वक्तुं युक्तम् । विष्णुस्मरणादिना अतद्रूपाणां पापानां नाशात् ।

अस्तु वा ब्रह्मज्ञानमात्रस्याज्ञाननिवर्तकत्वम् । तच्च संसाररूपमेव, न तु प्रपञ्चः । भगवत्कार्यत्वात् । तथाच स्वरूपाऽज्ञानदेहेन्द्रियान्तःकरणप्राणाध्यासरूपप्रपञ्चात्मकाविद्यानाशे तत्कार्यरूपाहंताममतारूपसंसारनाश एव ज्ञानकार्यं, न तु प्रपञ्चनाशोऽपि । ब्रह्मविदः स्वपुत्रादिदर्शनाभावप्रसङ्गाद्, न चैवमित्येतत्सर्वं भागवततत्त्वदीपनिबन्धे प्रपञ्चितं पितृचरणैरिति नात्र वितन्यते । वस्तुतस्तु ब्रह्मज्ञानस्य नाज्ञाननिवर्तकत्वं, क्षीयन्ते चास्य कर्माणीतिश्रुतिस्मृतिवचनात् पुण्यपापयोरपि निवृत्तिः । एतयोरप्यज्ञानकार्यत्वं पुरस्तादेव निरस्तम् । किञ्च, अविद्याया असत्त्वेनाङ्गीकारात् तन्नाशोऽप्यशक्यनिरूपणः । इतोऽपि ब्रह्मणि तत्संबन्धोऽप्यशक्यवचनः, संबन्धस्य द्विनिष्ठत्वात् । प्रकृते चासंभवात् । तथाच कस्य केन कस्य प्रतीतिः स्यात् । विभाजिकाया एवाभावेनैव विभागस्याप्यभावात् । अत एवासन्नेव प्रतीयत इत्युच्यते इति चेद्,अहो मूढता !! यत् स्वप्नप्रतीतितरणिकिरणतापतप्तस्य तत उत्थितस्य जागरितदशादृष्टमरुमरीचिजलधिवीचिविभ्रमैस्तदुपशमाऽभिमानेन सुखिताभिमानिनो मिथ्याभिवादिनः । असतोऽपि प्रत्यायिका ह्यऽविद्या, सा चासतीति का प्रत्याययेदिति पूर्वोक्तं श्रुत्वाप्येवं वदन् मूर्खतां नातिवर्तसे । एतेनैव कार्यानुरूपेण कारणेन भाव्यमिति कार्यस्य तुच्छत्वेन तत्कारणं तादृश्यविद्योच्यते इत्यपि निरस्तम् । कार्यस्य तु तुच्छत्वातुच्छत्वे पश्चाद्विचारयिष्यामः । संप्रति त्वद्रीत्यैव विचार्यते । कल्पना हि लोकानुसारिणी । तथाच यत्र मायाविनो नटा मणिमन्त्रादिना आम्रकदम्बतरुं दर्शयन्ति तत्र तद्दर्शिनाम्रादिकमेवासद् दृष्टमिति ज्ञायते, तत्क्षणमेव तददर्शनाद्, न तु तन्मन्त्रादिसामर्थ्यमपि । तथा सति दर्शनमपि न स्यात् । सर्वोऽपि च तथा प्रदर्शयेदविशेषात् । तस्मात् त्वदभिमताविद्यया

जगत्प्रतीतिर्जीवविभागो वा न युक्तिसह इति न कर्तृत्वनिषेधो ब्रह्मणि शक्यनिरूपणः ॥

नन्वित्यादि ॥ तत्तद्देशकालयोरिति ॥ प्रागभावाद्यवस्थाभिव्यञ्जकस्य कारणात्मकस्य देशस्य क्रमिकत्वविशिष्टस्य कालोपाधेश्च नित्यत्वात् । युगपदेवैकवस्तुनिष्ठभावित्वादित्रितयोपलम्भादिः स्यादित्यर्थः । अत्र बहुवारमुद्धृतत्वात्तदुक्तदूषणमुपेक्ष्य तदुक्तमुपगम्यानित्यत्वं च स्मारयित्वा समाधातुं पृच्छन्ति—

नन्वित्यादि ॥ त्वदुक्तदेशकालमात्रनित्यत्वे किं वास्यं, त्वदनुक्ते प्रकारकार्ये अपि ते एव वर्तेते एवंति सर्वेवर्तमानत्वाद्धेतोः किं ममानुपपन्नम् । अस्मदुक्तात् किमयुक्तं दूषकत्वाभिमानिनस्तवाऽस्मदुपरि किं दूषणमवशिष्टमिति तद्धदेस्यर्थः । तत्राह, पूर्वपक्षी ॥ तर्हीत्यादि ॥ तौ देशकालप्रकारविशिष्टावेकवस्तुनिष्ठभावित्वादित्रितयविषयकव्यवहारौ अधुना वर्तमानकालेऽपि, उपलभ्येतां युगपदनुभवविषयौ क्रियेतामिति दूषणमवशिष्टमित्यर्थः । तत्र समादधते ॥ मैवमित्यादि ॥ वर्तमानावपि युगपन्नोपलप्स्यतः । अत्र हेतुः अनुपलम्भेति ॥ अयमर्थः । व्यवहारोपलम्भानुपलम्भयोरेकसामग्रीकत्वं त्वदभिमतमुत भिन्नसामग्रीकत्वम् । यद्याद्यस्तदा अभावग्रहणार्थं योग्यानुपलब्धिं विशेषणतां च किमित्यधिकामङ्गीकरोषि । अथाङ्गीकरोषि तदा सामग्रीभेदस्तु सिद्धः । एवं सति यथा सा तथा कालभेदोऽपि सामग्रीति तद्भेदात् कालात्मकतद्विरुद्धसामग्र्यवच्छिन्नानां पुंसामस्माकं तदनुपलम्भाद् युगपत् त्रितयानुपलम्भादित्यर्थ । ननु कालसामग्रीत्वे युगपत् त्रितयानुपलम्भ उपपद्यतां, तथापि अनुपलम्भकाले उपलम्भसमतायां किं मानमित्यत आहुः ॥ तत्कालेत्यादि ॥ तद्व्यवहारोपलम्भानुपलम्भयोः सहावस्थानविरोधे हि तत्तत्सत्तायां मानापेक्षा, न तु घटतदभावयोरिव भावाभावविरोधेऽपि । एतयोश्च न सहावस्थानविरोधः । तत्कालस्य भिन्नत्वात् । उपलम्भावच्छेदकस्तु योगिनां कालः । तयोः परस्परं भिन्नत्वादुपलम्भानुपलम्भयोर्युगपत्सत्त्वं न विरुद्धम् । यदि चैकस्यैव कालोपाधेः प्रतियोगिभेदेन जन्ममरणविवाहसीमन्तसुखदुःखघटोपलम्भानुपलम्भजनकत्ववत्प्रतियोगिभेदेन भूतवर्तमानादिव्य-

व्यवहारोपपादनक्षमत्वात् कालभेदेनोपेयते तत्रापि तदवच्छिन्नपुरुष-
स्यापि भिन्नत्वात् । पुरुषस्येति जात्यपेक्षयैकवचनम् । तथाच त-
त्कालोपाध्यवच्छिन्नपुरुषाणामपि भिन्नत्वाद् युगपत्सत्त्वाच्च । यथै-
कस्मिन् काले क्वचिदुदेष्यति क्वचिदुद्गच्छति क्वचिदुदेति सूर्ये तत्त-
द्व्यवहारस्य युगपत्सत्त्वं न विरुद्धमेवमत्रापीत्यर्थः । नन्वेवं पुरुषभेदेन
तत्तद्व्यवहारोपलम्भानुपलम्भव्यवस्थोपपत्त्या तयोर्युगपत् सत्त्वाविरो-
धो, न तन्नित्यत्वसाधकः । एकस्य पुरुषस्य योऽहं पूर्वं घटमन्वभूवं
स एवाहमधुनानुभवामीति प्रत्यभिज्ञायां तयोर्भिन्नकालिकत्वेनानु-
भवात् । तयोरेकपुरुषनिष्ठत्वेनैककालीनत्वसाधने च तादृशप्रत्यभि-
ज्ञानुपपत्तिरिति चेत्तत्राहु· ॥ नचेत्यादि ॥ तत्र हेतुः– सर्वस्येत्यादि ॥
एवं प्रत्यभिज्ञाया जायमानत्वेऽपि सर्वस्य ब्रह्मात्मकत्वेन ब्रह्मणश्चै-
कत्वेनैतस्योपलम्भकालेऽन्यनिष्ठतदनुपलम्भस्यानुपलम्भकाले चो-
पलम्भस्य चैतन्निष्ठत्वेनापि सत्त्वात् सिद्ध एकनिष्ठयौगपद्ये तयोर्नि-
त्यत्वोपपत्तेः । प्रमाणयोस्तुल्यबलत्वे हि विरोधतदभावचिन्ता । प्र-
कृते तु देहात्ममानिपुरुषनिष्ठत्वात् प्रत्यक्षं निर्बलम् । श्रुतिस्तु तद्रहि-
तपरमाप्तपुरुषवाक्यत्वात् प्रबला । तथाच श्रुतिरूपधर्मिग्राहकमान-
सिद्धं नित्यत्वं यौगपद्यं च मूलाऽस्पृग्भिरापातरमणीयैरनुभवशतै-
र्युक्तिसहस्रैश्च न प्रतिक्षेप्तु शक्यम् यथा त्वन्मते परमाणूनां नित्यत्वं,
घटादीनां द्व्यणुकादिक्रमजन्यत्वमित्यादि तथेत्यर्थः । नन्वेवं ब्रह्मैक्यं
यथा त्वन्मते सर्वनित्यत्वोपपादकं, तथैकोपलम्भादिव्यक्तेः सर्वग-
तस्याप्युपपादकमित्येकस्योपलम्भाद्यवसरे सर्वेषां तदापत्त्या सर्वे-
षां सर्वज्ञतापत्तिरूपातिप्रसङ्गापात इत्यत आहुः ॥ नचैवमित्यादि ॥
आत्मसमवेतस्यापि ज्ञानस्य प्रदेशवृत्तित्वं तवाप्यभिमतम् । अस्मा-
कं तु तद्भगवदिच्छया नियतमिति न कथमप्यतिप्रसङ्गावकाश इत्य-
र्थः । एतादृशनियमे किं मानमिति शङ्कायां यथा तव मते प्रागभाव-
स्तथाऽस्माकं भगवदिच्छा । फलबलकल्प्यत्वस्योभयत्रापि तौल्या-
त् । अस्माकं श्रुतिपुराणाद्युपष्टम्भस्याधिक्यात् तदनुसार्यनुमानम-
पीत्याशयेन दत्तोत्तरत्वं स्मारयन्ति ॥ यथेत्यादि ॥ एतेनैव नित्य-
कार्यविवेकाभावेऽपि दत्तोत्तरम् । इदं नित्यत्वेन व्यवह्रियतामिदं
कार्यत्वेनेत्यैच्छिकनियमस्य तत्रापि समानत्वात् । एवमन्या अप्य-
नुपपत्तयो भगवदिच्छास्वरूपविचारेणैव ब्रह्मवादे परिहरणीयाः ।

प्रजायेयेतीच्छाशरीरे प्रविष्टस्य प्रकर्षस्यातिपिचण्डिलत्वेन तस्य समाधानसमर्थत्वादिति दिक् ।

नन्वेवमपि त्वया नियमान्मास्तु रूपप्रपञ्चेऽतिप्रसङ्गस्तथापि नामप्रपञ्चे दुर्वारः । ब्रह्मणः सर्वरूपत्वेन तत्तद्भावोभयधर्मकत्वादज्ञे सर्वज्ञत्वस्य, सर्वज्ञेऽज्ञत्वस्य, नित्ये कार्यत्वस्य, कार्ये नित्यत्वस्य सद्भावाद्विपरीतप्रयोगेऽपि प्रामाण्यस्यानपायेन वाक्यप्रामाण्याऽप्रामाण्यव्यवस्थाभङ्गप्रसङ्गादित्याशङ्कायामिष्टापत्त्या समादधते ॥ अत एवाचार्यैरित्यादिना ॥ यतोऽयमतिप्रसङ्ग इष्टः, अत एवाचार्यैस्तथा निरूपितमित्यर्थः । वाक्यार्थस्तु– वेति पक्षान्तरं । पूर्वं विविदिषायां यत्प्रमाणत्वेन विवक्षितं तत्सर्वं, वेदाः श्रीकृष्णवाक्यानीत्यादिनोक्तम् । अथ विद्वद्दशायां, प्रमाणं सर्वमेव हि वाङ्मात्रमेव प्रमाणमित्यर्थः । ननु कथं परस्परविरुद्धानां वह्निरनुष्ण , परं ब्रह्म विष्णुशिवब्रह्माकारं निराकारमित्यादीनां प्रमाण्यमित्याकाङ्क्षायामाहुः ॥ सर्वरूपत्वाद्विरोधांशपरित्यागादिति ॥ तथाच भगवतः सर्वरूपत्वेन वह्निरूपत्वादनुष्णरूपत्वाच्चानुष्णवह्नित्वयोरैकाधिकरण्याच्छिन्नत्वादीनामप्यैकाधिकरण्याद्वह्निरनुष्णः, ब्रह्मविष्णुशिवाकारमित्यविरुद्धमित्यर्थः । तदेतदुक्तं– ब्रह्मणः सर्वरूपत्वेत्यादिना ॥ इदं चाग्रे व्युत्पाद्यम् । अत्र प्रकृतानुपयोगान्न व्याख्यातम् । परं तु निब धटीकाऽनुसारेणोच्यते ॥ * नामलीलाविभेदत इति ॥ रूपलीलावन्नामलीलाविभेदतो विरुद्धांशपरित्यागात् । यथा रूपलीलायां, पूर्ववद्धत्यधिकरणे निराकारमेव ब्रह्म प्रथमं पुरुषरूपेण, ततः शक्तिरूपेण, ततः कार्यरूपेण जायत इत्युच्यते, तथा नामापि क्रमेण तादृशतादृशवाक्यरूपेण जायत इति सर्वाणि वाक्यानि ब्रह्मबोधकत्वादविरुद्धानीति वाङ्मात्रं प्रमाणमित्यर्थ इति । प्रासङ्गिकं परिहृत्य प्रस्तुतं महावाक्यमेव निर्णेतुं कार्यदशायामपि सर्वस्य ब्रह्मत्वश्रुतेः संमतिमाहुः ॥ अत एवेत्यादि ॥ यतः सर्वस्य ब्रह्मात्मकत्वेनैकरूपत्वमेव श्रुत्यभिप्रेतं, न तु कार्यरूपत्वेन नानात्वमत एव हेतोः प्रपाठकारम्भ एव वाचा आरम्भणम् । घटः पट इत्यादिकथनं विकारो विकृतिर्नामधेयं नाममात्रं, न तु तेन रूपेण वस्तु तत्, किन्तु मृत्तिकेत्येव कारणरूपेणैव सत्यमित्युक्तम् । तथाचाऽविद्वद्दशायामेव नानात्वं, न विद्वद्दशायामित्यर्थः ॥ तत इति ॥ सत्यत्वकथनोत्तरम् ॥ स आत्मेति ॥ स एव जडस्य जीवस्य चा-

ऽऽत्मा अनारोपितानागन्तुकस्वरूपेणेति । ऐतदात्म्यमित्यादेः । उपदेश्य इत्युद्देश्योल्लेखः । सिद्धमाहुः ॥ तत्रेत्यादि ॥ स य एषोऽणिमेत्येतेन जगन्मूलं तमणुभावरूपं सत्पदार्थं परिचाय्य ऐतदात्म्यपदार्थाद्धर्मरूपताम् इदम्पदार्थाकारादिकं च त्यक्त्वा केवलसन्मात्रता न बोध्यते । तदुभयत्यागे ऐतदात्म्यसर्वपदयोर्वैयर्थ्यप्रसङ्गात् । किन्तु तत्पूर्वकमेव तथात्वं बोध्यत इति यथा सदंशो नानाङ्गीक्रियते तथा चिदंशोऽपि प्रायपाठबलात् तस्य भावस्तत्त्वमिति भावार्थप्रत्ययः । अप्रयुज्यमानेऽपि युष्मच्छब्दे मध्यमपुरुषोपपत्तिं चानुसन्धाय तदभावोऽवगन्तव्यः । एवं सिद्धे सर्वस्य ब्रह्मवाक्यत्वे लक्षणां विनैव तादात्म्येन सर्वस्य ब्रह्मत्वोपपत्त्या प्रतिज्ञादिसिद्धौ सर्वस्यैव ब्रह्मावबोधकत्वं युक्तं, न तु लक्षणया तदेकदेशस्य जीवब्रह्माभेदबोधकत्वं युक्तमित्यर्थः । ननु यथा तत्र पदवैयर्थ्यं तदभावगमकं, तथा तत्त्वमसीत्यत्र किं तदभावगमकमित्यत आहुः ॥ वाक्यभेदप्रसङ्गादिति ॥ रज्ज्वाद्यवयवेभ्यः सर्पादिसंस्थानवद्बुद्धिकल्पितेभ्यः सदवयवेभ्यो विकारसंस्थानोपपत्तिमङ्गीकृत्य ऐतदात्म्यमित्यस्य विभेदव्यासेधकत्वं, तत्त्वमसीत्यत्र भागत्यागलक्षणया जीवब्रह्माभेदबोधकत्वमित्येवमर्थभेदेन विभागे साकाङ्क्षत्वाभावेन च तत्प्रसङ्गादित्यर्थः । नन्वेवमर्थभेदेऽपि प्रकारभेदेन ब्रह्माभेद एव बोध्यते इत्याकाङ्क्षासत्त्वादेकवाक्यतोपपत्तेर्न तत्प्रसङ्ग इत्यतो हेत्वन्तरमाहुः ॥ उपक्रमविरोधादिति ॥ उपक्रमे हि, सदेव सोम्येदमग्र आसीदित्यादिना ब्रह्मणः सच्चिदात्मकजडजीवोपादानता बोधिता । न हि सा विवर्तवादे, अभेदे चोपपद्यते । विवर्त्तोपादानताया अभ्युपगमैकशरणत्वात् । अभेदे त्वयापि तदनङ्गीकाराच्च । एवं तदुक्तमनुपगम्य दूषणमुक्तम् । एवं तापनीयेऽपि बोध्यम् । तत्रारोपविभूतिव्यपदेशपक्षैः प्रजापतिर्जीवस्य ब्रह्माभेदं खण्डाष्टकेन बोधितवान् । तदिदं रहस्यं श्रुत्वा प्रणववाच्यं सिंहं परमेश्वरं स्वात्मत्वेन जिज्ञासुभिर्देवैर्नवमखण्डे विज्ञापितः सोऽद्वयात्मस्वरूपं सिंहमुपद्रष्टानुमन्तेत्यादिना व्याकुर्वन्नभेदप्रतीतेर्भ्रमत्वाय तज्जनकाविद्यास्वरूपं तमोरूपेत्युक्त्वा तदेतज्जडमोहात्मकमनन्तं तुच्छमिदं रूपमस्या व्यञ्जिका नित्यनिवृत्तापि मूढैरात्मेव दृष्टास्य सत्त्वमसत्त्वं च दर्शयन्ति सिद्धत्वासिद्धत्वाभ्याम् । स्वतन्त्रत्वेनैषा वटबीजसामान्यवदनेकवटशक्तिरेकैव । तद्यथा वट-

बीजसामान्यमेकमनेकान् स्वाव्यतिरिक्तान् वटान् स्वबीजानुत्पाद्य तत्र तत्र पूर्णं संतिष्ठत्येवमेवैषा माया स्वाव्यतिरिक्तानि परिपूर्णानि क्षेत्राणि दर्शयित्वेत्यन्तेन जडमोहात्मप्रपञ्चदर्शकत्वं वटबीजदृष्टान्तेन वैलक्षण्यं चोक्त्वा, जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति तत्कार्यमुक्त्वा, सैषा चित्रा सुदृढा बह्वङ्कुरा स्वयं गुणभिन्ना अङ्कुरेष्वपि गुणभिन्ना सर्वत्र ब्रह्मविष्णुशिवरूपिणी चैतन्यदीप्ता तस्मादात्मन एव त्रैविध्यं योनित्वमपीत्याह। अत्र चैतन्यदीप्तत्वकथनाच्छ्रुत्यन्तरोक्तजलचन्द्रदृष्टान्तेनांशप्रवेशद्वारा कार्यजीवेश्वरकर्तृत्वं सप्तम्यर्थे मत्वर्थीयेन चैतन्यगुणसम्बन्धेन दीप्त्या आभासाभास्ययोः समानाकारत्वनियमाभिप्रायेणात्मन एव त्रैविध्ययोनित्वकथनेन तस्या दर्शकत्वमात्रं, न तु जनकत्वमिति बोधितम्। अतोऽत्रापि जडजीवयोर्ब्रह्मभिन्नत्वं तादात्म्येन सिद्ध्यति, न तु ब्रह्मणो जीवाभेदः। जननानन्तरमेव दर्शकत्वाद्भिन्नत्वजडत्वस्वतन्त्रत्वादिना दृश्यमानस्य, स्वतन्त्रत्वाऽस्वतन्त्रत्वेत्यनेन मीमांसकसांख्यवैशेषिकादिप्रतिपन्नस्यान्तरासृष्टिरूपत्वेन मिथ्यात्वं, न तु सर्वस्येत्यपि। तेन भेदस्य यदतात्त्विकत्वमज्ञानकृतत्वं चोक्तं तत्स्वाभाविकत्वेनाभिमन्यमान एव तस्मिन् पर्यवस्यति, न तु तादात्म्यशरीरप्रविष्टे भेदे। एवञ्च व्यावहारिकस्मार्तः प्रपञ्चः स्वापेक्षयोत्कृष्टसत्ताकप्रपञ्चपूर्वकः। मायिकत्वात्। ऐन्द्रजालिकप्रपञ्चवदिति पूर्वोक्तश्रुतिमूलकानुमानेनापि ब्रह्मात्मकजगत्सिद्धेस्तदुक्तं प्रमाणाभासीकृतं ज्ञेयम्। अतः परं तदुक्तिमुपगम्यापि तथात्वं साधयन्ति ॥ अपरश्चेत्यादि ॥ तथाच हेयत्वावचनाच्चेत्यत्र भाष्ये सांख्यं प्रति यद् दूषणमुक्तं तेनापि त्वदभिमतप्रमाणस्याऽऽभासतेत्यर्थः। दूषणान्तरमाहुः ॥ सतेत्यादि ॥ आभासादेर सत्यत्वाद्वक्तुर्निरविद्यत्वेन तद्दर्शनायोगाच्च तथेत्यर्थः ॥

अथात्र प्रसङ्गाद्रामानुजमतं लिख्यते। चिदचिदीश्वर इति वस्तुत्रयं भिन्नस्वभावम्। तत्राचिद्वस्तुनश्चिद्वस्तुनः परब्रह्मणश्च भोग्यत्वेन भोक्तृत्वेनेशितृत्वेन च स्वरूपविवेकश्रुतय आहुः– अस्मान्मायी सृजते विश्वमेतत्तस्मिँश्चान्यो मायया सन्निरुद्ध इत्याद्याः। तेन त्रयाणां भेदः सिद्धः। यः पृथिव्यां तिष्ठन् यो रेतसि तिष्ठन् य आत्मनि तिष्ठन् इत्यन्तर्यामिब्राह्मणे पृथिव्या रेतआदीनां पृथिवीका-

र्याणां च पृथगुल्लेखात् सर्वावस्थितस्याचितः आत्मतदुल्लेखाद् बद्ध-मुक्तोभयावस्थस्याचिद्वस्तुश्चितश्च परमपुरुषशरीरत्वम् . तेन त-न्नियम्यत्वं तेनापृथक्स्थितिं च दर्शयति । इदं शारीरसौबालवाक्ये-ऽन्तर्यामित्वश्रवणोत्तरम् एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण इति परमपुरुषस्यापहतपाप्मत्वादिविशिष्टनारायण-रूपेणात्मत्वं श्रावयति । तेनाचितश्च सर्वावस्थासु तच्छरीरत्वाच्छ-रीर्यविनाभावः सिद्ध्यति । तथा सति तयोः शरीरशरीरिणोर्गोत्व-वत्सर्वदा अविनाभावः, परन्तु दृष्टान्ते विशेष्यस्यानित्यत्वं दार्ष्टान्तिके तु विशेषणस्येति विशेषः । एवं सति, सदेव सोम्येदमग्र आसी-दित्यादौ सत्पदेन परं ब्रह्मैवोच्यत उत अचिच्छरीरविशिष्टं तदुच्यत इति संदेहेऽपि तादृशे सौबालवाक्ये अन्तःप्रविष्टो यः सृजत इति श्रवणात् तेन छान्दोग्यवाक्योपसंहारे अचिच्छरीरविशिष्टस्यैव परस्योपादानत्वं कर्तृत्वं च सिद्ध्यतीति कार्यावस्थकारणावस्थस्थूल-सूक्ष्माचिद्वस्तुशरीरो बद्धमुक्तावस्थचिद्वस्तुशरीरश्च परमपुरुष एवेति कारणात् कार्यस्यानन्यत्वेन कारणाविज्ञानात् सर्वविज्ञान-मभिसंहितमुपपन्नतरम् । अत एव, च जगतो ब्रह्मोपादानकत्वम् । अत एव च सर्वेषां शब्दानां ब्रह्मवाचिना शब्देन सामानाधिकरण्यं मुख्यं वृत्तमित्यादि ॥ अत्र यद्यपि प्रतिज्ञोपपद्यते तथापि दृष्टान्तोप-रोधो दुर्वारः । अत एव, स आत्मानं स्वयमकुरुतेति श्रुतिः । प्रकृति-श्च प्रतिज्ञा दृष्टान्तानुपरोधात्, आत्मकृतेः परिणामादिति श्रुतिसूत्रवि-रोधोऽपि तथेति दिक् । एवमेव मध्वमते बोध्यम् । प्रकृतमनुसरामः ।

एवं जीवब्रह्माभेदबोधने प्रमाणस्याभासत्वं स्फुटीकृत्य तदभि-मताविद्याबोधनेऽपि तस्याभासत्वं स्फुटीकर्त्तुमविद्यया जगत्प्रतीतिं दूषयन्ति ॥ किञ्चेत्यादि ॥ नचाप्रत्यक्षेऽप्याकाशे तलमलिनिमारोप-वद् ब्रह्मण्यपि जगदारोपः संभवतीति वाच्यम् । अवकाशरूपेण वस्तुसामर्थ्यादेव प्रत्यक्षत्वात् । अन्यथाऽवकाशाद्यभिलापोच्छेदप्र-सङ्गात् । अविदुषां केनापि प्रकारेण ब्रह्मणस्तदभावादिति वैषम्या-त् । ननु, ज्ञानेन भूयोऽपि च तत् प्रलीयते रज्ज्वामहेर्भोगभवाभवौ यथा * इत्यादिप्रपञ्चस्य ज्ञाननाश्यत्वोक्त्या तथोच्यत इत्यत आहुः ॥ नचेत्यादि ॥ अस्यापि जगतोऽपि ॥ विष्णुस्मरणादनेत्यादिपदेन, न मां कर्माणि लिम्पतीत्यादिज्ञानसंग्रहः ॥ अतद्रूपाणामिति ॥

अज्ञानकार्यव्यतिरिक्तरूपाणाम् । तथाच ज्ञानत्वेनाज्ञानमात्रकनिवर्त्तकत्वेन नियमे तद्कार्याणां पापानां नाशाभावेन स्मृतिविरोधः । तेषामप्यज्ञानकार्यत्वाङ्गीकारे पापनाशवत् प्रपञ्चमात्रनाशापत्त्या स्मृतिप्रत्यक्षविरोध इत्यर्थः । ननु ब्रह्मज्ञानत्वेनाज्ञानमात्रनिवर्त्तकत्वेन व्याप्तिर्वाक्यबलादङ्गीक्रियते न तु ज्ञानत्वेनातो ज्ञानान्तरस्येतरनाशकत्वेऽपि न दोष इत्याकाङ्क्षायामन्तरासृष्टिस्तद्विषय इत्याशयेन तदुक्तमभ्युपगच्छन्ति ॥ अस्तु वेत्यादि ॥ वेत्यनादरे ॥ तच्चेत्यादि ॥ ज्ञाननिवर्त्यं भावरूपाज्ञानं च संसाररूपमेव अभिमानात्मकमेव । नैवात्मनो न देहस्य संसृतिः सुविवक्तयोः * अविवेकस्तयोर्यस्माविह तस्यैव संसृतिरि भगवता देहात्मानौ पृथगुक्त्वा तदविवेकस्यैव संसारकथनात् । तेन, य एष संसारतरुः पुराण इत्यत्रापि, द्वे अस्य बीजे शतमूलस्त्रिनाल इति द्विबीजस्य सांख्यप्रतिपन्नस्यैव, मायामयं वेद स वेद वेदमित्यनेन मायमयत्वमुच्यते । वास्तवमेवाश्रयणात् तस्या अन्तरासृष्टिरूपत्वात् । न तु ब्रह्मकार्यस्य तस्य तथात्वम् । एतेनैव ये एकादशस्कन्धादिषु देहं प्रकृत्य, निरूपितेयं त्रिविधा निर्मूला भातिरात्मनीति, प्रपञ्च प्रकृत्य, त्वय्यद्वितीये भगवन्नयं भ्रम इति, विकार प्रकृत्य, आद्यन्तयोर्यदसतोऽस्ति तद्वै मध्य इत्यज्ञानभ्रमासच्छब्दाः प्रपञ्चे प्रयुक्ता स्तेऽपि व्याख्याता बोध्याः । तदेतद् हृदि कृत्वाऽऽहुः ॥ तथाचेत्यादि ॥ अहंताममतारूप इति ॥ अहंताममते रूपयतीत्यहंताममतारूपः अभिमत्यात्मक इत्यर्थः ॥ न चैवमिति ॥ न स्वपुत्रादिदर्शनाभावः । एवं संसारप्रपञ्चयोर्भेदमङ्गीकृत्य तदुक्ता व्याप्तिरङ्गीकृता । अतः परं तस्याऽप्रयोजकत्वं बोधयितुमाहुः ॥ वस्तुत इत्यादि ॥ नन्वेवं सति मिथ्याज्ञानसलिलावसिक्तायामेव हृदयभूमौ कर्मबीजप्ररोहाद् ब्रह्मज्ञानत्वेनाऽज्ञानकार्यनिवर्त्तकत्वेन व्याप्तिर्नाप्रयोजिकेत्यत आहुः ॥ एतयोरित्यादि ॥ एतयोः पुण्यपापयोरज्ञानकार्यत्वमज्ञानपरिणामत्वं पुरस्तादेव प्रपञ्चस्य भगवत्कार्यत्वबोधकश्रुतिविचार एव निरस्तम् । तथाच व्याप्तिरप्रयोजिकैवेत्यर्थः । प्रकारान्तरेणापि तथात्वमाहुः ॥ किञ्चेत्यादि ॥ ननु कार्यस्वरूपबलात् तथाङ्गीक्रियत इति चेत् तत्राहुः ॥ एतेनेत्यादि ॥ एतेनेति ॥ तत्स्वरूपासत्त्वेन । नन्वेवं सति श्रुत्युक्तस्य तुच्छत्वस्य का गतिरित्यत आहुः ॥ कार्यस्येत्यादि ॥ पश्चादि-

ति ॥ ग्रन्थसमाप्तिदशायाम् । इदानीं कुतो न विचार्यत इत्याकाङ्क्षायां तुच्छत्वाङ्गीकारेऽपि त्वन्मतस्य दूषयितुं शक्यत्वान्न विचार्यत इत्याशयेनाहुः ॥ संप्रतीत्यादि ॥ स्वद्रीत्येति ॥ तुच्छत्वाङ्गीकारपूर्वकम् सिद्धमाहुः ॥ तस्मादित्यादि ॥ तस्मादिति ॥ अत्यन्तयुक्तिविरुद्धत्वात् ॥

एवं तुच्छत्वाङ्गीकारेऽपि जगत्प्रतीत्यादिरूपतत्कार्यासिद्धिं प्रदर्श्यानुपाधित्वादिति हेतुः साधितः । तत्र प्रमाणस्याभासतासंपादने महावाक्ये भागत्यागलक्षणामनादृत्य जीवस्य ब्रह्माभेद उक्तो, जीवस्वरूपं तु नोक्तमिति तमनुपपन्नं मन्वानस्तमादाय श्रुतार्थापत्यभिमानेन स्वोक्तं समर्थयिष्यन् पुनः प्रत्यवतिष्ठते ।

नन्वास्तां शुद्धमेव ब्रह्म जगत्कारणं, तेन सहाभेदो जीवस्य कथं श्रुत्या बोध्यते । परस्परं विरुद्धधर्मत्वादुभयोः, परमार्थयो भिन्नयोरभेदासम्भवश्च । नचौपाधिकत्वेन भेदस्य तदपगमे तत्संभव इति वाच्यम् । पूर्वोक्तन्यायेनोपाधेरेव निर्वक्तुमशक्यत्वात् । नच तात्त्विकभेदवतोरपि पाथसोर्मिलने सत्यभेदप्रतीतिवत् प्रकृतेऽपि, नद्यः प्रविष्टा इव नामरूपे इति वचनाद् ब्रह्मसम्बन्धे सति जीवस्तस्माद् भिन्नतया न प्रतीयत इत्याशयेन अभेदः श्रुत्या बोध्यते इति वाच्यम् । तयोरनन्त्यावयविसावयव्येकजातीयद्रव्यत्वेन उभाभ्यामेकं स्वसजातीयं कार्यमुत्पाद्यत इति युक्तं तदभेददर्शनम् । प्रकृते तूभयोरपि महत्त्वे सति निरवयवत्वेनारम्भकत्वासंभवाच्च, न तथा वक्तुं शक्यम् । अविनाशी वारे अयमात्मा अनुच्छित्तिधर्मेति श्रुतेर्नाशासम्भवाच्च । किञ्च, जीवब्रह्मणोः कः सम्बन्धः ? । न तावत् संयोगः । तयोर्विभुत्वेन तदनङ्गीकारात् । न समवायः । अनाश्रितत्वादुभयोः । नापि स्वरूपसम्बन्धः । तस्य सार्वदिकत्वेन सर्वदा जीवानुपलब्धिप्रसङ्गात् । किञ्च, अणुजीवपक्षेऽपि ब्रह्मणो व्यापकत्वात् सकलजीवसम्बन्धस्य सार्वदिकत्वात् कदापि न ते प्रतीताः स्युः । नापि ब्रह्मसाक्षात्कारान-

स्तरमेव जीवस्य ब्रह्मभावो, ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुत्या प्रतिपाद्यते इति ज्ञातृज्ञेयभाव एव सम्बन्धो वाच्यः । पारमार्थिकभेदस्यैतदनपनोद्यत्वात् । अन्यथा देवदत्तविष्णुमित्रयोरप्यभेदापत्तिः । किञ्च, सम्बन्धस्य द्विनिष्ठत्वात् संसारिणमपि जीवं ब्रह्म जानाति इति ज्ञातृत्वसम्बन्धस्य तादृशे जीवेऽपि सत्त्वात् तस्याप्यभेदापत्तिः । ब्रह्मनिरूपितमेव तत्तद्भेदसाधकमितिचेन्न । यतो वाचो निवर्तन्ते अप्राप्य मनसा सह, अदृश्यं द्रष्टृ इत्यादिश्रुतिभिस्तस्य ज्ञेयत्वनिषेधात् । अभेदोऽपि जीवब्रह्मणोर्न तादात्म्यरूपः । स हि धर्मधर्मिभावे भवति, तस्या ऽत्रासम्भवात् पारमार्थिकभेदवतः पारमार्थिकाभेदोऽसम्भावित इत्युक्तम् । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाऽनुपपत्तिश्च । एतेनैव चेतनत्वादिधर्मसारूप्येणौपचारिक एवाभेद उच्यते इत्यपि निरस्तम् । नच तद्विकारित्वेन प्रतिज्ञोपपत्तिः । तस्याऽविकारित्वश्रुतेः । जीवोऽपि, न जायते म्रियते वा कदाचिदित्यादिवाक्यैर्न विकार्यः । नापि जीवो ब्रह्मणोंऽशः । तस्य निरवयवत्वात् । अंशो नानाव्यपदेशादिति तत्सूत्रादिकं त्वौपचारिकमंशत्वमाह । मुख्ये बाधकमुक्तमेव । तस्माद् ब्रह्मोपाधिरेव जीव इति मन्तव्यम् । अभेदबोधकश्रुत्यनुरोधात् । नचोक्तन्यायेनाविद्याया उपाधित्वासम्भवान्नैवं वक्तुं शक्यमिति वाच्यम् । श्रौतानुपपत्तेर्बलिष्ठत्वात् । तथाचोपहितस्यैवाभेदासंभवाद्भेदसिद्ध्यर्थमुपाधेरपि प्रातीतिकमेव सत्त्वमुररीकार्यम् । पारमार्थिकसत्त्वे ज्ञाननाश्यत्वासंभवात् । तथाच, यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यादिना, अविद्यावस्थायामेव द्वैतदर्शनमुक्त्वा तदभावदशायां, यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदित्यादिना च तन्निवारयन्तिश्रुतिरित्याविद्यकत्वं प्रपञ्चस्यापि सिद्ध्यतीति, यतो वा इमानि इत्यादिना च ब्रह्मक-

र्तृकत्वं प्रपञ्चस्य वदतीत्युभयसामञ्जस्यनिमित्तम् । अविद्योपहितमेव ब्रह्म जगत्कारणमुच्यताम् । अत एव, नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतिरप्युपपद्यते इत्येवं प्राप्ते ब्रूमः ।

तन्मात्रस्थानित्यादि ॥ कथमिति ॥ किमैक्यरूपेण, किं वा भेदाऽभावरूपेण, उताविर्भावरूपेणाथवा तस्मिन् सत्यभेदप्रतीतिविषयत्वेनाथवा तादात्म्यरूपेणापि वा अविनाभावरूपेणोतोपचारेणेति । तत्राद्यं दूषयति ॥ परस्परमित्यादि ॥ द्वितीयं दूषयन्ति ॥ परमार्थत इत्यादि ॥ तृतीयचतुर्थौ निराकरोति ॥ नच तात्त्विकेत्यादि ॥ नद्य इति ॥ इदमेकादशे भगवद्वाक्यम् । ता नाविदन्मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदम् * यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे इति । अत्र विन्दतीति विभक्तिपरिणामेन योजना ॥ तयोरिति । पाथसोः ॥ इति युक्तमिति । अविभागादप्रतीतेर्वा हेतोर्युक्तम् । ननु महत्त्वनिरवयवत्वे नारम्भबाधके । प्रकृतौ परमाणुषु च तदङ्गीकारादित्यत आह । अविनाशीत्यादि ॥ अनुच्छित्तिधर्मेत्यत्र, न विद्यते उच्छित्तिर्येषां ते अनुच्छित्तयस्तादृशा धर्मा यस्येत्यर्थो विवक्षितो, न तूच्छित्तिर्धर्मो यस्यासावनुच्छित्तिधर्मा, तद्भिन्नोऽनुच्छित्तिधर्मेति । अविनाशिपदेनैवार्थलाभादस्य वैयर्थ्यापत्तेः । तथाच पाथोमेलने एकतरस्य रूपस्योच्छित्त्या अभेदप्रतीतिसिद्धिः । प्रकृते तु तदभावात्तदभावेनाविर्भावोऽप्यशक्यवचन इत्यर्थः । संबन्धस्याशक्यवचनत्वादपि तदनुपपत्तिमाह ॥ किञ्चेत्यादि ॥ तयोरित्यादि ॥ विभुनिरवयवयोः क्रियादयवराहित्याज्जन्यः संयोगो न वक्तुं शक्य इति स्वरूपेण वाच्यः । तथा सति सोऽप्यजः स्यात् । तादृशस्य कुत्राप्यङ्गीकाराभावादित्यर्थः । ननु जीवाणुत्वमास्थाय संयोगाङ्गीकारे न किञ्चिद्बाधकमित्यत आहुः ॥ किञ्चाण्विति ॥ सम्बन्धसत्त्वेऽपि इतराभावादित्यर्थस्याप्रयोजकत्वात् तन्नेत्याह ॥ नाशीत्यादि ॥ किञ्चेत्यादि च ॥ पञ्चमं दूषयति ॥ अभेदोऽपीत्यादि ॥ तस्याश्चासम्भवादिति ॥ धर्मत्वं वृत्तिमत्त्वं च तदाधारत्वम् । तच्च कुण्डलसुवर्णवदत्र वक्तव्यम् । न तु घटपटवत् प्रकृते त्वनागन्तुकतया भेदस्य पारमार्थिकत्वेन तदसम्भवादसङ्कुचितविरोधेन चासम्भवादित्यर्थः । षष्ठं निराकरोति ॥ एकेत्यादि ॥ अविनाभावलक्षणाभेदाङ्गी-

कारे ज्ञानस्योभयमहिम्ना भवनाद्येनाश्रुतमित्येकत्वव्याकोपात्प्रतिज्ञानुपपत्तिरित्यर्थः । चकारो दृष्टान्तोपरोधसमुच्चायकः इदं दूषणं भविभागपक्षे तु इत्यम् । सतम निराकरोति ॥ एतेनेत्यादि ॥ एतेनेति ॥ प्रतिज्ञोपपत्तिकथनेन ननु दृष्टान्तानुरोधात् विकारमङ्गीकृत्य प्रतिज्ञोपपादनीयेत्यत आहुः ॥ नच तदित्यादि ॥ तस्येत्यादि ॥ तस्य ब्रह्मणः । निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् * अमृतस्य परं सेतु दग्धेन्धनमिवानलमित्यादिश्रुतिषु तथात्वश्रवणादित्यर्थः । तर्हि अंशांशिभावमाश्रित्य प्रतिज्ञोपपादनीयेत्यत आह ॥ नापीत्यादि ॥ निरवयवत्वादिति ॥ निष्कलश्रुतेस्तथात्वादित्यर्थः । नन्वेवं सति व्याससूत्रविरोध इत्यत आह ॥ अंश इत्यादि ॥ तथाच निष्कलश्रुतिविरोधाद् गुणभूतेषु तेष्वन्यार्थकल्पना न दुष्टेत्यविरोध इत्यर्थः । एवं सर्वान् प्रकारान्निराकृत्य स्वाभिमतमाहुः ॥ तस्मादित्यादि ॥

ब्रह्मोपाधिरिति ॥ ब्रह्मविभाजकोपाधि । एवं स्वाभिमतं जीवस्वरूपं साधयित्वार्थादस्यैवोपाधेरव्यसत्त्वं साधयति ॥ तथाचोपेत्यादि ॥ एवमेव प्रपञ्चस्याप्यसत्त्वं साधयन्नुपहितस्य जगज्जनकत्वमाह ॥ तथाच यथेत्यादि ॥ प्राप्त इति ॥ उपहितस्य कर्तृत्वे प्राप्ते ॥

तन्निराकर्त्तुं ब्रूम इति प्रतिज्ञाय जीवस्यांशत्वे निरवयवत्वस्य अबाधकत्वं प्रमाणयुक्तं सत् वदिष्यन्तस्तादात्म्येन ब्रह्माभेदं च तस्योपादयिष्यन्तः पूर्वं जीवस्वरूपादिकं कारिकया आहुः ॥

श्रुतिभिर्व्याससूत्रैश्च स्मृतिभिश्चांश एव सः ।
स्वार्थे प्रामाण्यतस्तेषां तेभ्य एवाणुरेव च ॥

भवेदेतदेवं यद्याविद्यकं जीवत्वं स्यात् । न त्वेवम्, किन्तु पारमार्थिकम् । नचाभेदबोधकश्रुत्यनुपपत्तिः । अंशांशिभावेनैव तदुपपत्तेः । ननु निरवयवत्वं बाधकमुक्तमितिचेत्, सत्यमुक्तम् । तत्रेदं विचार्यते । ब्रह्मस्वरूपं च श्रुतिगम्यं ? लौकिकप्रमाणगम्यं वेति । तत्र न द्वितीयः । तथाहि । न तावच्चाक्षुषम्, अरूपिद्रव्यत्वेन । नापि स्पार्शनम् । तद्रहितत्वात् । नापि गन्धादिवद् घ्राणेन्द्रियादिप्रत्यक्षम् । अगुणत्वात् । नाप्यनुमानगम्यम् । परि-

क्षेपेण ज्ञानप्रयत्नाधारत्वेनात्मसाधने आवश्यकत्वाल्लाघवाच्च प्राणसिद्ध्यैवाऽर्थान्तरत्वेन तदसिद्धेः । यथाकथञ्चित् सिद्धावपि नोपनिषद्विचारितरूपस्यासिद्धिः । तथाच स्वतःसिद्धप्रामाण्यैतद्विरोधेन बाधितत्वादनुमानस्य न तत्साधकत्वम् । नापि शब्दगम्यम् । तस्याप्तोक्तिरूपत्वेन तस्य च यथादृष्टार्थवादित्वेनात्मनश्चाःदृश्यत्वेन तदनुपपत्तेः । अत एव नोपमानगम्यमपि । किन्तु श्रुत्येकसमधिगम्यम् । तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुतेः । सर्वे वेदा यत्पदमामनन्ति, वेदैश्च सर्वैरहमेव वेद्य इति स्मृतेश्च । तदर्थश्च न लौकिकरीत्या निर्णेतुं योग्यः । अलौकिकत्वात् । तस्य च लोकविलक्षणत्वात् । किन्तु स्वयमेव वेदव्यासं कृत्वा तन्मीमांसां च प्रतिज्ञापूर्वकं कुर्वतो वेदव्यासस्य सूत्रैः । तस्यैतदर्थाभिज्ञत्वात् । तत्र च जीवब्रह्मसंबन्धविचारे ब्रह्मणोऽंश एव जीव इति निर्णीतम् । अंशो नानाव्यपदेशादिति । अस्यार्थः । जीवो ब्रह्मणः अंश एव । कुतः । नानाव्यपदेशात् । नानाविधो यो व्यपदेशः कचिद् ब्रह्मत्वेन,कचिदुत्पन्नत्वेन कचिदज्ञत्वेन, कचिच्चिद्रूपत्वेन, कचिदीशितव्यत्वेन अणुत्वेन च, व्यापकत्वेन च निरूपणादेकस्यैव विरुद्धधर्माश्रयत्वं ब्रह्मातिरिक्तस्य न संभवतीति ब्रह्मांश एव जीव इत्यर्थः । अथवा नानाव्यपदेशाद्भेदेन व्यपदेशात् तथेत्यर्थः । श्रुतिश्च, यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवाऽस्मादात्मनः सर्वे प्राणा इत्युपक्रम्य सर्व एवात्मानो व्युच्चरन्तीति, कपूयचरणा रमणीयचरणा इति च । यत्तु जीवस्य ब्रह्मोपाधिकत्वमङ्गीकृत्य विस्फुलिङ्गस्यौष्ण्यमिव चेतनत्वं साधारणो धर्मो जीवेश्वरयोरित्यौपचारिकमंशत्वं व्याख्याय नानाव्यपदेशदर्शनं श्रुतौ, यथाग्नेः क्षुद्रा विस्फुलिङ्गाः, य आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीत्यादेः । तत्तूपेक्ष्यं विद्वद्भिः । पूर्वापरविरोधात् । तथाहि । न हि तत्स-

तीयजीवस्याभासत्वेन प्रतिबिम्बत्वेन वाऽलीकस्य नियमनमतस्तस्मिन् स्थितिर्वा ज्ञानैकघनस्य परमात्मनः संभवति । न वा विस्फुलिङ्गौष्ण्यदृष्टान्तेन चेतनत्वं साधारणं धर्ममादायौपचारिकमंशत्वमपि व्याख्यातुं शक्यम् । तत एवांशत्वावगमप्रकारस्तु न श्रुत्यैव यथाग्नेः क्षुद्रा इत्यादिनोक्तः ॥

श्रुतित इत्यादि ॥ व्याकुर्वन्ति ॥ भवेदेतदेवं, यद्याविद्यकमिति ॥ एतत् त्वदुक्तं भवेत् उपपद्येत । एवं त्वदुक्तप्रकारेणाविद्योपाधिकमित्यर्थः ॥ परिशेषेणेत्यादि ॥ परिवर्जने । वर्जितस्य शेषः । प्रसक्ते निषधे तत्संसर्गरहितः परिशेषस्तेन । अयमर्थः । निरात्मवादिनां बाह्यानां मते चेतनाया मदशक्तिवत् पुञ्जधर्मत्वम् । यथा केवलैः खदिरचूर्णताम्बूलपर्णपूगैर्न मदः, समुदितैश्च मदस्तथा केवलपरमाणूनामचेतनत्वं, त्रिविधपरमाणुपुञ्जस्य चेतनत्वमिति । तत्रान्ये वदन्ति । किं बाह्यः पुञ्जश्चेतनधर्मा उत आन्तरः । तत्र बाह्यः पुञ्जः शरीररूप आत्मा ज्ञानप्रयत्नाधारत्वात् । यन्नैवं तन्नैवम् । घटादिवदित्यनुमानेन शरीरत्वावच्छिन्नस्य बाह्यपुञ्जस्यात्मत्वसाधने । अनात्मा, तदनाधारत्वात् । मृतशरीरवदिति प्रत्यनुमानेन हेतोः सत्प्रतिपक्षत्वाच्छरीरादिकं जीवत्वेन विशेषणीयम् । जीवत्वं किमित्यपेक्षायमन्वयव्यतिरेकाभ्यां प्राणधारणप्रयत्नवत्त्वमेव जीवत्वेन मवधारणीयम् । तत्तद्धारकत्वं कस्येतिजिज्ञासायां शरीररूपो बाह्यः पुञ्जो न तद्धारकः । बाह्यत्वात् । मृतशरीरवदित्यनुमानेन बाह्यस्य तथात्वे निरस्ते, आन्तरस्य पुञ्जस्य तथात्वम् आन्तरत्वाद्वक्तव्यम् । तत आन्तरः पुञ्जो न तद्धारकः । आन्तरत्वात् । मृतपश्वान्तरपिण्डवदित्यनेन हेतोः साधारणत्वेऽवगते, देहात्मवादो दूषितो भवति । ततश्चक्षुरात्मा, प्राणधारकत्वात् । ज्ञानप्रयत्नाधारत्वाद्वा । यदेवं तदेवम् । श्रोत्रादिवदित्येवं प्रत्येकमिन्द्रियस्यात्मत्वसाधनेऽपि यत्र सकलगोलकहीनत्वं तादृशपिण्डेऽपि क्षुत्तृट्कार्यदर्शनात्तद्धारकत्वम् । अन्तःकरणे पर्यवस्यति, न तु समुदाये । गोलकनाशेन तन्नाशात्मापि त्वगिन्द्रियम् । अंशतस्तस्यापि नाशादिति ॥ तत्र पुनस्तेनानुमानेन तथात्वसाधनेऽपि तत् किमणु, विभु वेति शङ्कायां ज्ञानादिकं नाणुगुणः, प्रत्यक्षत्वात् । घटरूपादिवत् । यन्नैवं तन्नैवम् । पर-

माणुरूपादिवदित्यनुमानेन ज्ञानादेस्तथात्वे निश्चिते, ततो, नाडीमनःसंयोगः कर्मजन्यः । यावत्प्रतियोगिसत्त्वेऽपि कादाचित्कत्वात् । स्थाणुपुरुषसंयोगवत् । यन्नैवं तन्नैवम् । स्थाण्वाकाशसंयोगवत् । मनो मूर्त्तं, क्रियावत्त्वात् । वायुवदित्यादिना करणत्वेन सिद्धस्य मनसो ज्ञानाद्यनाधारत्वे सिद्धे, तेनानात्मत्वसिद्धिः । ततः प्राणोऽवशिष्यते । तस्यात्मभिन्नत्वसाधनं दुर्घटम् । प्राणसत्त्वं जीवत्वस्य तदसत्त्वे तदभावस्य च दर्शनात् । ज्ञानप्रयत्नाधारत्वस्य तत्रैव पर्यवसानात् । न च सुषुप्तौ ज्ञानाभावेन तस्मिन् ज्ञानाद्यनाधारत्वे निश्चिते प्राण आत्मभिन्नः । ज्ञानाद्यनाधारत्वात् । देहादिवदित्यनुमानेन आत्मभेदसिद्धिरिति शङ्क्यम् । श्वासोच्छ्वासदर्शनेन तदानीमपि तस्य प्रयत्नवत्तानिश्चयात् । ज्ञानाभावस्य मनःसंयोगाभावजन्यत्वेन ज्ञानाधारत्वयोग्यताविघटनाभावात् । अतो ज्ञानाद्याधारत्वेनात्मसाधने तदभावस्यादर्शनात् प्राणस्यैवात्मत्वेन सिद्धिर्न तु ततोऽव्यतिरिक्तस्यात्मनः । देहप्राणवियोगस्यैव मृत्युत्वेन जीवद्देहे तस्यावश्यकत्वात् । अतिरिक्तात्मनोऽनभ्युपगमेन पदार्थलाघवाच्च । तथा सत्यनुमानस्यार्थान्तरसाधकत्वेन हेत्वाभासत्वम् । यदि च योगिनां श्वासनिरोधेऽपि जीवनज्ञानादिदर्शनात् तदतिरिक्त एवात्मेति विभाव्यते, तदापि निरुद्धवृत्तिकप्राणतद्देहे सत्त्वान्न तदतिरिक्तात्मसिद्धिः । यदि च निरोधजनकस्य प्राणातिरिक्तत्वं विभाव्यते तदाऽपि चेतनाधर्मकस्यैव तस्य सिद्धिर्न तूपनिषद्विचारितचिद्रूपस्य सिद्धिः । एतेनाहंवित्तेरप्यप्रयोजकत्वमुक्तप्रायम् । तदनुक्तं—नौपनिषद्विचारितरूपस्य सिद्धिरिति ॥ सिद्धमाहुः ॥ तथा चेति ॥ अत एवेति ॥ शब्दप्रत्यक्षोपजीवकत्वादेव । एवं जीवस्वरूपस्य लौकिकप्रमाणगम्यत्वेन श्रुत्येकसमधिगम्यत्वं साधयित्वा ब्रह्मणस्तथात्वमाहुः ॥ तं त्वेत्यादि ॥ इदं हि बृहदारण्यके शाकल्यब्राह्मणेऽस्ति । अत्र पूर्वं, स एष नेति नेत्यात्मा अगृह्यो न हि गृह्यत इत्युक्तम् । तत्र यदि केवलमिन्द्रियग्राह्यत्वं विवक्ष्येत तदा औपनिषदपदमनतिप्रयोजनं स्यादत उपनिषदितरयावत्प्रमाणावेद्यत्वमास्थेयम् । अतः श्रुत्येकसमधिगम्यमित्यर्थः । तर्हि पूर्वकाण्डवेद्यत्वमपि न स्यादत आहुः ॥ सर्वे इत्यादि ॥ किं तेनेत्यत आहुः ॥ तदर्थ इत्यादि ॥ वेदव्यासमिति ॥ वेदविभागम् । तावता जीवस्वरूपस्य कथं श्रौतत्वासाधारण्यत आहुः ॥

तत्र चेत्यादि ॥ कश्चिद् ब्रह्मत्वेनेत्यादि ॥ अयमात्मा ब्रह्म सर्वानुभूः । सर्व एवात्मानो व्युच्चरन्ति । ज्ञाज्ञौ द्वावीशानीशौ । विज्ञानघन एवैतेभ्यो भूतेभ्यः । क्षरात्मानावीशते देव एकः । एषोऽणुरात्मा चेतसा वेदितव्यः । स वा एष महानज आत्मा योऽयं विज्ञानमय इत्यादिश्रुतिभिरित्यर्थः । भेदेन व्यपदेशः कुत्रेत्याकाङ्क्षायामाहुः ॥ श्रुतिश्चेत्यादि ॥ तथा चात्मान इति बहुत्वस्य व्युच्चरणभेदस्य च बोधनेन जीवानां परस्परं ब्रह्मणः सकाशाच्च भेदेन व्यपदेश इत्यर्थः । चरणभेदश्रुतिश्छान्दोग्यस्था ज्ञेया । नन्वभेदश्रुतेर्बलिष्ठत्वान्निरवयवत्वस्यैव बाधकत्वादुक्तसूत्रेऽप्यौपचारिकमेवाद्रियत इति न भवदुक्तरीत्या निर्णय इत्याशङ्कायां तद्व्याख्यानदोषं वक्तुं तदाहुः ॥ यत्त्वित्यादि ॥ ब्रह्मोपाधिकत्वमिति ॥ स्वार्थे कः ॥ इत्यादेरिति पञ्चमी । वस्तुतस्तु प्रथमान्त एव पाठः प्रतिभाति ॥ स्थितिरित्यात्मनः स्थितिः ॥ तत एवेति ॥ अलीकत्वादेव । नन्वेवं सति घटाकाशवदविद्यावच्छिन्नं चैतन्यमेव जीवोऽस्तु तथा सति अंशत्वमौपचारिकमेव भविष्यतीत्यत आहुः ॥ अंशत्वेत्यादि ॥

ननु, घटसंवृतमाकाशं लीयमाने घटे यथा * घटो लीयेत नाकाशस्तद्वज्जीवो नभोपम इति बिन्दूपनिषदि श्रावणादुपाध्यवच्छिन्नं ब्रह्मैव जीवः । व्युच्चरणश्रुतिस्तु बृहदारण्यके सुप्तं पुरुषमुपक्रम्य पठ्यते इति श्वासानां सुषुप्त्यनन्तरं व्युच्चरणं वादिष्यति । यदि च एष आकाशस्तस्मिन्छेत इति व्यवहितमाकाशशब्दवाच्यं ब्रह्मैव पूर्वमुक्तमिति तत एवोर्णनाभिदृष्टान्तेन व्युच्चरणमङ्गीक्रियते तदापि काण्वपाठ आत्मनामनुक्तत्वादेतदपि मनःपरतया कथञ्चिन्नेयम् । ब्रह्मणो निरवयवत्वस्यांशत्वबाधकस्योक्तत्वादित्याशङ्कायामाहुः ॥

इदमत्र ज्ञेयम् । ब्रह्मणो निरंशत्वं सांशत्वं वा न लोकसिद्धं, येन तदनुरोधेन किञ्चिद्वक्तुं शक्यम् । किन्तु वेदैकसमधिगम्यम् । एवं सति तथैव स निरूपयति, तथैव तदिति मन्तव्यम् । अत एव, नैषा तर्केण मतिरापनेया, अलौकिकास्तु ये भावा न तांस्तर्केण योजयेदित्यादिका श्रुतिर्लौकिकयुक्त्यैतद्बोधनं निषेधति । अन्यथा सर्वत्र लौकिकयुक्त्यनुसारिण्येवार्थे श्रुतेस्तात्पर्यवत्त्वेन, नैषा तर्के-

णेत्यादिश्रुतिर्व्यर्था विरुद्धार्था च स्यात् । लोकेऽपि यत्र वस्तुस्वभाव एव कार्यहेतुर्न तत्र युक्तिसंभावना । यथा अयस्कान्तसंनिधौ लोहपरिभ्रमणम् । नच तत्र मणिनिष्ठा देवताऽऽकर्षिकेति वाच्यम् । तस्या अपि लोहस्यैवाकर्षणे हेत्वपेक्षायां देवतास्वभावस्यैव तथात्वेन वक्तव्यत्वादावश्यकत्वाल्लाघवाच्च मणिस्वभावस्यैव तत्त्वेन वक्तुमुचितत्वात् । तथात्रापि श्रुतिबलाद् वस्त्वेव तादृशमिति मन्तव्यं, न युक्तिरपेक्षणीया । तथाच सैव, निष्कलं निष्क्रियमित्यादिना सांशत्वं निराकृत्य, यथाऽग्नेरित्यादिना जीवस्य ब्रह्मांशत्वमप्याह । व्यासोऽप्यत एवेममेवार्थं दृढीकर्तुं हेत्वन्तराण्याह । मन्त्रवर्णादिति, अपि च स्मर्यत इति च । मन्त्रवर्णश्च, पादोऽस्य विश्वा भूतानीति भूतानां जीवानां पादत्वेनांशत्वमेवाह । स्मृतिश्च, ममैवांशो जीवलोके जीवभूतः सनातन इति जीवस्य ब्रह्मांशत्वमेवाह । इत एवाभेदश्रुतिरुपपद्यते । न हि विस्फुलिङ्गो नाऽग्निः । एवं जीवो ब्रह्मांशत्वाद् ब्रह्मैव । तर्हि सार्वज्ञ्यानुपपत्तिः ? । न हि विस्फुलिङ्गो न दाहकः प्रकाशको वा । अल्पप्रकाशवदल्पज्ञत्वोपपत्तावपि, भ्रमस्तु नोपपद्यते जातु । नच देहसंबन्धकृतमनीशत्वादीति वाच्यम् । तस्यापि जीवभावोत्तरकालीनत्वात् । तस्मादीश्वराद्भिन्न एवानीशत्वादिविशिष्टो नित्यबद्ध एवेश्वरप्रसादजज्ञानतो मुक्तो भवतीति नांशो भवितुमर्हतीति । श्रुतिश्च प्रलयसमये भगवदुदरान्तःस्थानां जीवानां पुनः सर्गसमये ततो निर्गमनप्रकारमेवमाह विस्फुलिङ्गदृष्टान्तेन । नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतिरपि जीवादिसर्वपदार्थविषयकदर्शनादिमत्त्वं सर्वदाऽन्यस्मिन्निषेधति, न तु परिच्छिन्नदर्शनादिकमपि । यथा, पार्थ एव धनुर्द्धर इत्यत्र, न हि पार्थादन्यो न धनुर्द्धरः, किन्तु यथा स तथा नान्य इति, तथेहापीति चेद् बाढमेवमङ्गीकुर्मो यदि वेदार्थतात्पर्य-

तरंगैर्भगवतो बादरायणस्य सूत्रैः सप्रमाणनिदर्शनैः, अंशो नाना-व्यपदेशाद् इत्यादिभिस्त्वदुक्तं न विरुध्येत । नचैवम् । किञ्च, विस्फुलिङ्गदृष्टान्ते यद्यात्मनामेवोत्पत्तिं वदेत् तदा त्वदुक्तप्रकार उपपद्येतापि । न चैवम् । किन्तु सर्वेषां प्राणानां लोकानां देवानां भूतानामपि तथैव सृष्टिमुक्त्वा, सर्व एवात्मनो व्युच्चरन्तीत्यवदत् । नच त्वं प्राणादीनां नित्यत्वं तथा सृष्टिं वा मनुषे येन तत्प्रक्रम-पठितानामात्मनां तथात्वमवादीः । नचात्मनां निर्गमनप्रकारमवाह, प्राणादीनामेवोत्पत्तिमाहेत्यपि वक्तुं शक्यम् । वाक्यभेदप्रसङ्गाद्, विनिगमकाभावाच्च । यद्यपि यथाग्नेरिति श्रुत्यैव जीवस्यांशत्वं तदभावो वा न निश्चेतुं शक्यः । चिन्तामणिकल्पतरुकामधेन्वा-दिभ्यः इवापि ब्रह्मणः सकाशात् प्राणाद्युत्पत्तेः सम्भवात् । तथापि सूत्रैस्तदुपदर्शितश्रुतिस्मृतिभ्यश्चांशत्वमेवावगम्यते । नचैवं सार्वज्ञ्यानुपपत्त्यादिदूषणग्रासः । सर्वज्ञत्वादिधर्माणां भगवदिच्छ-यैव तिरोभूतत्वात् । यतः सूत्रकारोऽपीमामेवाशङ्कामपाकर्तुमेवमेव जगाद, पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययाविति । अस्य जीवस्यैश्वर्यादि तिरोहितं, तत्र हेतुः पराभिध्यानात्, परस्य भगवतोऽभिध्यानं स्वस्य जीवस्य च सर्वतो भोगेच्छा तस्मा-द्धेतोः ऐश्वर्यादिसद्भावे वैचित्र्याभावाद् भोगो न भविष्यतीति जीवे तिरोभावं कृतवान् स्वधर्माणाम् । तत एव तिरोभावाद् बं-धो भगवद्धर्मविपरीतधर्मवत्त्वं चेत्यर्थः । ऐश्वर्यतिरोभावादीनत्वं पराधीनत्वं च । वीर्यतिरोभावात् सर्वदुःखसहनम् । यशस्तिरो-भावात् सर्वहीनत्वम् । श्रीतिरोभावाज्जन्मादिसर्वापद्विषयत्वम् । ज्ञानतिरोभावाद्देहाद्यहम्बुद्धिः, सर्वविपरीतज्ञानमपस्मारसहितस्येव । वैराग्यतिरोभावाद् विषयासक्तिः । आनन्दांशस्तु पूर्वमेव तिरोहि-तो येन जीवभावः । अत एव ' नेतरोऽनुपपत्तेः । भेदव्यपदेशाच्च'

इत्यादिना जीवस्यानन्दमयत्वं न्यषेधत् सूत्रकारः ॥

इदमग्नेत्यादि ॥ योजयेदिति ॥ प्रसाधयेत् । एतद्बाधनं श्रुत्युक्तार्थबाधनम् । तथाच वैदिकयुक्त्या यदेव सिद्धं तदेव ग्राह्यमिति भावः ॥ अन्यथेति ॥ यदि लौकिकयुक्तिरप्यभिप्रेता श्रुतेः स्यात् । लौकिकयुक्तेः शिथिलत्वाय तस्या लोकेऽपि कुण्ठतां वक्तुमाहुः ॥ लोकेऽपीत्यादि ॥ भूतानां जीवानामिति ॥ अहिंसन् सर्वभूतानि, न हिंस्यात् सर्वा भूतानीत्यादिप्रयोगात् ॥ योगात् पादत्वेनेति ॥ पादो भागोंऽश इत्येषां पर्यायत्वदर्शनात् । तथाचैतद्विरोधादवच्छिन्नवादो नाङ्गीकर्त्तुं शक्यत इति न सा श्रुतिरन्यथा नेतुं शक्या । तेन नभोपम इति लयाभाव एव दृष्टान्तो, न त्वनंशत्वेऽपि । पूर्वमन्त्रे जलदृष्टान्ताच्चेत्यर्थः । न चैतावता प्रतिबिम्बवादे भ्रमितव्यमित्याशयेन आहुः ॥ अत एवेत्यादि ॥ अंशत्वेन तादात्म्यादेव ॥ अभेदश्रुतिः– उपद्रष्टानुमन्तैष आत्मा सिंहश्चिद्रूप इत्याद्या, उपपद्यते– भेदसहिष्णुरभेदस्तादात्म्यमिति तादात्म्यलक्षणादुपपद्यत इत्यर्थः । एवं पूर्वप्रश्नद्वयोत्तरत्वेन प्रकारः सम्बन्धश्चोक्तः । अत्र तादात्म्यमनङ्गीकुर्वतां तात्त्विकभेदवादिनां रामानुजमाध्वनैयायिकादीनां नानामतानि ॥

तत्र माध्वा हि– ज्ञोऽत एवेति सूत्रे, नित्यो नित्यानां, सर्व एवात्मानो व्युच्चरन्तीति श्रुत्योर्विरोधे, ज्ञः=जीवः, अत एव=परमेश्वरादेवोत्पद्यते । शब्दादेव ते वा एते चिदात्मानो अविनष्टाः परं ज्योतिर्निविशन्त्यविनष्टा एवोत्पद्यन्ते, न विनश्यन्ति कदाचनेति काषायणश्रुतिमुक्त्वा, उत्पद्यन्ते चिदात्मानो नित्यानित्याः परात्मनः * उपाध्यपेक्षया तेषामुत्पत्तिरिति गीयते इति व्योमसंहितास्मृतिमाहुः । ततस्तद्गुणसारत्वादिति सूत्रे जीवस्य ब्रह्माभेदमाशङ्क्य ब्रह्मगुणसारत्वाद् ब्रह्मव्यपदेशं वदन्तो यथा, सर्वं खल्विदं ब्रह्मेत्यत्र परमात्मनो जगद्व्यपदेशो गौण्या तथा जीवे ब्रह्मव्यपदेशोऽपीत्युक्त्वा अभेदवादिना गौण्या अमुख्यत्वे दर्शिते सार्वज्ञादिगुणवता ब्रह्मणा सहाभेदोऽज्ञानादिमतो न युक्त इत्यनुपपत्त्या गौणीमाद्रियन्ते । यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतमेति कठवल्लीश्रुतौ जीवस्य ब्रह्मणि प्रवेशे सत्यऽभेदप्रतीतिविषयत्वमप्रबोधनात् । न ह्युदकयोस्तदानीं वा अभेदः । गुरुत्वा-

धिकरण्याभावप्रसङ्गात् । अतो गौण एवाभेद इति तत्त्वमसीत्यत्राकारप्रश्लेष इति चाहुः । एवञ्च तन्मते अंशा द्विधा—
अभिन्नाः करचरणादिवद्, भिन्नाः पुत्रादिवत् । तत्राद्या मत्स्याद्यवताराः । द्वितीया जीवा इति । वनमालिदासस्तु— तद्भिन्नत्वे सति तत्सादृश्यमंशत्वम् । यथा चन्द्रमण्डलाच्छिन्नांशो गुरुमण्डल इति भिन्नांशस्वरूपमाह । तेन शब्दैकदेशबोधकं वा सादृश्याल्पत्वबोधनार्थत्वादौपचारिकं वांशपदमिति फलति । व्युच्चरन्तीति पदोक्तोत्पत्तिरप्युपचारादिति तूक्तमेवेति ॥

रामानुजाचार्यास्तु— नात्मा श्रुतेरित्यस्मिन् सूत्रे यत प्रसूता जगतः प्रसूती तोयेन जीवान्व्यससर्ज भूम्यां, प्रजापतिः प्रजा असृजत, यतो वा इमानि भूतानि जायन्ते इत्यादिषु सचेतनस्य जगत उत्पत्तिश्रावणाज्जीवोऽप्युत्पद्यत इति पूर्वपक्षे, आत्मा जीवो नोत्पद्यते । न जायते म्रियते वा विपश्चित्, ज्ञाज्ञौ द्वावजावित्यादिषु तन्निषेधश्रुतेर्नोत्पद्यते । नित्यो नित्यानामित्यादिभिर्नित्यत्वं च तस्य ततोऽपीति व्याख्याय एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्त्यर्थं भोग्यभोक्तृनियन्तृणां विविक्तस्वभावत्वेऽपि भोग्यस्य स्वरूपान्यथाभावरूपो विकारो भोक्तुस्तु धर्मात्मज्ञानसंकोचविकाशरूपः । भोग्यभोक्तारौ नियन्तुः शरीरतया विशेषणत्वेन सिद्धौ सौबालादिवाक्येष्वतः सर्वदा आत्माधारमेव ब्रह्म तत्कदाचित् स्वस्याविभक्तव्यपदेशानर्हातिसूक्ष्मदशापन्नाचिदचिद्वस्तुशरीरं तिष्ठति तदा कारणावस्थं, यदा च विभक्तनामरूपचिदचिद्वस्तुशरीरं तिष्ठति तदा कार्यावस्थम् । तत्राचिदंशस्य कारणावस्थायां शब्दादिविहितत्वेऽपि यथा भोग्यत्वाय कार्यावस्था तदा शब्दादिमत्तया स्वरूपादन्यथाभावः । चिदंशस्य स्वकर्मविपाकफलभोक्तृत्वाय तदनुरूपज्ञानविकासरूपो धर्मान्यथाभावः । उभयप्रकारविशिष्टे नियन्त्रंशे तु तत्तदवस्थतत्तद्विशिष्टतारूपोऽन्यथाभावो भवतीत्यङ्गीकृत्यावस्थान्तरापत्तिरूपविकारस्य प्रकारद्वये प्रकारिणि च कारणावस्थायां विभक्तव्यपदेशानर्हत्वेनैकरूपत्वादेकविज्ञानेन सर्वविज्ञानप्रतिज्ञां मृदादिदृष्टान्तं चोपपादयन्ति । जीवस्य ज्ञानविकाशसंकोचहेतुभूतदेहसंयोगवियोगाभ्यामुत्पत्तिमरणबोधकश्रुतिमचिदंशवज्जीवस्य स्वरूपान्यथाभावाभावेन जीवे तन्निषेधादिश्रुतिं ब्रह्मणि उभयविधाऽनिष्टविकाराऽभावात् । स वा एष महानज

आत्माऽजरोऽमरोऽमृतोऽब्रह्मनित्योनित्यानामित्यादिपरविषयश्रुतिं प्राक् सृष्टेर्नामरूपविभागाभावदेकत्वावधारणश्रुतिं सृष्ट्यनन्तरं तद्विभागाज्ञानात्वं चोपपाद्य अनाद्यविद्योपाधिकजीवत्ववादिमते ब्रह्मणस्त्वयं मोहः । पारमार्थिकोपाधिकजीवत्ववादिमते ब्रह्मरूपस्यैव बन्धः । सन्मात्रं ब्रह्मैव सर्वाकारेण परिणमतीति वादिमते नियन्त्रंशस्य भोक्तृत्वाभावेऽपि तस्य सर्वज्ञत्वाल्लोकारं स्वस्मादभिन्नमनुसंदधातीति तेन रूपेणैव तस्यैवेष्टानिष्टफलभोग इति दोषानुक्त्वा अस्माकं त्वपुरुषार्था अन्यथाभावाश्च शरीरगता एव, न तु ब्रह्मणीति ब्रह्म सर्वदा निरस्तनिखलदोषमपरिमितोदारगुणमेवेति स्वमतगुणमाहुः प्रकाशादिवन्नैवं पर इति सूत्रे च वस्त्वेकदेशत्वमंशित्वमुक्त्वा विशेषणांशो विशेष्यांश इति विवेचकानां व्यवहारात् शरीरभूतजीवस्य शरीरभूतब्रह्मांशत्वमङ्गीचक्रुः । व्युच्चरणश्रुतिं तु नोदाजह्रुः ॥

शैवस्तु–विशिष्टाद्वैतवादमेवाङ्गीकृत्य, मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् * तस्यावयवभूतेन व्याप्तं सर्वमिदं जगदिति श्वेताश्वतरश्रुतिम्, आत्मा तस्याष्टमी मूर्तिरिति स्मृतिं चोदाहृत्य ब्रह्मावयवेन विशिष्टांशत्वं जीवस्याह । व्युच्चरणश्रुतेर्नामरूपसन्मुन्मेषमर्थं चाह ॥

भास्कराचार्यास्तु–वियदादिसृष्टिप्रकरणे जीवस्योत्पत्तेरनुक्तत्वाज्जीवापेतं वेदं म्रियते, न जीवो म्रियते, अजो नित्यः शाश्वतोऽयं पुराणः, अविनाशी वा अरेऽयमात्मेत्यादीनां भूयसीनां श्रुतीनामन्यथा कर्तुमशक्यत्वाच्चोपाधिकृतभेदाभिप्रायेण विस्फुलिङ्गश्रुतिर्विपरिणेया । सुषुप्तिप्रकरणत्वेन सृष्ट्यभिप्रायाभावाच्चेत्यङ्गीकृत्य जीवस्याणुत्वं संसारदशायां लिङ्गशरीराभिप्रायेण । मनसो लिङ्गस्याऽणुत्वाद् वस्तुतो व्यापक इति चाऽङ्गीकृत्य जीवस्य अंशत्वमुपाध्यवच्छिन्नत्वेनाङ्गीकृतवन्तः । तथाच ब्रह्मणो निरवयवत्वेऽपि यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा इति श्रुतौ दृष्टान्तप्रणयनेन यथाकाशस्य पार्थिवाधिष्ठानावच्छिन्नं कर्णच्छिद्रं, यथाच वयः पञ्चवृत्तिः प्राणा, यथा च मनसः कामादयो वृत्तयस्तथाऽयमपि पराद्भिन्नस्वरूपः । तस्याऽभिन्नरूपं स्वाभाविकं भिन्नरूपमौपाधिकम् । भिन्नाभिन्नस्वरूपे च, सोऽन्वेष्टव्यः सविजिज्ञासितव्य इति भेदव्यपदेशो ब्रह्मेमे दाशा ब्रह्मेमे कितवा इत्यभेदव्यपदेशश्च मानमित्याहुः ॥

विज्ञानेन्द्रभिक्षुस्तु–जीवानां नित्यभिन्नत्वं चाङ्गीकृत्य अविभागलक्षणभेदं चाङ्गीकृत्य सजातीयत्वे सति अविभागप्रतियोगित्वमंशत्वं, तदनुयोगित्वं चांशित्वम् । येन च रूपेण यत्रांशता विवक्ष्यते तेनैव रूपेण तत्र साजात्यं ग्राह्यम् । यथा आत्मांशलक्षणे आत्मत्वेन सदंशोऽसत्त्वादिरूपेणेत्यतो नातिप्रसङ्गः । यद्वा । द्रव्यत्वसाक्षाद्व्याप्यजात्या साजात्यं ग्राह्यम् । विभागश्च लक्षणान्यत्वम् । अभिव्यक्तिधर्मभेद इति यावत् । अथवा । संयोगविशेष एवाविभागः स्वरूपसंबन्धविशेषो वा । आधेयत्वादिवत् । जलस्य दुग्धे लवणस्य समुद्रे अविभागव्यवहारस्यापलपितुमशक्यत्वात् । न तु द्वितीयमस्ति ततोऽन्यद्विभक्तमिति, सति संपद्य न विदुः सति संपद्यामह इत्यादिश्रुत्या, प्रकृतिः पुरुषश्चोभौ लीयेते परमात्मनीत्यादिस्मृत्या च जीवस्यापि ब्रह्मण्यविभागकथनात् । लीङ् श्लेषणे, पद गतावित्याद्यनुशासनेभ्यश्च लयसंपत्त्यव्ययादिशब्दानामविभागार्थकत्वात् । एवं सति यथा शरीरस्य केशादिरंशो राशेश्चैकदेशः, पितुश्च पुत्र इति दृष्टान्तत्रयम् उक्त्वा सर्वे च जीवाः पितरि पुत्रचेतना इति चिन्मात्रे ब्रह्मणि नित्यसर्वावभासकेविषयभासनरूपं स्वरूपलक्षणं विहाय प्रलये लक्षणानन्यत्वं गच्छन्ति । सर्गकाले च तदिच्छया तत एव लब्धचैतन्यफलोपधाना आविर्भवन्ति पितुरिव पुत्राः । अतो जीवाः ब्रह्मांशा भवन्ति । आत्मा वै जायते पुत्र इति श्रुत्या पुत्रे पितुरविभागलक्षणाभेदवज्जीवे ब्रह्मणोऽविभागलक्षणाभेदस्य, बहु स्यां प्रजायेयेत्यादिश्रुत्या सिद्धेरिति । अतो जीवा ब्रह्मांशा मुख्या एव भवन्तीति समन्वयसूत्रे साधयित्वा वियदादिपादं व्युत्पादयामास । तत्र वास्तवभेदवादिनः प्रत्यवतिष्ठन्ते ॥ तर्हीत्यादि ॥ यदि सर्वज्ञेन ब्रह्मणा सह जीवस्याभेदः करादिवत्तदा असार्वज्ञ्यानुपपत्तिः । यदि भिन्नाभिन्नभास्करमतरीत्या तदा दूषणान्तरमाहुः ॥ अल्पेत्यादि ॥ श्रुतिश्च मुण्डकबृहदारण्यकस्था प्रभवत्युच्चरणश्रुतिः । श्रुत्यन्तरविरोधं परिहर्तुं ॥ नान्योऽत इत्यादि ॥ इति चेदिति ॥ इति हेतोर्भिन्नांशत्वं वा अंशत्वोपचार एवेति चेदित्यर्थः । तत्रोत्तरं वदन्तस्तेषामपि व्यासाभिमतविरुद्धार्थवादित्वं बोधयन्ति ॥ बाढमित्यादि ॥ नचैवमिति ॥ तथाच यद्येवमभिप्रेयात् तदांशपदं भिन्नपदेन विशिष्यादन्यथेत्यादि च न वदेत् । तत्स्वतत्स्वा-

दिति वा वदेत् । सूत्रोपदर्शितायां श्रुतौ चावयवत्वबाधकः पाद-शब्दो न स्यात्। स्मृतौ च, मे मतिपदं राश्यभिमानबोधकतामानं भ-जवति जीवतुल्यतामापादयेत् एवं नेत्यर्थः । इति श्रुतिविरोधं दर्शय-न्ति ॥ किञ्चेत्यादि ॥ विनिगमकाभावादिति ॥ त्यक्ते प्रायपाठे तथा-त्वाद्वैपरीत्यमपि सुवचमितितथेत्यर्थ ।पूर्वोक्तं दृढीकर्तुं श्रुतेः साधरा-णत्वमाशङ्क्य पूर्वोक्तोपगमे बीजमाहुः ॥ यद्यपीत्यादि ॥ आदिश्य इत्यादिपदेन योगिनः संगृह्यन्ते ॥ तर्हि कथं पूर्वोक्तदूषणोद्धार इत्य-त आहुः ॥ नचेत्यादि ॥ एवमेव जगादेति ॥ भगवदिच्छामेव हेतुत्वेन जगादेत्यर्थः ॥ जीवस्य सर्वतो भोगेच्छेति ॥ जीवं सर्वप्रकारेण भोक्तुमिच्छा ।दीनत्वमिति ॥ अनीशत्वम् । एवमत्राज्ञत्वादीनामाग-न्तुकत्वकथनेन तात्त्विकभेदो वारितः ॥

जीवभावादेरागन्तुकत्वं व्युत्पादयितुं चोदयति ॥

ननु कारणसाम्ये कथमेकेषां जडत्वमेकेषां चेतनत्वं, जीवे ब्रह्मत्वेऽपि तिरोहितत्वेन अल्पज्ञत्वमपि कथमिति चेद्, अत्राहुरा-चार्याः। सच्चिदानन्दरूपे ब्रह्मण्यस्त्यंशत्रयं, स्वरूपभूतं ' सत्यं वि-ज्ञानमानन्दं ब्रह्म ' इति श्रुतेः । यः सर्वज्ञ इति श्रुतेर्धर्मरूपमपि ज्ञानमस्तीति मन्तव्यं, भगवानिति नामव्युत्पत्त्या च। तत्र स्वरूपा-त्मकेन सदंशेन जडोद्गमः पूर्वमुक्तः । पश्चाच्चिदंशात् तादृशादेव जीवानां तद्रूपाणामेवोद्गम उक्तः। अतो जडेषु सन्मात्रकार्यत्वाच्चि-त्तिरोभावः । जीवे च चित्कार्यत्वेन चिद्रूपत्वात् सत्त्वेन चोपल-भ्यमानत्वादानंदांशतिरोभाव एव । एतयोः सच्चितोरपि तिरोभावे स्वरूपहानिरेव स्यात् । तिरोहितं तु धर्मरूपं भगशब्दवाच्यं ज्ञान-मतः सर्वमनवद्यम् । अत्र नियामिका भगवदिच्छैवेति ज्ञेयम् । एत-योर्भेदाभेदविचारमग्रे वक्ष्यामः । ननु ब्रह्मरूपाणामेव जीवानां सहजगुणाँस्तिरोहितान् विधाय मिथ्याज्ञानादिदोषयुक्तत्वकरणे तूपस्थितहानिरकृताभ्यागमश्च प्रसज्येतेति चेन्न । एतयोर्जीवकृ-तत्वेन जीवे च दूषणत्वात् । तत्रापि लोकेऽप्यस्वतन्त्रजीवकृतत्वेन

दृश्यते हि लोकेऽपि राज्ञां स्वतन्त्राणां स्वविहारार्थं प्राचीनविचित्रभवनप्राकारगोपुरादिभङ्गकरणेन तत्रैवाजिरोद्यानादिकरणम् । निजसेवकेष्वपि कदाचित् स्थितस्याप्यैश्वर्यादेर्हरणम्, पुनर्दानं च सेवया संतोषे । किं पुनः सकललोकनियामकस्य सकलजगत्कारणकारणस्य भगवतः स्वदासजीवस्यान्यथाकरणे शङ्का नाम । किञ्चैवं सर्गस्थितिसंहारेष्वपि भगवत एव कर्तृत्वात् स्थितं संहृत्य पुनस्तथाकरणेऽपीमौ दोषौ प्रसज्येयाताम् । तथा सति जगतो नित्यत्वप्रसङ्गोऽसंभव एव वा स्यात् । यतो भगवान् स्वयमेव, ये चैव सात्त्विका भावा राजसास्तामसाश्च ये * मत्त एवेति तान् विद्धि न त्वहं तेषु ते मयि * त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् * मोहितं नाभिजानाति मामेभ्यः परमव्ययमिति मायामोहेन स्वाज्ञानमुक्त्वा स्वेच्छयैव च माया मोहयतीति निरूपणार्थं स्वाधीनत्वं मायायाः, दैवी ह्येषा गुणमयी मम मायेति निरूपितवानतोऽपि भगवदिच्छाधीनतैव बन्धस्यापि । एवं सति यस्मिञ्जीवे यादृशीच्छा तदनुरूपा एवाविद्यादिशक्तयः सत्त्वादिभेदेन तं व्याप्नुवन्तीति महदैश्वर्यं भगवतः । अत एव, महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः * भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययमिति भगवतोक्तम् । भवन्ति भावा भूतानां मत्त एव पृथग्विधाः, मत्तः स्मृतिर्ज्ञानमपोहनं चेत्यपि । अपरं च, स्वयौक्तिकेऽर्थे त्विदं दूषणमुद्भाव्यं स्याद्, येन तथैव कल्प्येत । न तु श्रुतिसिद्धे । राजाज्ञायाः पर्यनुयोगानर्हत्वात् । एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति, एष उ एवासाधु कर्म कारयति तं यमधो निनीषतीति श्रुतिरपीममर्थमाह, यमवोचाम । य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति इति च । अत एव नान्योऽतोऽस्ति द्रष्टेत्यादिरपि सङ्गच्छते । अन्यस्य स्वतन्त्रकर्तृत्वाभावात् । अत

एवं सूत्रकारोऽपि जीवस्य कर्तृत्वं निरूप्य तत्स्वतन्त्रं नेश्वराद्
वेत्याशङ्क्य, परात्तु तच्छ्रुतेरिति सिद्धान्तमुक्तवान् । अतोऽकृता-
भ्यागमो जीवे न दोषाय, सर्वथा परतन्त्रत्वात् ॥

नन्वित्यादि ॥ अत्र प्राचां मतं प्रदर्श्य समादधते ॥ अत्राहुरि-
त्यादि ॥ आचार्या इति ॥ प्राञ्च आचार्याः ॥ पूर्वमुक्त इति ॥ यथाऽग्नेः
क्षुद्रा इत्यत्र प्राणादिव्युच्चरणकथनेनोक्त इत्यर्थः । इदं यथा तथा द्वितीय-
स्कन्धसुबोधिन्यां सृष्टिप्रक्रियाकथने व्युत्पादितम् । इदं च, अव-
स्थितेरिति काशकृत्स्न इति सूत्रात् सिद्ध्यति ॥ एतयोरित्यादि ॥
जीवजडयोर्भेदाभेदविचारम् । तौ ब्रह्मणो भिन्नाभिन्नाविति विचारम्
अग्रे वक्ष्यामः = लीलानित्यतावादे समाप्ते वक्ष्यामः । एवमंशत्वेन
तादात्म्यमङ्गीकृत्यैव, पराभिध्यानसूत्रव्याख्याने स एव प्रत्यवतिष्ठ-
ते ॥ नन्वित्यादि ॥ उपस्थितहानिरत्र नित्यसिद्धधर्मस्य निवृत्तिर्न तु
कृतनाशः । अकृताभ्यागमोऽकृतकर्मसम्बन्धिफलावाप्तिः । एतदुभयं
भगवदिच्छया जीवे आपद्यमानं तत्प्रयोजके ब्रह्मणि दूषणत्वेन प्रस-
ज्यत इत्यर्थः । एवमाशङ्किते दूषणविषयं निर्द्धारयन्तः समादधते ॥
नेत्यादि ॥ अयमर्थः । किमेतयोः कृतिविषयदूषकत्वेन दूषणत्वमुत
कृतिदूषकत्वेनाथवा कर्तृदूषकत्वेनेति । तत्र नाद्यः । चौरादिलु-
ण्ठितसज्जनादावपि दुष्टत्वापत्तेः । द्वितीयतृतीयौ चेत्तदापि तयोर्ब्र-
ह्मणि दूषणत्वमित्याहुः ॥ एतयोरित्यादि ॥ तत्रापीति ॥ जीवदूषक-
त्वेऽपि ॥ लोकेऽपीत्यपिशब्दाद्वेदे । किमत्र मानमित्याकाङ्क्षायां पूर्वलो-
कप्रसिद्धेस्तथात्वमाहुः ॥ दृश्यत इत्यादि ॥ द्विहेतौ एतयोर्भङ्गकरण-
योर्जडविषयत्वेन दृष्टान्तवैषम्यादंशकृताभ्यागमाभावाच्च द्वितीय-
माहुः ॥ निजेत्यादि ॥ सेवयेति ॥ कृतप्राप्त्यनपेक्षसेवया । दार्ष्टान्ति-
के योजयितुं कैमुतिकेनाहुः ॥ किमित्यादि ॥ सकलजगत्कारणकार-
णस्येति ॥ सकलजगत्कारणं प्रकृतिपुरुषौ ब्रह्मविष्णुमहेश्वरा वा,
अव्याकृतं वा । तयोस्तेषां तस्य च कारणस्य । वेदे तथात्वमाहुः ॥
किञ्चेत्यादि ॥ तथा सतीति ॥ तत्क्रिया कर्तृत्वेऽनादृते सति । तथा-
चाद्ये मीमांसकमतापत्तिर्द्वितीये प्रत्यक्षविरोध इति तथा वक्तुमश-
क्यत्वात् तयोर्न भगवत्कृतौ भगवति च न दूषणत्वमित्यर्थः । एवं
विचार्यस्य भगवदिच्छाधीनत्वं व्युत्पाद्य ग्रन्थस्याप्याहुः ॥ यत इ-

त्यादि ॥ अतोऽपीत्यपिना, श्रिया पुष्टेत्यादिनोक्तं समाधानं स्मारितम् । सिद्धमाहुः ॥ एवं सतीत्यादि ॥ भगवत इति ॥ भगवत्सम्बन्धस्यैव, न त्वविद्यासंसर्गकृतमित्यर्थः । उक्तार्थोपष्टम्भाय भगवद्वाक्यसंमतिमाहुः ॥ अत एवेत्यादि ॥ अविद्यायास्तदधीनत्वात् । उपस्थितिहान्यादेरत्रादूषणाच्च यथायथं भगवतो वाक्यासंमतिमाहुः ॥ अत एवेत्यादि ॥ अविद्यायास्तदधीनत्वादुपस्थितहान्यादेरत्रादूषणत्वाच्च यथायथं भगवतो वाक्यान्युक्तानीत्यर्थः । नन्वभेदपक्षादूषणस्यादूषणत्वं कल्पनीयम् । भेदपक्षे तु जीवकर्माधीनं तदिति न तत्संसर्ग इति स एव युक्त इत्यतः कल्पनाभावमाहुः ॥ अपरञ्चेत्यादि । पर्यनुयोगानर्हत्वादिति ॥ परिवर्जने । अनुयोगः प्रश्नः । वर्जनार्थकः प्रश्नः पर्यनुयोग, आक्षेप इति यावत् । तदयोग्यत्वादित्यर्थः । श्रुतिसिद्धत्वं दर्शयन्ति ॥ एष हीत्यादि ॥ यमिति ॥ सर्वस्य भगवदिच्छाधीनतया तयोरदूषणत्वरूपम् ॥ इति च- इयमपि श्रुतिर्नियमनेन भगवत एव जीवप्रेरकत्वं बोधयन्ती मदुक्तमुपोद्बलयतीत्यर्थः ॥ अत एव = जीवस्यानीशत्वात् सर्वज्ञत्वादीनामीश्वराधीनत्वादेव । उक्तदार्ढ्याय सूत्रकारसंमतिमाहुः ॥ अत एव सूत्रेत्यादि ॥ निरूप्येति ॥ कर्त्ता शास्त्रार्थवत्त्वादित्यधिकरणे निरूप्य ॥ न दोषायेति ॥ सन्नपि श्रुतिसिद्धत्वात् सिद्धान्तिनां दोषाय नेत्यर्थः । तथाचैवमुपपत्तौ मतान्तरीयरीत्या अंशत्वकल्पनं श्रुतिसूत्रादिदूपचारकल्पनम् । अद्वैतश्रुतीनामभेदभावनापरत्वकल्पनं च न युक्तमित्यर्थः ॥

अत्र पूर्वमीमांसकमतं दूषणायोपक्षिपन्ति ।

ये त्विमां शङ्कां परिहर्तुं पूर्वं जीवकृतधर्माधर्मसापेक्ष एवेश्वरः कारयति । अन्यथा, स्वर्गकामो यजेत, ब्राह्मणो न हन्तव्य इत्यादिविधिप्रतिषेधानर्थक्यं स्यात् । ईश्वरस्यैव प्रवर्तकस्य निवर्तकस्य च सत्त्वात् । अतो विधिनिषेधाभ्यामेव प्रवर्तमानं निवर्तमानं चेश्वरः प्रवर्तयति निवर्तयति च । कस्य चिद्विहिते प्रवृत्तिः कस्य चिन्न, कस्य चिन्निषिद्धान्निवृत्तिः कस्य चिन्नेत्यत्रापि पूर्वरूपनाइकर्मैव निमित्तम् । प्रवाहस्यानादित्वात् । अतो नाकृता-

भ्यागमो जीवे इति वदन्ति । तेषामनीश्वरत्वाद एवापद्यते । न च कर्मणो जडत्वेन फलसमर्पकत्वासम्भवात तत्समर्पकत्वेनेश्वरसिद्धिः । अन्यथाऽनुपपत्त्या कल्प्यमानस्य तादृशस्यैव कर्मणः कल्पयितुं शक्यत्वात । ननु कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्य इति तत्त्वसूत्रात तथोच्यत इति चेन्न । तदर्थानवबोधात । तथाहि । पूर्वोक्तन्यायेन, परात्तु तच्छ्रुतेरिति पूर्वसूत्रेणश्वरादेव कर्तृत्वे निरूपिते प्रवर्तकत्वेन निवर्तकत्वेन चाभिमतविधिनिषेधवैयर्थ्यमापतितम् । तत्र न हीश्वरः साक्षात कञ्चन प्रवर्तयति निवर्तयति वा । अतस्तद्द्वारैव तथा करोतीति तु समाधानं न सङ्गच्छते । सर्वस्यैव सन्मार्गवर्तित्वापातात् । तथाच विधिनिषेधसत्त्वेऽप्यप्रवृत्त्यनिवृत्त्योः सत्त्वेन तदुपपत्त्यर्थं पूर्वकर्मकल्पनं त्वनुपपन्नम् । प्रवाहस्यानादित्वेन पूर्वपूर्वकर्मणैव प्रवृत्तिनिवृत्त्युपपत्तौ विधिनिषेधवैयर्थ्यापातात । एवञ्च सति प्रामाणिकत्वाभावेनान्धपरम्परापत्तिर्यागादिकरणस्य धर्मत्वहानिश्च । फलोद्देशाभावेन च तज्जनकत्वनिर्वाहकापूर्वकल्पने प्रयोजनाभावेनैतस्य च कर्मणो नष्टत्वेनाग्रिमकर्मप्रवृत्तिनिमित्तमपि निरूपयितुमशक्यम् । एतत्समाधानाय प्रवर्तकत्वं विध्यादेरेव, ततो जानतामप्यप्रवृत्तिनिवृत्ती तु विचित्रेश्वरेच्छयेतिवाच्यम् । एवमपि सत्यावश्यकत्वाल्लाघवाच्चेश्वरेच्छैव तथाऽस्तु, कृतं ताभ्याम् । एवञ्चान्धपरम्परापि न सम्भवति । ईश्वरेच्छाजन्यत्वात । दृश्यतेऽपि हि विधिमजानतोऽपि बालस्य नैसर्गिकी धर्मप्रवृत्तिः । एवमपि सति न निस्तारः । तथाहि । न हीश्वरः स्वतन्त्रपुरुषार्थत्वेन कर्म कारयिष्यति, किन्तु स्वर्गादिसाधयितुम् । तथा सति स्वस्यैव तद्दाने समर्थत्वाद् विहितनिषिद्धफलोपपत्तौ विहितनिषिद्धयोर्यागब्राह्मणहननयोर्वैयर्थ्यापत्तिः । नचाकृताभ्यागमदोषपरिहाराय तथा करोतीति वाच्यम् ।

स्वतो जीवस्य कर्तृत्वे हि तत्फलनिरूपणे स दोषो न स्यात् । न तु तादृशं फलं दातुं तादृक्कर्मकारणे । स्वतः सर्वथैवासमर्थत्वाज्जीवस्य कृतमप्यकृतप्रायमिति न तत्परिहार इतीश्वराधीनं जीवकर्तृत्वं नोपपद्यते इति चेत्तत्राह– कृतप्रयत्नापेक्षस्त्वित्यादि । एतदर्थस्तु, एकोऽहं बहु स्यामिति प्रपञ्चे रमणेच्छया हि भगवान् क्रीडार्थं कृतप्रयत्नः । तदापि क्रीडैव मुख्या, अन्यत् सर्वमुपसर्जनीभूतम् । तथाच तदपेक्षो भगवान् विचित्ररसानुभवार्थम्, एवं यः करिष्यति तमेवं करिष्यामीति स्वयमेव मर्यादां चकार । स्वकृतसेतुपरीप्सयेति । धर्मसेतूनां वक्ता कर्ताऽभिरक्षितेत्यादिवाक्यश्रवणादेवमवसीयते । ततश्च स्वकृततद्रक्षणाय ज्ञापनाय च वेदं चकार । तथाच जीवोत्पादनसमये एवैनं जीवमस्मिन् देशेऽस्मिन् काले एतत्प्रयुक्तप्रवृत्तिनिवृत्तिमन्तं विधाय एतदेतत्फलं दास्यामीति, आमोक्षं प्रतिजीवं विचारितवानिति । तदनुसारेणैव ते तथा भवन्तीत्येवम्प्रकारेण कृतो यः क्रीडार्थं प्रयत्न उद्यमो जीवादिवैचित्र्यादिकरणे तदपेक्षस्तदधीन एव कारयति भगवान् । कुत एतत् ? । यतो यागादेर्विहितस्य, प्रतिषिद्धस्य विप्रहननादेः स्वर्गनरकसाधकत्वेनावैयर्थ्यमेवमेव भवेत् । अन्यथेश्वरस्यैव कारयितृत्वे फलदातृत्वेचोक्तन्यायेन तद्वैयर्थ्यं स्यात् । आदिपदाद् विनापि कर्म तत्फलदानमपि नात एव । अतः श्रुतिरपि कर्मकारणे फलदानेच्छामेव हेतुत्वेनानुवदति, यमुन्निनीषत्यधोनिनीषतीति ॥

आचार्यास्तु, यथा पुत्रं यतमानं बालं वा पदार्थगुणदोषौ वर्णयन्नपि यत्प्रयत्नाभिनिवेशं पश्यति तथैव कारयति । फलदानार्थं श्रुतौ कर्मापेक्षाकथनात् फलदाने कर्मापेक्षः, कर्मकारणे जीवकृतप्रयत्नापेक्षः, प्रयत्ने तत्कर्मापेक्षः, स्वर्गादिकामे च लोकप्रवाहापेक्षः कारयतीति न ब्रह्मणो दोषगन्धोऽपि । नचैवमनीश्वरत्वम् । मर्यादा-

मार्गस्य तथैव निर्माणात् । यत्र त्वन्यथा तत्र पुष्टिमार्गाङ्गीकार इत्याहुः ॥ अयमपि पक्षः स्वकृतमर्यादाया एव हेतुत्वेन कथनान्मर्यादाकरणे च क्रीडेच्छाम् ऋते हेत्वन्तरस्यासम्भवादस्मदुक्तान्नातिरिच्यते । तस्मादस्मदुक्त एव मार्गो, न त्वदुक्तः । किञ्च, क्रियापूर्वकालीनात्मधर्मस्यैव प्रयत्नशब्दार्थत्वेन वक्तुमुचितत्वान्न धर्माधर्मौ तद्वाच्यौ । किञ्च, त्वदुक्तप्रकारे 'विधिनिषेधावैयर्थ्यादिभ्य' इत्येव स्यान्न तु विहितेत्यादीति दिक् ॥

ये त्वित्यादि ॥ प्रवर्तयतीत्यादि ॥ विध्यादिसहकारीभवतीत्यर्थः ॥ तादृक्कर्मेति ॥ स्वदृष्टदुरदृष्टजनकं कर्म ॥ अतो नेति ॥ तादृशप्रवृत्त्यऽप्रवृत्त्यादीनां कृतफलरूपत्वात् । तथाच स दोषः स्वरूपत एव नास्तीत्यर्थः । तद् दूषयन्ति ॥ तेषामित्यादि ॥ विध्यादिसापेक्षमीश्वरमङ्गीकृत्य अकृताभ्यागममनुपगच्छतां कर्मसापेक्षेश्वरकल्पनापेक्षया ईश्वरानपेक्षकर्मकल्पनस्य लघुत्वात्तथेत्यर्थः । नन्वजागलस्तनवदीश्वरो नास्माभिरिष्यते, किन्तु कर्मोपजीव्योऽङ्गीक्रियत इत्यत आहुः ॥ नचेत्यादि ॥ तथाचैवमपि गौरवतादवस्थ्यात् कल्पना अप्रयोजिकेत्यर्थः । अत्रैकदेशिन ईश्वरे जीवं प्रति सापेक्षतामनुमन्यमानाः पूर्वोक्तस्य काल्पनिकत्वं निरस्यन्ति ॥ नन्वित्यादि ॥ तथाच मीमांसकोक्तः परिहारो नाऽप्रामाणिक इति न तत्र दोष इत्यर्थं निरसितुं प्रमाणस्य तं प्रत्याभ्यासत्वबोधनाय तदर्थं वदिष्यन्तस्तदुक्तं निषेधन्ति ॥ नेत्यादि ॥ पूर्वोक्तन्यायेनेति ॥ दृश्यते हीत्यादिना श्रुत्यादिप्रमाणोपन्यासपूर्वकमुपपादितेन भगवतः स्वतन्त्रकर्तृत्वरूपेण । एतस्य निरूपित इत्यनेन संबन्धः ॥ कल्पनं त्वित्यत्र तुरप्यर्थे । कल्पनस्यानुपपन्नत्वे हेतुचतुष्टयमाहुः ॥ प्रवाहस्येत्यादि ॥ अशक्यमित्यन्तं वैयर्थ्यापातः फलानुपहितत्वाज्ज्ञेयः । एवञ्च सतीति ॥ अनादित्वेन कर्मण एव तदुपपादकत्वे सति ॥ हानिश्चेति चकारेणाधर्मस्याधर्मत्वहानिः समुच्चीयते ॥ फलोद्देशाभावेनेति ॥ कालान्तरे फलजननाय कर्मव्यापारत्वेनापूर्वकल्पने प्रयोजिका हि तृतीयाश्रुतिः । सा च तदा प्रयोजयेद् यदा विध्यादेः सर्वथा प्रवृत्तिजनकत्वेन सार्थकत्वं स्यात् । तदभावात् साऽप्यप्रयोजिकेति तथेत्यर्थः ।

तथा यागादे: पिशाचभिक्षाकल्पकत्वापत्तिरपि । एवं कर्मणोऽप्रवृत्त्यनिवृत्त्युपपादकत्वं दूषयित्वा विध्यादिसहकारित्वमीश्वरस्य दूषयन्ति ॥ एतदित्यादि, प्रवृत्तिरित्यन्तम् ॥ एवमपि सतीति ॥ वैयर्थ्यपरिजिहीर्षया तयोस्तथात्वेऽङ्गीकृतेऽपि मध्ये ईश्वरेच्छानिवेशे सति । नन्वन्धपरम्परानिवृत्तेरेव प्रयोजनत्वान्न वैयर्थ्यमित्यत आहुः ॥ एवञ्चेत्यादि ॥ तथा जीवकृतधर्माधर्मसापेक्ष ईश्वरोऽनुमतिदानेन कारयन् बीजानां पर्जन्यवत् सहकारिसाधारणकारणमिति युक्त्याङ्गीकारे आवश्यकत्वादिरूपयुक्त्या विध्यादिवैयर्थ्यमपरिहार्यमित्यर्थः । ननु परविद्याविचारे जीवकर्तृत्वस्येश्वराधीनत्वं सिद्धमित्यपरविद्यारूपविधिनिषेधवैयर्थ्यं न दोष इत्यत आहुः ॥ एवमपि सतीत्यादि ॥ तथा करोतीति ॥ जीवकृतप्रयत्नापेक्षां करोति ॥ सर्वथैव समर्थत्वादिति ॥ भ्रामयन् सर्वभूतानि यन्त्रारूढानि माययेति गीतावाक्येन तथात्वादित्यर्थः ॥ ज्ञापनाय चेति ॥ इदमेव निबन्धे भाष्ये चोक्तम् । साधनं च स्वरूपं च सर्वस्याह श्रुतिः फलम् * न प्रवर्त्तयितुं शक्तास्तथा चेन्नरको न हीत्यादि । अन्यत्तु निगदव्याख्यातम् । एवं सूत्रार्थव्याख्यानेन तेषां तात्पर्याज्ञानमपि स्फुटीकुर्वन्ति ॥ किञ्च, श्रियेत्यादि ॥ किञ्च त्वदुक्तेत्यादि च ॥

माध्वप्राभाकरादिमतेन शङ्कते ।

ननु जीवानां नित्यभिन्नानामेव चेतनत्वादणुत्वेन चैकदेशस्थायित्वेन चांशत्वमौपचारिकमेवेतिचेन्न । मुख्ये संभवति गौणस्यान्याय्यत्वात् । सूत्रकृतोंऽशत्वप्रसक्तदूषणपरिहारानुपपत्तिश्च स्यात् । जीवानां स्वतन्त्रभिन्नत्वेन चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञानुपपत्तिः । न च योगजधर्मप्रत्यासत्तिवत्तत्त्वज्ञानजनितालौकिकधर्मेणैव सर्वज्ञत्वोपपत्तिरिति वाच्यम् । यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादित्यादिश्रौतदृष्टान्तानुपपत्तेः । सदेव सौम्येदमग्र आसीदितिश्रुतिविरोधश्च ॥

नन्वित्यादि ॥ नित्यो नित्यानां चेतनश्चेतनानाम्, एषोऽणुरात्मा चेतसा वेदितव्यः । स वा एष आत्मा हृदित्यादिश्रुतिभ्यस्तथा तथेत्यर्थः । तद्दूषयन्ति ॥ नेत्यादि ॥ पादोऽस्य विश्वाभूतानीति श्रुत्यु-

केंऽशत्वे बहुस्यामितीच्छया संभवति । औपचारिकत्वादित्यर्थः । भिन्नांशत्वे दूषणमाहुः ॥ सूत्रेत्यादि ॥ सूत्रेषु प्रकाशादिवन्नैवं परः । अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवदित्यादिषु प्रकाशादिदृष्टान्तकृतो यो जीवस्य भगवदंशत्वेन तदीयेन सांसारिकदुःखभोगेनेश्वरस्यापि दुःखभोगापत्तिः । यथा पुरुषस्य पादे दुःखे दुःखित्वम् । तद्वत् । किञ्च, श्रुतौ भार्यामुपेयात् गुर्वङ्गनां नोपगच्छेत् इत्याद्यनुज्ञापरिहारावीश्वरे प्रसज्ज्येयातामित्यादिदूषणानां परिहारः । अहं दुःखीति या बुद्धिः सा भेद एव, न त्वभेदे । परः परमात्मा नैवं, न भेदबुद्धिः । तस्य हि सर्वत्रैवात्मबुद्धिरपि दुःखेऽपि तथा । ततश्च, नाग्नेर्हि तापो न हिमस्य तत् स्यादितिवत् तस्मान्न तस्य दुःखमिति शवाग्निश्चण्डालोदकं तद्घटादि परिह्रियते उत्कृष्टं गृह्यते इत्यशंस्य तत्तत्संबन्धेन दोषो, न सर्वस्यांशिनोऽग्न्यादेस्तथा देहाद्यध्यासवतो जीवस्यैव दुःखादयो, न परस्येत्यादिरूपस्तदनुपपत्तिरित्यर्थः । यत्पुनः कालाग्निखद्योतयोस्तेजोंशयोरमृतसमुद्रमूत्रयोर्जलांशयोर्मेरुपुरीषयोः पृथिव्यंशयोर्यथा नैकप्रकारता, किन्तु सदसत्त्वया विवेकस्तथा मत्स्यादीनां स्वरूपांशानां जीवानां भिन्नांशानां च तेजआदीनां भूतानामंशभेदेन भिन्नत्वेऽप्यभिमानदेवतैक्येन च दृष्टान्तोपपत्तिरिति व्याख्यानं, तस्मिन् पक्षे तु पृथिव्याः सर्वसहत्वेन दोषसंबन्धस्य सिद्धत्वाद् दृष्टान्तस्य विरुद्धत्वम् । तेषां राश्यभिमानित्ववदीश्वरेऽपि जीवराश्यभिमानत्वापत्तिः । अनभिमानत्वे त्वंशत्वस्यैवाभावराशिवदंशित्वे च साजात्यमात्रपर्यवसानाद् दूषणस्यैवाभावेन परिहारस्यैव वैयर्थ्यम् । एवं पितृपुत्रभावेऽपि । न च तद्बोधकश्रुतिस्मृत्याद्यनुपपत्तिः । अस्मद्रीत्यापि तदुपपत्तेः । किञ्चावान्तरसृष्टाविवादिसृष्टावपि पूर्वमीश्वरे जीवानां पिण्डीभाव एव वाच्यो, न त्वीश्वरैक्यम् । तथा सति तेषां भिन्नत्वेन, बहु स्यां, नामरूपे व्याकरवाणीत्याद्युक्तं स्वस्य बहु भवनं जीवस्वरूपेण नामादिव्याकरणमुत्तमपुरुषप्रयोगश्चेत्युपरुद्ध्येरन् । अभिमानित्वे जीवतौल्यं चापद्येतेत्येतत्समुच्चयार्थं चकारः । ननु मास्तु भिन्नांशत्वमुपचारश्च, किन्तु शरीररूपत्वाद्विशिष्टांशत्वमेवास्त्विति चेत् तत्राहुः ॥ जीवानामित्यादि ॥ ननु कारणावस्थायां विभक्तव्यपदेशानर्हत्वेनैक्यादेकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाः सुखेनोपपत्तिरितिचेत् तत्रा-

हुः ॥ न चेत्यादि ॥ श्वेतकेतूपाख्याने प्रलयप्रसङ्गाभावात् कार्याव- स्थायां तादृशं ज्ञानं विवक्षितम् । तदानीं च कारणावस्थाया अभा- वात् तादृशं ज्ञानं न लौकिकप्रत्यासत्त्येति तदर्थं तत्त्वज्ञानजनिता अलौकिकी प्रत्यासत्तिः सौवालादिवाक्यानुरोधेन कल्पनीया । अ- न्यथा तत्र सत एवोपक्रान्तत्वेन तस्य शरीरितायाः अनुक्तत्वाच्छि- ष्यस्य तावत्पर्यन्तं ज्ञानं न स्यात् । तथा सति स्फुटैव श्रौतदृष्टान्ता- नुपपत्तिः । दृष्टान्ते मृत्पिण्डादिपदैः पुरःस्फूर्तिकधर्मपुरःसरज्ञानस्यैव विवक्षितत्वावगमादिति । ननु ब्रह्मणः सर्वदा आत्माकारत्वेन सिद्ध- त्वात् कारणशरीरस्य च नित्यत्वेन तदविनाभावाद्विवक्षितधर्म- वत्त्वे सिद्धे विवक्षितप्रत्यासत्त्यैवैकविज्ञानेन सर्वविज्ञानसिद्धेर्न दृ- ष्टान्तानुपपत्तिरित्यत आहुः ॥ सदेवेत्यादि ॥ अयमर्थः । सुबालोपनि- षद्येव प्रलयप्रकरणे, अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते इत्य- न्तं लयमुक्त्वाऽग्रे तमः परे देवे एकीभवतीत्येकीभाव उक्तः । यतो लीङ् श्लेषण इति धात्वर्थविचारे लयः श्लेष एव भवति । भागाभा- व एव सिद्ध्यति । तथा सत्येकीभावः स्वरूपैक्यमेव पर्यवस्यति, न तु नामरूपविभागानर्हत्वमात्रम् । तस्य पूर्वत्रापि तुल्यत्वादिति शा- स्त्रान्तरादेवकारेण शरीरस्य शरीरभावत्यागपूर्वकं ब्रह्माभेदः सि- द्ध्यति । तथा सति सृष्टिप्राक्काले एवकारोऽन्ययोगं व्यवच्छिन्दन् पू- र्वोक्तैक्य एव पर्यवस्यति, न नामरूपविभागानर्हत्वमात्रमित्यवधेय- म् । नचैवं सति तदानीं ब्रह्मणो निर्धर्मकत्वापत्तिः । स्वरूपोदरधर्मा- णां सत्तायास्तदानीमग्रे वक्ष्यमाणत्वात् ॥ नचैवं ब्रह्मणः परिणाम- जीवरूपत्वं च सिद्धे जडरूपेणस्वरूपान्यथापत्तिर्जीवरूपेण तस्यैवे- ष्टानिष्टफलभोगापत्तिश्चेति शङ्क्यम् ॥ प्रकाशादिवच्चैवं पर इति सूत्र एव निरस्तत्वादित्यनवद्यम् । नचैवं जीवस्यापि स्वरूपान्यथा- भावापत्त्या नित्यत्वबाधः शङ्क्यः । दृष्टान्तभूताग्निस्फुलिङ्गस्वरूपवि- चारेणैव तदापत्तेर्निरस्तत्वात् । पराभिध्यानसूत्रार्थविचारे धर्मान्य- थाभावस्यैव प्रतिपादनाच्चेति । तेनांशत्वाविशेषेऽपि सदंशानां जड- स्वरूपान्यथाभावादनित्यव्यवहारश्चिदंशानां तु धर्ममात्रान्यथाभा- वान्नित्यत्वमिति सिद्धम् ।

एवं नित्यत्वेऽपि व्युच्चरणेनोत्पत्त्यङ्गीकारमिव बुद्ध्वा सूत्रवि- रोधमाशङ्कते ।

ननु, नात्माश्रुतेर्नित्यत्वाच्च ताभ्य इति तत्तत्सूत्रविरोधः । एतदर्थस्तु, आत्मा जीवो नोत्पद्यते । कुतः ? अश्रुतेः । देवदत्तो जात इति देहोत्पत्तिरेव श्रूयते, नात्मनः । किञ्च, नित्यत्वादपि नोत्पत्तिर्जीवस्य सम्भवति । कुतोऽस्य नित्यत्वमत्राह, ताभ्यः श्रुतिभ्य इतीतिचेद्, अत्रेदं प्रतिभाति । यथाऽग्नेः क्षुद्रा इत्यादिश्रुतीर्विचारयन् स्वयमेव जीवस्यांशत्वमुक्त्वा यत् पश्चादुत्पत्तिं निषेधति सूत्रकारस्तेन विस्फुलिङ्गन्यायेन जीवस्य व्युच्चरणं नोत्पत्तित्वेन सूत्रकारस्याभिमतम् । तदा परिच्छिन्नस्य शरीरस्याभावेन तस्य जीवागमनस्याप्यभावेनोत्पत्तिस्वरूपाभावात् । तदुक्तम्—अनित्ये जननं नित्ये परिच्छिन्ने समागमः * नित्यापरिच्छिन्नतनौ प्राकट्यं चेति सा त्रिधा इति । तथा चानित्यानां प्राणादीनां प्रादुर्भाव एवोत्पत्तिरिति तेषामेवोत्पत्तिरुक्ता । जीवानां ब्रह्मणः सकाशाद्विभागे तदंशत्वे च वाच्ये सति तयोर्दुर्बोधत्वं जानन्ती श्रुतिरंशत्वमंशिनः सकाशाद्विभागवत्त्वमणुत्वमंशिनोऽशान्महत्त्वं, पुनरंशस्यांशिनि प्रवेशयोग्यत्वं, प्रवेशे सत्यभेदप्रतीतिविषयत्वं, पुनर्निर्गमनयोग्यत्वं चाग्निविस्फुलिङ्गे प्रसिद्धमिति सर्वधर्मबोधसौकर्यार्थमग्निविस्फुलिङ्गदृष्टान्तेनोक्तवती । प्रकृतेऽप्येवं दृश्यते । जीवाद् ब्रह्मणो महत्त्वम् । तदुक्तम्, अधिकं तु भेदनिर्देशादिति । पुनः प्रवेशश्चोच्यते, ब्रह्मैव सन् ब्रह्माप्येति । ब्रह्मभावश्च भगवदुक्तसाधनकरणेन सन्तुष्टाद् भगवत आनन्दप्राकट्यात् स्वगुणस्वरूपैश्वर्यादिप्राकट्याच्चेति ज्ञेयम् । इदमेवोक्तम्, अस्मिन्नस्य च तद्योगं शास्तीति सूत्रेण । अर्थस्तु अस्मिन्नानन्दमये ब्रह्मण्यस्य जीवस्य तद्रूपस्य योगं ब्रह्मभावापन्नस्य प्राप्तिं वदति फलत्वेनेति । इदमेव, ब्रह्मभूतः प्रसन्नात्मा, न शोचति, न काङ्क्षति * समः सर्वेषु भूतेष्वित्याद्युक्त्वा भक्तिलाभानन्तरं, विशते तदनन्तरमित्युक्तं

विज्ञापनम् ।

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य कृते ।॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां कृते १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ६ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्डानि ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्डानि ३)	६	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०

तत्त्वदीपनम । पञ्चपादिकाविवरणस्य व्याख्यानम) खं० ८ ८ ०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३ ३ ०
टुप्टीका खण्डानि ४ ४ ०
पातञ्जलदर्शनम्।श्रीरामानन्दयतिकृतमणिप्रभाऽख्यवृत्ति स० १ ०
व्याकरण मिताक्षरा । श्रीमदन्नभट्टप्रणीता खण्डानि १० १० ०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३ ३ ०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रम
पराक्रमसहितः खण्डे २ २ ०
बोधसारोनरहरिकृतः तच्छिष्यदिवाकरकृतटीकयास०ख० १० ०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिरचिता खण्डे २ २ ०
दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः खण्डानि ३ ३ ०
श्रीमदणुभाष्यम् । श्रीश्रीवल्लभाचार्यविरचितम् ।
गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्य
व्याख्या समेतम् खण्डानि १५ १५ ०
तत्त्वशेखरः । श्रीभगवल्लोकाचार्यप्रणीतः । तथा-तत्त्वत्रयचुलुक
संग्रहः । कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः । १ ०
श्रीभाष्यवार्तिकम् । श्रीमद्रामानुजाचार्यविशिष्टाद्वैतसिद्धान्तप्र-
तिपादनपरम् । यतीन्द्रमतदीपिका च । श्रीगोविन्दाचार्यसूनु-
श्रीनिवासाचार्यकृता । सकलाचार्यमतसंग्रहश्च । खण्डे २ २ ०
गूढार्थदीपिका । श्रीमद्भागवतदशमस्कन्धस्थरासपञ्चाध्यायी-
व्याख्या खण्डे २ २ ०
आश्वलायनसूत्रप्रयोगदीपिका । श्रीविद्वद्वरमंचनाचार्यभट्ट-
विरचिता खण्डे २ । २ ०
काव्यालंकारसूत्राणि । पण्डितवरवामनविरचितवृत्तिसमेतानि
कामधेनुसमाख्यव्याख्यासहितानि खण्डे २ । २ ०
श्रुत्यन्तसुरद्रुमः । श्रीपुरुषोत्तमप्रसादविरचितः खण्डानि ३ ३ ०
चतुर्विंशतिमतसंग्रहः । श्रीभट्टोजिदीक्षितसंकलितः खण्डे २ २ ०
श्रीविद्वन्मण्डनम् श्रीविट्ठलनाथदीक्षित विरचितम् । गोस्वामि श्री-
पुरुषोत्तमजीमहाराजविरचित सुवर्णसूत्राख्यव्याख्यासहितम् १ ०

ब्रजभूषण दास और कम्पनी
बनारससंस्कृत सीरीज़्कार्यालय
बनारस सिटी ।

BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
G. THIBAUT, Ph. D.
No. 144.

श्रीविद्वन्मण्डनम् ।

श्रीविट्ठलनाथदीक्षितविरचितम् ।
गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचित-
सुवर्णसूत्राख्यव्याख्यासहितम् ।
श्रीमदाचार्यश्रीवल्लभाधीश्वरगुर्वाश्रितसंप्रदायविदुषा
रत्नगोपालभट्टेन संशोधितम् ।

VIDVANMANDANA,

By Śrî Viththalanâtha Dîkshita,

With the Commentary called Suvarna Sûtra,

By Goswâmi Śrî Purushottamjee Mahâràja;

Edited by Ratna Gopâla Bhatta.

Fasciculus II.

BENARES:
Published by the Proprietors Messrs. Braj B. Das & Co.
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press
By Harikrishna Dasa.
Benares
1908.

Registered under Act XXV. of 1867. (All Rights Reserved.)

सूचीपत्रम् ।

	रु०	आ०	पा०
गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	०
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली (शिला)॥।)	०	१	६
परिभाषापाठः	०	०	६
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
फक्किकाप्रकाशः	०	८	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	४	०
मनोरमा शब्दरत्नसहिता	७	०	०
मुहूर्तमार्तण्डः सटीकः	०	८	०
लघुकौमुदी टिप्पणीसहिता	०	३	०
लघुकौमुदीभाषाटीका (पं० मथुराप्रसादमिश्र कृत) (टिप्पणीसहित)	४	०	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
व्याकरणकौमुदी (उपक्रमणिका का दूसरा भाग)	१	०	०
शब्दरूपावली	०	०	९
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
सिद्धान्तकौमुदी (पं० वामनाचार्येण संशोधिता)	१	८	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	२	०	०
उपसर्गवृत्ति	०	१	०
क्षेत्रकौमुदी	०	६	०
क्षेत्रसंहिता	१	०	०

विजयरथकुटुम्बेन श्रीदेवकीपुत्रेण । प्रवेशानन्तरमभेदप्रतीतिं श्रुतिराह । तथाहि । सर्वेषां हि भगवत्येव लयः साक्षात् परम्पराभेदेनातो मोक्षस्थानं भगवानेवेति निरूपणार्थं यथा सर्वासामपां समुद्र एकायनमित्युपक्रम्य, वागेकायनमित्यन्तं दृष्टान्तार्थं निरूप्य, स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत इत्यादिना च लयदृष्टान्तं निरूप्य, विज्ञानघन एवैभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति, न प्रेत्य संज्ञाऽस्तीति लयं निरूप्य, तन्निरूपणार्थं, यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्युपक्रम्य, विज्ञातारमरे केन विजानीयादित्यन्तेन लयावस्थायां लीनस्य स्वस्मिन् भगवतो भिन्नत्वेन प्रतीतिराहित्यं न्यरूपयत् । इममेवार्थं सूत्रकारोऽप्याह, गतिसामान्यादिति । गतिर्मोक्षः, समानस्य भावः सामान्यं तस्मात् । मोक्षे जीवब्रह्मणोरभिन्नत्वादभिन्नत्वेनैव निरूपणादित्यर्थः । तेनादिमध्यावसानेषु शुद्धब्रह्मण एवोपादानत्वात् सर्वेषां वेदान्तानां ब्रह्मणि समन्वय इति तत्र फलितम् । स्वावतारसमये क्रीडार्थं साक्षाद् योग्यास्त एव भवन्तीति तानप्यवतारयतीति पुनर्निर्गमनयोग्यत्वम् । इदमेव, मुक्तोपसृप्यव्यपदेशादितिसूत्रेणोक्तम् । नच, न स पुनरावर्तते, अनावृत्तिः शब्दाद् इति श्रुतिन्यायविरोधः । एतस्य प्रमाणमार्गपरत्वात् । इदं च पुष्टिमार्गाङ्गीकारे भगवान् करोति, नोचेन्मर्यादायां प्रवेशपर्यन्तत्वमेव । तस्यातिशयितानुग्रहविशेषमात्रसाध्यत्वेनातिदुर्लभत्वात् । तदुक्तं भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म, न भक्तियोगमिति । किञ्च, संसारे पुनरनावृत्तिमाह श्रुतिः । न हि तेषां तत्संसारः । मुक्ता अपि लीलाविग्रहं कृत्वा भजन्त इति वाक्याच्च । स च, चिरकालोपसमुदितप्राचीननिरतिशयकृपाफलसारनिरुपधिनिजचरणकमलाऽनुरागविलासाऽभिलाषबीजाप्तु ततो

निजपरिजननिरोधतः प्रियावलोकननिमित्तं कृतप्रतिक्षणविविधव्याजजनितगतागतकर्षितासु, ततो दिवा प्रियवनगमनजनितविरहतरणितापतप्यमानान्तःकरणकेदारासु, ततो निशामुखे प्रियागमनसंपन्नग्रावलोकनसेचनजनितहासितवलितविनशनरलरुचिरविलोचनयुगलविहितविविधनिरवधिरसभावाङ्कुरासु,ततोऽतिविपुलकलिन्दजापुलिननभोवलयगतनिजमुरलिकाकलनिनदगर्जिताऽऽनन्दितास्वेव कासु चिद् भूमिषु श्रीमन्नन्दराजकुमारो नवजलदो निजाऽऽनन्दसुधां ववर्षेति तथैव सर्वत्र वर्षिष्यतीति, न ज्ञातुं शक्यते । मर्यादया तद्भजनमेव सर्वेषां कर्तव्यत्वेन स्थितं, तेनैव सर्वमिति दिक् ॥

एतच्च दशमस्कन्धविवरणे मृत्स्नाभक्षणवरदानार्थागमनादिस्थलेषु पितृचरणैरेव स्फुटं निरूपितमित्यलं विस्तरेण ॥

यद्वा जीवत्वादिवदंशत्वमप्येकः पृथग्धर्मो जीवे निरूप्यते श्रुत्या, अतो नानुपपत्तिः काचित् ॥

नन्वित्यादि ॥ श्रुतिभ्य इति ॥ नित्यो नित्यानामित्यादिभ्यः । एतत्समाधातुं व्युच्चरणपदार्थं विचारयन्ति ॥ अत्रेत्यादि ॥ उक्त्वेति ॥ वक्तुमभिसंधायेत्यर्थः । व्युच्चरणस्योत्पत्तित्वाभावे प्राचां संमतिमाहुः ॥ तदुक्तमित्यादि ॥ जननं बहिर्भावहेतुको विषयिसंसर्गः । समागमः=आगमनाक्रियाहेतुकः सः । प्राकट्यमिच्छाविशेषहेतुकः स इति न पूर्वोक्ताविर्भावलक्षणस्य विरोधः । तथाचात्र विभागाज्ञातेऽपि बहिर्भावे तदानीं स्वरूपधर्मयोरन्यथाभावाभावात् तस्य नोत्पत्तिरूपता । श्रीभागवतेऽपि देहं प्रकृत्य, तन्निरोधोऽस्य मरणमाविर्भावस्तु संभव इतिदेहवियोगयोगाभिमानमात्रस्यैव जीवमरणोत्पत्तिरूपताकथनात् तस्य तदानीं देहाभावेन तदभावाद्भवन्मत इव नास्मन्मतेऽपि सूत्रविरोध इत्यर्थः । नन्वस्त्वेवमुत्पत्त्यभावस्तथापि ब्रह्मणः सकाशाद्विभागे सति जीवत्वात्ततः पूर्वं तदभावे जीवस्य नित्यत्वं तु कुप्येतैवेत्यत आहुः ॥ तथाचेत्यादि ॥ उक्तेति ॥ एतस्मा-

जायते प्राणो मनः सर्वेन्द्रियाणि च * खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी । लोकानुसृजा इति चतुर्दशपुरुषा अजायन्त इत्यादिश्रुत्यन्तर उक्तत्वादत्र प्रजावत्सजीवोत्पत्तिर्न वक्तुं शक्या । आत्मपदवैयर्थ्यापाताच्च । अतः केवलानामेव तेषां मोक्षेऽस्यार्थोऽजीवानामिति तदानीमनन्यथाभूतधर्मकाणाम् ॥ तद् दुर्बोधत्वमिति ॥ नित्यत्वस्य दुर्बोधत्वम् उक्तवतीति । अंशत्वेन स्वरूपान्यथाभावादेव नित्यत्वं बोधितवतीत्यर्थः । उक्तेषु सप्तसु धर्मेषु द्वयोः पूर्वमुपपादितत्वात् तृतीयस्याग्रे प्रयासेन व्युत्पादनीयत्वाच्च चतुर्थमारभ्य व्युत्पादयन्ति प्रकृत इत्यादि ॥ पञ्चमं व्युत्पादयन्ति ॥ पुनरित्यादि ॥ भगवदुक्तसाधनेति ॥ गीतैकादशस्कन्धाद्युक्तभगवद्धर्मात्मकसाधनेत्यर्थः ॥ स्वगुणेत्यादि ॥ न तु मायावाद्युक्तरीत्येत्यर्थः । षष्ठं व्युत्पादयन्ति । वाक्यान्वयाधिकरणविषयवाक्यं मैत्रेयीब्राह्मणं प्रमाणत्वेनोपक्षिपन्ति ॥ तथाहीत्यादि ॥ अत्रायमर्थः । उक्तश्रुतौ ह्युपक्रमे, येनाऽमृता स्यां किमहं तेन कुर्यामित्यमृतत्वघटितवाक्यम् । मध्ये च, न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवतीत्यादिजीवलिङ्गयुतम् । अग्रे चात्मज्ञानेन सर्वज्ञानाय सर्वस्यात्मरूपत्वम् । तत ऋग्वेदादीनां तन्निःश्वसितत्वं तस्य सर्वलयस्थानत्वं च प्रतिपादितम् । तत्र जीवलिङ्गबाहुल्याज्जीवप्रकरणत्वमेतस्येति पूर्वपक्षेणानर्विमतोपन्यासपूर्वकं वाक्यान्वयरूपोपपत्त्या ब्रह्मप्रकरणत्वं तस्य निर्णीतम् । तथा सति मध्ये यज्जीवनिरूपणं तन्मुक्तिं प्राप्स्यतो जीवस्य ब्रह्मधर्मप्राकट्ये ब्रह्मभावबोधनार्थमिति औडुलोमिमतं, कयाचिदवस्थयाऽवस्थितं ब्रह्मैव जीव इति बोधनायेति काशकृत्स्नमतं वदन्, आचार्यस्तु स्वमतमत्र किमप्यनुवदन्नप्यग्रे, अंशो नानाव्यपदेशादन्यथा चापीत्यनेन भेदाऽभेदव्यपदेशाभ्यामंशत्वं वदन्नेकदेशिमतद्वयमपि संगृह्णानोऽंशत्वबोधनायात्र निरूपणमिति सूचितवान् तदेतद् हृदि कृत्वा विविक्षितं स्फुटीकुर्वन्ति ॥ सर्वेषामित्यादिना ॥ उक्तरीत्या लयस्थानदृष्टान्तार्थं, स यथा सर्वासामपामित्यादिकं निरूप्य, स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेतेत्यादिना, नाहास्योद्ग्रहणायेव स्याद्यतो यतस्त्वाददीत लवणमेवेत्यन्तेन लयदृष्टान्तं निरूप्य । स दृष्टान्तः । यथा सैन्धवखिल्यः । सिन्धुरुदकं, तत्र भवं सैन्धवं लवणं, तस्य

खिल्यः शकल, उदके जले, प्रास्तः प्रक्षिप्तः सन् उदकमेवानुक्षेपाधारभूतमुदकमेव लक्ष्यीकृत्य विलीयेत उदकभावमापद्येत । नाहं, न कश्चिद्, अस्य सैन्धवखिल्यस्य उद्ग्रहणाय उद्धृत्य पूर्ववद् ग्रहणायेव स्यात् । इवशब्दोऽनर्थकः । शक्तः स्यात् । यतो हेतोर्यतो यस्मादुदकदेशादाददीत । आस्वादनाय गृह्णीयात्, लवणमेव लवणरसमेवास्वादयेत् । अतो लवणभावेऽप्युदकरूपेणैव तस्य सत्त्वं, न तु खिल्यभावेनेति लयदृष्टान्तं व्याख्याय, एवं वा अर इदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति, न प्रेत्य संज्ञास्तीति लयं निरूप्य यथा अयं लवणदृष्टान्त एवमेवारे मैत्रेयि इदमात्मतत्त्वं महदादिलक्षणकं ब्रह्मैव महदनवच्छिन्नं भूतं सिद्धम् । अनन्तमविनाशि अपारमनादि विज्ञानघनः ज्ञप्तिमात्रस्वरूप एव सन् एतेभ्यः स्थूलसूक्ष्मशरीरादिकरणपरिणतेभ्यो भूतेभ्यः समुत्थाय भूसूर्यरश्म्यादिभ्यो रसः सैन्धवभावमिव पराभिध्यानादहमा विशेषफलभोक्तृभावं प्राप्य तानि विनश्यन्ति सन्त्यनुपश्चाद्विनश्यति । भोक्तृभावं त्यजति, न प्रेत्य विमुक्त्यनन्तरं संज्ञा जीवादिसंज्ञा नास्तीति, किन्तु ज्ञप्तिमात्रस्वरूप एव भवतीत्येवं लये संज्ञाभावं व्याख्याय तन्निरूपणार्थे मिष्टोदके तत्प्रक्षेपे अविभागदशायामपि भेदज्ञानान्न संज्ञाया अभाव इति मैत्रेय्या मोहे सर्वात्मना संज्ञाभावनिरूपणार्थं, यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्युपक्रम्य जिघ्रत्यभिवदति शृणोति मनुते विजानातीत्यन्तैर्भेदकसत्तायां द्वैतदर्शनपूर्वकं, यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येज्जिघ्रेदभिवदेच्छृणुयान्मन्वीत विजानीयाद्येनेदं सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरेकेन विजानीयादिति । तत्त्वेन भेदकधर्मलये विज्ञातृभावाद्ब्रह्मरूपतायां समुद्रे लवणस्येव ब्रह्मणि लीनस्य स्वस्मिन् भगवतो भिन्नत्वेन प्रतीतिराहित्यम्, अन्यस्य ब्रह्मविदोऽपि तस्मिन् जीवे तथाप्रतीतिराहित्यं न्यरूपयत् । तथात्र यदि जीवानां नित्यभिन्नत्वमभिप्रेयात्तदा द्वैतदर्शनदशायामिव भेदेन द्वैताभावं न सूचयेदात्मभावदशायां च द्रष्टृदृश्यादिभावं न निषेधेद्यतोऽद्वैतदुभयम् अतो जीवा न नित्यभिन्ना, नापि ब्रह्मैव, किन्तु भिन्नाभिन्ना ब्रह्मांशा इत्यर्थः ।

ननु यद्येवं तदा सूत्रकारो, गतिसामान्यादित्यत्र तौल्यबोधकं सामान्यपदं न वदेत्ततो नैषम् . निरञ्जनः परमं साम्यमुपैतीत्यत्र तथा

श्रावणादविभागमात्रमेव स्वीकार्यम् । न त्वभेदोऽपीति चेत् तत्राहुः ॥ इदमेवेत्यादि ॥ तथाच समानाधिकरणसमानोदर्य इत्यादौ समानशब्दस्यैकार्थकत्वदर्शनादुक्तश्रुतौ च साम्यस्य परमत्वेन विशेषितत्वात्तादृशसाम्यस्य चाभेद एव संभवादस्मिन् सूत्रेऽपि सामान्यपदेन अभेद एवाभिप्रेतो, न तु नित्यभिन्नत्वमित्यर्थः । सिद्धान्ते, गतिसामान्यसूत्रस्यापीदमेव विषयवाक्यं, तद्व्याख्याने यो विशेषः सोऽपि मत्कृतात्तद्विभागादवगन्तव्यः। अधिकरणक्रमाध्यायार्थयोर्विचारणाप्येवमेव सिद्ध्यतीत्याहुः ॥तेनेत्यादि॥ आदौ समन्वयसूत्रे जन्मादिसूत्रे वा ब्रह्मण उपादानत्वं प्रतिज्ञायानन्दमयाधिकरणपर्यन्तं तस्यैव समर्थनेन मैत्रेयीब्राह्मणादिषु वाक्यान्वयाद्यधिकरणविषयवाक्येषु तस्यैव समर्थितत्वात् सर्वेषां वेदान्तानां ब्रह्मण्येव समन्वय इति तत्राध्याये फलितम् । तथाचैवं तादात्म्य एव व्यासतात्पर्यं, न नित्यभेदे, नाप्यभेदे इति, नांशत्वमौपचारिकमित्यर्थः । सप्तमं व्युत्पादयन्ति ॥ ब्रह्मावतारेत्यादि, दिगित्यन्तम् ॥ इदमिति ॥ मुक्तावतरणम् ॥ तस्येत्यवतारणस्य । ननु श्रुतिन्याययोः सर्वसाधारणत्वादेवं निर्गमनयोग्यत्वसाधनं न प्रामाणिकमितिशङ्कायाम् एतस्य निर्गमनस्यावृत्त्यऽबाधकत्वं साधयन्ति ॥ किञ्चेत्यादि ॥ एतं मानवावर्त्तं नावर्त्तन्त इति विशेषश्रावणान्नावतरणमावृत्तिः, किन्तु संसारे पुनरागमनम् तत्तु तेषां नास्तीति न श्रुतिन्यायविरोध इत्यर्थः । अत्र वाक्यकारसंमतिमप्याहुः ॥ मुक्तेत्यादि ॥ अतिशयितानुग्रहमात्रसाध्यतामुदाहरणप्रदर्शनेन स्फुटीकुर्वन्ति ॥ स चेत्यादि ॥ अत्र, रामेण सार्द्धमित्यादीनि वाक्यान्येवंविधानीतराण्यपि प्रमाणत्वेनानुसंधेयानि । स्थितमिति ॥ सूत्रादौ निर्णीतम् । तर्ह्यनुग्रहविशेषेप्सोः का गतिरित्यत आहु ॥ तेनेत्यादि ॥ बीजसत्तायामेतदेवाङ्कुरसाधनम् । अग्निकुमारादिभिस्तथैव कृतत्वादित्यर्थः । एतदेव स्फुटीकुर्वन्ति ॥ एतच्चेत्यादि ॥ एतदिति ॥ विशेषानुग्रहसाध्यं क्रीडार्थत्वम् ॥

नन्वेवं सप्तधर्मबोधनाय व्युच्चरणकथनमयुक्तम् । जीवस्य मुक्तौ ब्रह्मणि प्रवेशेनैक्यरूपे अभेदे तादात्म्यस्य निवृत्तत्वेन जीवेऽपि निरङ्कुशैश्वर्यप्रकृतिनियामकत्वादीनामसाधारणब्रह्मधर्माणामापत्त्यामहानेवानय इत्याशङ्कायां तन्निरासाय पूर्वोक्तानुगुणमेव पक्षान्तरमाहुः

यद्वेत्यादि ॥ अयमर्थः स्मृतौ सूत्रे चांशशब्द उक्तः, श्रुतौ पाद-

शब्दः । उभावपि संदिग्धौ । अंशशब्दस्यावयवे पुत्रे पत्न्यां खण्डे शिष्टवस्त्वेकदेशे राश्येकदेशे च प्रयोगदर्शनात् । यद्यपि पत्न्यां तथा न प्रसिद्धस्तथापि अर्द्धो वा एष आत्मनो यत् पत्नीरिति, स आत्मानमेव द्वेधाऽपातयत्तत पतिश्च पत्नीचाभवतां तस्मादेतदर्धवृगलमिवेति श्रुतिभ्यां तथा निश्चीयते पुंस्यर्द्धोऽर्द्धं समेंऽशक इति कोशाच्च । पादशब्दोऽप्यवयव एकदेशे च तत्रावयवे प्रसिद्ध एव । एकदेशे तु, विश्वो वैश्वानरः प्रथमः पाद इति । यद्यप्येतेषु यस्य कस्याप्यर्थस्य ग्रहणे लक्षणादोषसंसर्गो न भवति । तथापि श्रुतावूर्णनाभिस्तन्तुनोच्चरेत्, यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्तीति दृष्टान्तद्वयपूर्वकं व्युच्चरणस्यैवोक्तत्वात् श्रीभागवते द्वितीयस्कन्धादौ सृष्टिप्रकरण ऊर्णनाभिदृष्टान्तस्यैवोक्तत्वाच्च व्युच्चरणार्ह एवांशपदार्थो ग्राह्यः । सोऽपि तन्नित्यत्वादिश्रुत्यनुरोधादविकृतस्वरूप एवांशो ग्राह्यः । तादृशश्च खण्डावयवादिरूप एव भवितुमर्हति, न तु नित्यभिन्नरूपः । तत्त्वत्रयस्वाभाविकविवेकस्य युष्माभिरप्यङ्गीकृतत्वेनाविभागदशायां विशेषफलभोगाभावेऽपि स्वस्मिन्नहमितरभिन्न इति तस्य प्रतीतेरर्थसिद्धत्वात् । एवं सति, बहु स्यामितीच्छया बहुत्ववत् प्रजायेयेतीच्छया पूर्वोक्तचैचित्र्याय जीवत्वाणुत्वादयो यथा जीवे संपादितास्तथांशत्वमप्येकः पृथगेव धर्मः संपादित इति त इव सोऽपि श्रुत्या निरूप्यते । पादोऽस्य विश्वाभूतानीति । तेन प्रवेशोऽप्यंशत्वेन तत्रैव प्रवेशात् । चैत्यस्य तत्त्वममलं मणिमस्य कण्ठ इति कौस्तुभे वा कुन्तले वा प्रवेशात् । अर्द्धो वा एष आत्मनो यत्पत्नीरिति श्रुत्या लक्ष्म्यादीनामपि तदंशत्वेनास्य मुक्तावपि तत्रैव वा लयाद्दोषाभावेनांशपदस्य मुख्यवृत्तत्वेऽपि श्रुत्यादौ न काचिदनुपपत्तिरित्यर्थः । एतेनाभेदो वास्तवो, भेदस्त्वौपाधिक इति भास्कराचार्योक्तमपि दत्तोत्तरम् समञ्जसे भेदस्य स्वाभाविकत्वे औपाधिकत्वस्याऽन्याय्यत्वादिति । एवमत्रांशत्वसमर्थनेन तादात्म्यं दृढीकृतम् ।

नच सिद्धान्तमुक्तावल्यामाचार्यैरात्मनि ब्रह्मरूपे तु छिद्रा व्योम्नीव चेतना इत्यनेनावच्छेदवादस्योक्तत्वात्तादात्म्यवादे तद्विरोधः शङ्क्यः । तत्र ह्यात्मविषये निर्णय उच्यत इति प्रतिज्ञाय ब्रह्मरूपे अक्षरे चेतनाः जीवाः व्योम्नि छिद्रा इव । लिङ्गमशिष्यम् । छिद्राणीव । अणुत्वबोधनाय दृष्टान्त इति व्याख्यानात् । तत्र व्युच्चरणोत्तरमुपा-

च्छिन्नयाप्त्या विपरीतधर्माणां प्रतीतिर्न ब्रह्मधर्माणाम् । उपाधिनेच्छाप्रयुक्तेन तत्तिरोधानादिति ।

पुनर्मायावादिभट्टमतेन चोद्यमाहुः ।

ननु पूर्णे पुरुषोत्तमे जीवस्य प्रवेशोऽशक्यनिरूपणः । स हि बहिःस्थस्यान्तर्गमनरूपः । तयोश्च परिच्छिन्ने एव पदार्थे संभवः । तथाच ब्रह्मणोऽपरिच्छिन्नत्वान्न सम्भव इति चेद् हन्तैवं विभागांशत्वादिकमप्यशक्यनिरूपणं जीवस्य । तत्तु श्रुतिन्यायाभ्यां निर्णीयत इति चेत्, तुल्यम् । वस्तुतस्तु यथा सर्वतः पाणयः पादा अन्ताश्चेति श्रुत्या ब्रह्मणि निरूप्यन्ते, तथा प्रवेशनिर्गमोक्त्याऽन्तस्त्वबहिष्ट्वे अपि तत्र स्त इति मन्तव्यम् । एवं सति यथेमे, तथा प्रवेशनिर्गमावपीति नोक्तानुपपत्तिः । किञ्च, उपाधिपक्षे प्रवेशः सुतरामसङ्गतः । तदोपाधेर्नाशाङ्गीकारात् कस्य प्रवेशः स्यात् । ननु प्रवेशं निरूपयति श्रुतिरिति, सत्यं, परमेतद्वाक्यार्थबोध एव न सम्भवति, अयोग्यताज्ञानादिति चेद् । अत्रेदं विचार्यते । दोषो हि शब्दगतः श्रोतृगतो वा भवेत् । अत्र च शब्दस्यादुष्टत्वाच्छ्रोतृगत एव स वाच्यः । तथाचाऽपगताविद्यानां ब्रह्मविदामेवानुभूतिविषयमुपदेशैकसमधिगम्यं ब्रह्म निरूपयन्ती श्रुतिरविद्यावलिप्ताल्पबुद्धीनां ग्रहणासामर्थ्येनायोग्यताज्ञानेन नान्यथयितुं शक्या । न ह्युपदेशैकगम्यं हीरकमन्त्रादेर्माहात्म्यं साधारणजनानुभवाविषय इत्युपासिततद्गुरूणामप्यविषयः । न वा पित्तदूनरसनेन्द्रियस्येदम्प्रथमतया सितां भक्षयतः, सिता मिष्टेति वाक्ये अयोग्यताज्ञानं वाक्यार्थमन्यथयितुमीष्टे । न वा तस्यैव दोषापगमे सति न योग्यताज्ञानसम्भवस्तत्र । अत एव, आचार्यवान् पुरुषो वेदेति श्रुतिः । अतो यथाश्रुतमेव मन्तव्यम् । अत एव सूत्रकारोऽपि जगति ब्रह्मण उपादानत्वे कृत्स्नप्रसक्त्यादिशङ्कापरिहाराय, श्रुतेस्तु शब्दमूलत्वादित्येवाह ॥

ननु पूर्ण इत्यादि ॥ समादधते ॥ हंतेत्यादि ॥ तुल्यमिति ॥ उदके प्रास्त उदकमेवानुविलीयेत नाह्यास्योद्ग्रहणायेव स्यादित्यादिश्रुत्याऽस्यापि निर्णयेन परिहारस्सास्यादिति नायं पर्यनुयोगो युक्तः । यत्रोभयोः समो दोष परिहारोऽपि वा समः*नैकः पर्यनुयोज्यः स्यात्ताहगर्थविचारण इति न्यायादित्यर्थः । प्रतिबन्देरप्रोत्तरत्वेऽपि बहुप्रमाणसिद्धत्वाय श्रुतार्थापत्तिमपि प्रमाणयन्ति ॥ वस्तुत इत्यादि ॥ उक्तदाढ्याय वादिबाधकं तर्कमाहुः ॥ किञ्चेत्यादि ॥ तदेति ॥ मुक्तिदशायाम् ॥ तथाच भवन्मते श्रुतिविरोधो लक्षणा वा, अस्माकं तु नैकोऽपि दोष इत्यर्थः । स्वोक्तं समर्थयितुं नैयायिकादिरीत्या चोदयन्ति ॥ ननु प्रवेशमित्यादि ॥ उपगम्य समादधते ॥ अत्रेत्यादि ॥ इदमिति ॥ बोधाभावकारणम् ॥ दोष इति ॥ अज्ञानकारणभूतो दोषः । सिद्धान्तयुक्तेः पोषणाय प्रमाणमाहुः ॥ अत एवेत्यादि ॥ एवमत्रकारिकोक्तमंशत्वं व्युत्पादितम् ॥

अतः परमणुत्वं व्युत्पादयितुं चोद्यमाहुः ।

ननु प्रवेशकथने जीवस्य व्यापकत्वव्याहतिरितिचेद् हन्तैवं शशस्यापि निजशृङ्गभङ्गभिया तनूदरकन्दराप्रवेशः !! यतोऽणुरेव जीवः । कुत एतत् । श्रुतित एव । तथाहि । आराग्रमात्रो ह्यवरोऽपि दृष्टः, वालाग्रशतभागस्य शतधा कल्पितस्य तु * भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते, एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेशेत्यादिभ्यः ॥

स्यादेतत्, नाणुर्जीवो वक्तुं युक्तः । श्रुतिस्मृतिविरोधात् । तथाहि । स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु, आकाशवत् सर्वगतश्च नित्यः, नित्यः सर्वगतः स्थाणुरित्यादिषु व्यापकत्वश्रवणात् । तत्त्वमसीत्यादिभिर्ब्रह्माभेदनिरूपणाच्च । न हि तत्त्वतोऽणोर्व्यापकाभेदः संभवति । किञ्च, जीवस्याणुत्वे सर्वशरीरगतचैतन्यानुपलम्भप्रसङ्गः । न च यथैकदेशस्थचन्दनबिन्दुशैत्योपलम्भः सकलशरीरव्यापकतया भवत्येवमेकदेशस्थजीवचैतन्योप-

म्भोऽपीति वाच्यम्। दृष्टान्ते एकदेशस्थायित्वस्य प्रत्यक्षतो निश्चितत्वेन दार्ष्टान्तिके च संदिग्धत्वेनोभयोर्वैषम्यात्। न च, सर्वशरीरव्यापि चैतन्यं स्वधर्म्येकदेशवृत्ति विसर्पिगुणत्वात्, शरीरैकदेशस्थचन्दनजन्यसर्वशरीरव्यापिशैत्यवदित्यनुमानेनाणुत्वं साधयितुं शक्यम्। हेत्वसिद्धेः। साध्याविशिष्टत्वाच्च। एकदेशवृत्तित्वे सिद्धे जीवस्य चैतन्यस्य विसर्पिगुणत्वसिद्धिरेतत्सिद्ध्या च तत्सिद्धिरित्यन्योन्याश्रयत्वाच्च। चन्दनसूक्ष्मावयवानां सर्वदेहप्रसर्पणेनापि शैत्योपलम्भस्य संभवे दृष्टान्तासिद्धेश्च। एतेनैव चम्पकगन्धोऽपि प्रत्युक्तः। न हि गुणिनं विना गुणे क्रियासंभवः। अतिप्रसङ्गात्। चम्पकदेशाधिकदेशे गन्धग्रहस्तु तदवयवानामपि वायूपनीतानां तत्र सत्त्वेन। नचैवं तन्नाशापत्तिः। भोग्यादृष्टेनैव तदवयवपूरणसंभवात्। अन्यथानुपपत्तेर्बलिष्ठत्वात्। दृष्टासंभवे सत्यदृष्टकल्पनाया न्याय्यत्वात्। नच मणिप्रभावत्तदुपपत्तिः। तस्यास्तज्जनितविरलसजातीयद्रव्यान्तरत्वात्। एतेनैव प्रदीपसूर्यादयः प्रत्युक्ताः। श्रुतावणुत्वनिरूपणं तु दुर्ज्ञेयत्वाभिप्रायम्। तस्मान्नाणुर्जीवः॥

नन्वित्यादि॥ इष्टापत्त्या समाधत्ते॥ हन्तेत्यादि॥ एवं व्यापकत्वव्याहत्यापत्तौ शशस्यापि तथा तत्प्रवेश आपद्येतेत्युपहासः। श्रुत्या व्यापकत्वे निरस्ते तस्या अनिर्णायकत्वं बोधयितुं श्रुत्यन्तरेण पुनः प्रत्यवतिष्ठते॥ स्यादेतदित्यादि॥ वक्ष्यमाणरीत्या व्यापकत्वं स्यादित्यर्थः। नैयायिकादिमतेनापि जीवाणुत्वं दूषयति॥ किञ्चेत्यादि॥ अविरोधश्चन्दनवदिति सूत्रोक्तमाक्षिपति॥ नचेत्यादि॥ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हीतिसूत्रोक्तयुक्त्या एकदेशस्थायित्वनिश्चयेनोक्तयुक्तिं दूषयित्वानुमानाणुत्वं सिसाधयिषोस्तदनुमानं दूषयति॥ नच सर्वेत्यादि॥ हेत्वसिद्धेरिति॥ हेत्वप्रसिद्धेः। साध्याविशिष्टत्वादिति हेतोः साध्यसमत्वात्। व्यतिरेको गन्धवदिति सूत्रोक्तं दूषयति॥ एतेनेत्यादि॥ गुणाद्वा लो-

कचादिति सूत्रोक्तं दूषयति ॥ नच मणीत्यादि ॥

अत्र वदन्ति ।

तत्त्वसूत्रानुसारेण वेदार्थस्य निरूपणे ।

जीवोऽणुरेव संसिद्ध्यत्यन्यथा त्वन्यथैव हि ॥

भवेदेतदेवं यदि, स वा एष महानित्यादिभिर्जीवो निरूप्येत। तदेव तु न संभवति, ब्रह्मप्रकरणे पठितत्वात् । यतो बादरायणोऽप्याह, नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारादिति । नचैवं सकलशरीरगतचैतन्योपलम्भानुपपत्तिः । चम्पकगन्धवदेवोपपत्तेः । न च गुणिनं विना गुणासंभवान्नैवमिति वाच्यम् । संबन्धिनं विनापि संबन्धस्य समवायस्याङ्गीकारो यथाऽक्षपादीयानां तथात्रापि तदुपपत्तेः । ननु रूपरसादीनामन्यत्रोपलम्भः स्यादिति चेत्, स्यादेवोपलम्भो यदि स्वाश्रयमपहायान्यत्र तिष्ठेयुः । अथ द्रव्यं विहाय गन्धस्यान्यत्र सत्त्वे गुणसत्त्वे द्रव्यसत्त्वस्य नियामकत्वाभावाद्रसादीनामप्यन्यत्र गमनं स्याद्, अतोऽस्यावश्यं नियामकत्वेनाङ्गीकाराद् गन्धोपलब्धिस्थले चम्पकावयवानामपि सत्त्वमङ्गीकर्तव्यमिति चेन्न । समवायस्यापि तथात्वाङ्गीकारे संबन्धसत्त्वे संबन्धिसत्त्वस्य नियामकत्वाभावात् संयोगादीनामप्यतिरेकापत्तौ तत्समाधानाय तस्य नियामकत्वेनाङ्गीकारात् । समवायस्य च नित्यत्वेनाङ्गीकारात् तन्निर्वाहाय घटे नष्टेऽपि सूक्ष्मघटसत्त्वमङ्गीकुरु। ननु जन्यसम्बन्धसत्त्व एव संबन्धिसत्त्वस्य नियामकत्वमिति चेद्, अत्रापि गन्धातिरिक्ते एव गुणे द्रव्यसत्त्वस्य नियामकत्वमिति तुल्यम् । ननु संबन्धिनामनित्यत्वात् संबन्धस्य च नित्यत्वात् तदन्यथानुपपत्त्या जन्यपदोपादानम्, अन्यत्रोपलम्भानुपपत्तौ सत्यामपि तदवयवसत्त्वेनैवोपपत्तौ गन्धातिरिक्त इति व्यर्थं विशेषणं गौरवादिति चेन्न । प्रामाणिकत्वात् । दृश्यते हि विविधचर्मपुटवे-

ष्ठितस्यापि मृगमदस्य गन्धोपलम्भो वणिक्सार्थेषु । नहि तत्र त-द्वयवनिर्गमापूर्वतत्प्रवेशौ संभवतः । किञ्चैवं गन्धोपलम्भनमयं प्रसारितमुखस्य तद्रसोपलब्धिप्रसङ्गः । तेषामवयवानां योग्यत्वात् । अन्यथा गन्धोऽपि नोपलभ्येत, गन्धस्योपलम्भे नियामकाभावा-च्च । नन्वदृष्टमत्र तथेति चेद्, अहो !! गौरवभीतिर्वानिदूकस्य । य-द्वयवनिर्गमनं, पुनस्तदवयपूरणं, तद्धेतोरदृष्टस्य च कल्पनं, रसा-द्यनुभवप्रतिबन्धकादृष्टान्तरस्य च कल्पनं वदतोऽप्यसंकोचस्तुण्ड-स्य, गन्धातिरिक्तेतिमात्रकथने संकोचः । किञ्च, उग्रगन्धस्य क-स्यचित् कुसुमस्य लशुनादेर्वा स्पर्शमात्रेऽपि ततो मुहुर्मृत्स्नया क्षा-लनेऽपि करस्य न तद्गन्धापगमोऽनुभूयते । स्पर्शमात्रलग्नतद्वय-वानां सकृत्प्रोञ्छनेऽप्यसहिष्णूनां सकृत्क्षालनेऽपि न स्थितिसंभवः, कुतस्तरां मुहुस्तथा करणे । अतो द्रव्याधिकदेशवत्त्वं गन्धस्य म-न्तव्यम् । विनश्यदवस्थगुणानामनाश्रितत्वेनाङ्गीकारो यथा तत्र, तथा द्रव्याधिकदेशवृत्तित्वेनानुभवेऽपि कुरुष्व । अत एव सूत्र-कारोऽपि सिद्धं दृष्टान्तमाहेमामेवाशङ्कां परिहर्तुमणुत्वसाधने, व्य-तिरेको गन्धवदिति । श्रुतिरपि, यथा वृक्षस्य संपुष्पितस्य दूराद् गन्धो वात्येवं पुण्यस्य कर्मणो दूराद् गन्धो वातीति । अत्र तद-वयवासत्त्वनिरूपणार्थमेव दूरपदम् । दार्ष्टान्तिके तु कीर्तेरेव ग-न्धत्वं तदसाधारणधर्मत्वादिसाधर्म्येण । किञ्च, हृदि ह्येष आ-त्मा, स वा एष आत्मा हृदि योऽयं विज्ञानमयः प्राणेषु हृद्यन्त-र्ज्योतिः पुरुषः, गुहां प्रविष्टावित्यादिश्रुतिभिर्हृदयदेशे जीव-संस्थितिरुक्ता । सा त्वणुत्व एवोपपद्यते । तदनन्तरं च स्वचैतन्ये-न गुणेन सकलशरीरव्यापित्वं दर्शयति । आलोमभ्य आनखाग्रे-भ्य इति । एतेन सर्वमनवद्यम् ॥

एवं दूषितेऽणुत्वे प्राचां संमतिपूर्वकं तद्व्युत्पादयन्ति ।

अत्र वदन्तीत्यादि ॥ एवमाक्षेपे प्राञ्च एवमुत्तरं वदन्तीत्यर्थः ॥ ननु समवायेत्यादि ॥ गन्धातिरिक्तेति ॥ इदं प्रतिबन्दित्वायोक्तं, न तु सिद्धान्तत्वेनेति ज्ञेयम् । स्यादेवेत्यादिना । द्रव्याधिकगुणान्तरान्तरोपलम्भस्यापि पूर्वमभ्युपगतत्वात् । नचाप्रामाणिकत्वम् । शब्दस्य पृथिव्यादिपञ्चगुणत्वेन भेर्यादिभ्योऽधिकदेशवृत्तित्वस्य दूरस्थवह्न्यौष्ण्यस्य सूर्यादिप्रभायाः निम्बविशेषच्छायास्थितिमात्रेण मुखे कटुकत्वस्यानुभवसाक्षिकत्वात् । इदं यथा तथा प्रस्थानरत्नाकरे व्युत्पादितमस्माभिः । विशेषणवैयर्थ्यमनुभवबलेन परिहरन्तो गौरवस्य प्रामाणिकत्वं व्युत्पादयन्ति । दृश्यत इत्यादि ॥ ननु मास्त्वपूर्वे तत्प्रवेशः परं निर्गमस्तु न वारयितुं शक्यः । ततो भारापगमस्यानुभवसाक्षित्वादित्यत आहुः ॥ किञ्चैवमित्यादि ॥ योग्यत्वात् । उद्भूतगुणवत्त्वात् । ननु मास्त्वदृष्टकल्पनम् । तथापि त्रुटौ रूपवदेतेषु गन्धस्यैवोद्भूतत्वकल्पने कोऽपि न दोष इत्यत आहुः ॥ किंचेत्यादि ॥ गुणानां द्रव्याविनाभावात् तत्रापि द्रव्यावयवसत्त्वमङ्गीकार्यमित्याशङ्क्य प्रतिबन्दिकथनमुखेनाश्रितत्वाङ्गीकारे युक्तिं सूचयितुं, विनश्यदित्यादि ॥ तथाच विनाभावस्य त्वन्मतेऽप्यभावाद्विद्यमानावस्थगुणानामुत्कटं विशेषणं दत्त्वा तादृशानुभवेऽपि कुरुष्वेत्यर्थः । सूत्रोक्तं पुष्णन्ति ॥ अत एवेत्यादि ॥ ननु गौतमस्यापि महर्षित्वान्न व्यासोक्तमेकान्ततः साधीय इत्यत आहुः ॥ श्रुतिरित्यादि ॥ तथाच श्रुतिसिद्धत्वाद्व्यासोक्तमेव साधीय इत्यर्थः ॥ धर्मत्वादिति ॥ आदिपदेन तज्जन्यत्वम् । एतेन सर्वमनवद्यमिति ॥ गन्धस्य द्रव्याधिकदेशवृत्तितास्थापनेन सर्वम् आलोकादेरपि तथात्वं निर्दुष्टम् । तथाह जयतीर्थः । आलोको रूपमेव । द्रव्यत्वे तु व्योम्नि वर्तमानस्य तस्य तद्व्यतिरेकेण तद्रूपग्रहणापत्तेः । किञ्चालोकः किं कार्यं द्रव्यं नित्यं वा । नान्त्यः । तथा सति परमाणुत्वेनाप्रत्ययप्रसङ्गात् । आद्ये किं दीपादेरन्यस्य वा । नाद्यः । कारणं विहायान्यत्र वृत्तेरभ्युपेतत्वात् । तथाऽभ्युपगमे दीपाद्यनुविधानाभावप्रसङ्गाच्च । नेतरः । दीपप्रकाश इत्यादिप्रयोगानुपपत्तिप्रसङ्गात् कारणान्तरादर्शनाच्चेति । वस्तुतस्त्वालोकोऽत्र मणेरेव ग्राह्यः । दीपादेर्ग्रहणे प्रकाशाश्रयसूत्रविरोधापत्तेरिति ॥

यत्तु चैतन्यस्य सर्वशरीरव्यापित्वे जीवो नाणुः स्यात् । चैतन्यमात्रस्वरूपत्वादेव तस्य । औष्ण्यप्रकाशात्मकस्याग्नेरिवेत्यग्निदृष्टान्तेन चैतन्यात्मकत्वं जीवस्य साधयन्तोऽणुत्वं बाधयन्तो व्यापकत्वं वदन्ति केचित् । न तद्विद्वदादरणीयम् । प्रज्ञया शरीरं समारुह्येति करणत्वेन प्रज्ञायाः श्रुतौ निरूपणात् तस्य च भेद एव युक्तत्वात् । तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति च श्रुतौ विज्ञानस्य कर्मत्वेन निरूपणाच्च विज्ञानं गुण एव । अत एव सूत्रकारेणाप्युक्तं, पृथगुपदेशादिति । अपिच, औष्ण्यमात्रस्यैव वन्हिस्वरूपत्वं न वक्तुं शक्यम् । मणिमन्त्रादिनौष्ण्यानुपलम्भेऽपि वह्न्युपलम्भात् । औष्ण्यशैत्यादेः स्पर्शधर्मवत्त्वेन वह्नेर्द्रव्यत्वहानिश्च । नापि प्रकाशात्मकत्वम् । तप्तवारिस्थतदनुपलम्भप्रसङ्गात् । किञ्च, स यदास्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामति ये के चास्माल्लोकात् प्रयान्ति चन्द्रमसमेव ते स वै गच्छन्तीति तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मण इति श्रुत्युक्त्या जीवस्य देहादुत्क्रान्तिः परलोकगतिश्च पुनरागतिश्चाणुत्व एव घटते, न तु व्यापकत्वे । स यथा महाराजो जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्तते इति, एवमेवैष एतत्प्राणान् गृहीत्वा स्वे शरीरे यथा कामं परिवर्तते स्वयं विहृत्येत्यादिश्रुत्युक्तपरिवर्तनविहारावप्यणुत्वम् ऋते नोपपद्येते । ननु तत्त्वमसीत्याद्यभेदबोधकश्रुत्या जीवो ब्रह्मत्वेन निरूप्यते, अणुत्वे तु तदनुपपत्तिरिति चेन्न । औपचारिकत्वात् । अमात्ये राजपदप्रयोगवत् । नहि जीवे कश्चन स्वाभाविको गुणोऽस्ति । प्रज्ञाद्रष्टृत्वादयश्च भगवद्गुणा एव । तथाच तद्गुणैरेवास्योत्तमत्वाद् अंशत्वाच्च तद्व्यपदेशः । जडवैलक्षण्यं च तत एव । ननु कथमेवावगम्यते, औपचारिकमेव तदिति चेद्, यत एव सूत्रकारोऽपि न्यरूपयत्, तद्गुणसारत्वात्तु तद्व्यपदेश इति ।

तथाचाणुपरिमाणस्यैव पूर्वोक्तन्यायेन ब्रह्मणः सकाशान्निर्गतस्य ब्रह्मणः स्वसेवार्थमेव निजैश्वर्यस्य निर्विषयत्वपरिहाराय च तथा प्रकटीकृतस्यात एव सहजहरिदासस्य तदंशत्वेन ब्रह्मरूपस्य च निजनिसर्गप्रभुश्रीगोकुलनाथचरणकमलदास्यमेव स्वधर्मः । तेन चातिसंतुष्टः स्वयं प्रकटीभूय निजगुणाँस्तस्मै दत्वा स्वस्मिन् प्रवेशयति स्वरूपानन्दानुभावार्थम् । अथवाऽत्यनुग्रहे निकटे स्थापयति ततोऽधिकरसदास्यकरणार्थमिति निगर्वः ॥

सांख्यादिमते चोद्यमाहुः ।

यत्त्वित्यादि ॥ तद्दूषयन्ति ॥ न तदित्यादि ॥ प्रक्षयेत्थारभ्योपपद्येत इत्यन्तानि दूषणानि सौत्राण्येव ज्ञातव्यानि । अत्र श्रुतार्थापत्त्या मायावादी पुनरणुत्वे प्रत्यवतिष्ठते ॥ ननु तत्त्वेत्यादि ॥ परिहरन्ति ॥ नेत्यादि ॥ औपचारिकत्वादिति ॥ ब्रह्मत्वस्य तथात्वात् । गौण्या प्रयोजकं व्युत्पादयन्ति ॥ न हीत्यादि ॥ अंशत्वादिति ॥ अविवेककृतांशत्वात् ॥ तत एवेति ॥ उक्तहेतुभ्यामेव । पूर्वं जीवस्वरूपं किम्प्रकारकमित्याकाङ्क्षायाम्, अग्रे वक्ष्याम इति प्रतिज्ञातं प्रप्रकारवैशिष्ट्यमेव निरूपितम् । तेन सिद्धमाहुः ॥ तथाचाण्वित्यादि ॥ अनुच्छित्तिधर्मेति ॥ श्रुत्या सहजाणुपरिमाणस्य जीवस्य प्राणधारणप्रयत्नवतः पूर्वोक्तन्यायेन विस्फुलिङ्गन्यायेन ब्रह्मणः सकाशान्निर्गतस्य विभक्तस्य ब्रह्मणः स्वसेवेत्याद्युक्तप्रयोजनद्वयार्थं तथा दीनत्वादिधर्मवत्तया प्रकटीकृतस्य, अत एवाऽपारिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियम इति वेदस्तुत्यादिवाक्यान्यथानुपपत्तेरेव । ततोऽधिकरसदास्येति । सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत * दीयमानं न गृह्णन्ति विना मत्सेवनं जना इत्यादिवाक्यादैक्यापेक्षयाऽप्यधिकरसदास्येत्यर्थः ॥ निगर्वः = निश्चयः । शेषं स्फुटम् । एवञ्च जीवे परिमाणनैसर्गिकशेषा गुणाः क्रिया चागन्तुका इति बोधितम् ।

केचित्तु जीवाणुत्वात्मभगवत्प्रवेशतत्साधनभगवद्भजनाग्रसहिष्णवोऽणुत्वसाधकोत्क्रान्त्यादिसूत्रदशकं पूर्वपक्षत्वेनोक्त्वा, तद्धु-

णसारत्वात् तदिति सूत्रं सिद्धान्तीयत्वेन वदन्तस्तदर्थं चोपाधिगुणरूपाणुत्वादिप्रयुक्तो जीवेऽणुत्वादिव्यपदेश इति निरूपयन्तो जीवस्य व्यापकत्वं साधयन्ति ॥ तत्रेदमुच्यते, भवेदेतदेवं यद्यौपाधिकजीवत्वं स्यात् । तदेव तु न संभवति श्रुतिस्मृतिन्याययुक्तिविरोधादिति पूर्वमेव निरस्तत्वात् । किञ्च बुद्ध्युत्क्रान्त्यादिभिरेव जीवस्योत्क्रान्त्यादिव्यपदेशोऽनुपपन्नः । नह्युपाधेः पूर्वमेवोपहितस्योत्क्रान्त्यादिः संभवति । श्रुतिश्च, तमुत्क्रामन्तं प्राणोऽनूत्क्रामतीत्यादिना जीवोत्क्रान्त्या सर्वोत्क्रान्तिं वदति । तथा च विरोधः । नचोपाधिगुणानां सारत्वं युज्यते । अनर्थरूपत्वात् । किन्तु भगवद्गुणानामेव । किं बहुना, प्रस्थापादिषु विहारादिचेतनधर्मबाधकस्वयंविहृत्येत्यादिश्रुतिन्यायसहस्रबाधितत्वात् केवलं भगवदाज्ञासीमापरिहृतप्रवर्तितमार्गानुसारित्वात् तत्पक्षस्य लिखनेनालम् । आभास एव चेति सूत्रं तु यथानाचारिब्राह्मणे ब्राह्मणाभासप्रयोगोऽखिलब्राह्मणधर्माणामभावात् । तथाऽऽनन्दांशस्य तिरोधानाद् ब्रह्मधर्माणां सर्वेषामभावादंशत्वेन तद्रूपत्वाच्च तदाभासो जीव इति परं, नत्वलीक इति पूर्वमेवावोचाम ॥

शाङ्करादिमतमाहुः ।

केचिदित्यादि ॥ परिहरन्ति ॥ तत्रेत्यादि ॥ उत्क्रान्त्यादिसूत्राणां पूर्वपक्षरूपत्वं दूषयन्ति ॥ किञ्चेत्यादि ॥ तद्याख्याम् । तद्गुणसारसूत्रार्थं दूषयन्ति ॥ नचेत्यादि ॥ विशेषदूषणे हेतुं बोधयन्ति ॥ किं बहुनेत्यादि ॥ ननु यद्यंशत्वं व्यासोऽभिप्रेयात्तदा, आभास एव चेति न सूत्रयेदिति शङ्कायां तदुक्तं पाठमुपगम्य सूत्रार्थमाहुः ॥ आभासइत्यादि ॥ ब्रह्मधर्माणामिति ॥ असाधारणानां तेषाम् ॥ अलीक इति ॥ आभास इति शेषः ॥ रामानुजाचार्यास्तु—आभास इति पाठमङ्गीकृत्य जीवस्य ब्रह्माभेदसाधिका युक्तय आभासा इति व्याचक्रुः । एवं भिक्षवेऽपि । एवमत्र सविशेषनिर्विशेषयोस्तात्त्विकातात्त्विकभेदनिरासायानुपाधित्वं दृढीकर्त्तुं, नन्वास्तां शुद्धमित्यारभ्यावोचामेत्यन्ते-

न ग्रन्थेन श्रुतार्थापत्तिपरिहारपूर्वकं जीवस्य ब्रह्मांशत्वं निरूपितम् । तेन जीवस्य ब्रह्मतादात्म्यविभागयोः समर्थनाद् ब्रह्मणो जीवकर्तृत्वमपि समर्थितम् । अतः परं सर्वाधारत्वं समर्थयितुं जडोपादानत्वे विप्रतिपत्तिं दर्शयन्ति । स्यादेतदित्यादि ॥ सर्वाधारत्वाङ्गीकारे वक्ष्यमाणो दोषः स्यादिति समवायित्वमयुक्तमित्यर्थः । समादधते ॥ मैवमित्यादि ॥ एवं ब्रह्मणः सर्वाधारत्वं समर्थितम् । अतः परं ताच्छक्तित्वं समर्थयितुमाहुः ॥ ब्रह्मेत्यादि, मन्तव्यमित्यन्तम् ॥ गुडजिह्विकेति ॥ जिह्वेव जिह्विका । प्रतिकृतौ कन् । गुडयुता जिह्विका गुडजिह्विका । सा यथा बालस्यौषधपानार्थमुद्योज्यमानाऽपि, न तन्मात्रतथात्वपर्यवसन्ना । तथेदं समवायित्वस्य शब्दमूलत्वाङ्गीकरणं ब्रह्मणो विरुद्धनानाशक्त्याधारतायाः श्रौतत्वबोधकं, न तु समवायित्वमात्रं तथात्वपर्यवसन्नमित्यर्थः ।

स्यादेतत् । शुद्धस्यैव कर्तृत्वेऽपि निमित्तत्वमात्रमस्तु कुलालन्यायेन, नतु समवायित्वमपि । तथा सति ब्रह्मणो विकृतत्वापातो मृत्पिण्डवत् । सावयत्वापातश्च । कार्यस्यानर्थरूपत्वेन तद्रूपत्वस्य वक्तुमयुक्तत्वं चेति चेन्मैवम् । यदि स्वबुद्धिकल्पितं ब्रह्मणः कर्तृत्वं स्याद्, न स्यात् समवायित्वम् । किंतु श्रुतिसिद्धम् । सा च स्वतःसिद्धप्रमाणभावा । प्रमाणस्य ह्ययं स्वभावो यद् यथास्थितं वस्तु प्रमापयति, न तु स्वनिरूपकप्रकारं निर्मिमीते । तथाच श्रुतिरपि यथास्थितं ब्रह्म प्रतिपादयतीति, न पर्यनुयोगार्हा । विकृतत्वादिधर्माश्च लोके समवायिषु दृश्यन्ते । तथाचोभयरक्षायै ब्रह्माविकृतमेव समवायि, लोके तादृशमेव समवायित्वमिति व्यवस्था मन्तव्या । अत एव सूत्रकारो ब्रह्मणः समवायित्वं न युक्तिगम्यं, किन्तु श्रुत्येकगम्यमित्याह, श्रुतेस्तु शब्दमूलत्वादिति । ब्रह्मसमवाय्यविकृतं चेत्यपि गुडजिह्विका । वस्तुतस्तु विरुद्धसर्वधर्माश्रयमपि । तथाहि, आत्मा वारे श्रोतव्यो मन्तव्यः, यतो वाचो निवर्तन्ते, तदेजति तन्नैजति, अपाणिपादो जवनो ग्रही-

स्यादेतत् । अत्र नैवं निर्णयः संभवति । नह्येकं वस्तु स्वत एव सविशेषं निर्विशेषं चेत्यवधारयितुं शक्यं,विरोधात् । ननु सर्वगतत्वेन पृथिव्याद्युपाधिसंबन्धोऽस्तीति तन्निबन्धनमस्थूलत्वादिकम् । तथाहि अस्थूलेऽस्थूलोऽनणावनणुरुच्चावचकर्तर्युच्चावचकर्तोच्चावचकामे चोच्चावचकामः पृथिव्यां सर्वगन्धो जलादावगन्ध इत्युभयरूपत्वमुत्पत्स्यत इति न विरोध इति चेन्मैवम् । नह्यौपाधिकत्वे वस्तुस्वभावता संभवति । नहि जपाकुसुमारुणिमानं गृह्णन् स्फटिको रक्तो भवति । न वा पटोऽरुणांश्चित्रो वा भवन् द्विरूपो भवति । तत्रावयवावच्छेदकल्पनया तथा वचनेऽपि ब्रह्मणि न तथा वक्तुं शक्यम् । निरवयवत्वात् । तस्मादाविद्यकत्वादुपाधीनामस्तसमस्तविशेषं तदिति प्रतिपत्तव्यम् । नच सविशेषस्यापि श्रौतत्वान्निर्विशेषस्यैव बाधो वक्तुं शक्यः परिच्छेदापातात् । सविशेषस्य परिच्छिन्नत्वात् । तेषां प्रत्येकं भिन्नत्वेन ब्रह्मानेकत्वप्रसक्त्यैकमेवाद्वितीयमिति श्रुतिविरोधश्च । समो मशकेन समो नागेनेत्यादिषु चैकस्यैवानेकोपाधिसम्बन्धकृतपरिमाणं श्रूयते । तच्च स्वतो निर्विशेषत्व एवोपपद्यते । अन्यथोपाधीनामव्यापकत्वेनान्योन्याश्रयाश्रयिभावाभावाच्च सर्वपरिमाणवत्त्वं भज्येतैकस्य ब्रह्मणः । किञ्च करचरणादिविशेषाणां लौकिकत्वात् स्वरूपस्य चालौकिकत्वाद् ब्रह्मणि लौकिकनिषेधो युक्तः । अलौकिकापेक्षया लौकिकस्य जघन्यत्वात् । नच तेषामप्यलौकिकत्वात् तद्वत्त्वमिति ब्रह्मणि वक्तुं शक्यम् । तदलौकिकत्वकल्पनेन ब्रह्मणि सर्वभवनसमर्थविरुद्धसर्वाधारत्वादिरूपाऽलौकिकशक्तिकल्पनेन च गौरवात् । अस्थूलादिश्रुतिविरोधेन तत्कल्पनमप्यशक्यम् । सर्वत इत्यादि तद्बलेन शक्यत्वेऽप्यतद्दौर्बल्यमप्युक्तम् । अन्यच्च । नहि सविशेषनिरूपिका श्रुतिर्ब्रह्मस्वरूपं निरूपयितुं प्रवृत्ता । येन त-

न्निरूपितमत्यन्तलौकिकत्वादिकं न कल्प्यम् । किन्तु क्लृप्तमेवेति स गौरवादिदूषणग्रास इत्युच्यते । किन्तु तस्य दुर्ज्ञेयत्वे यथाकथंचित् तत्प्रवणत्वे चित्तस्य शुद्धिर्भविष्यति ततः स्वयमेव प्रसन्नस्तत्स्वरूपं ज्ञास्यतीत्यधिकारसिद्ध्यर्थमुपासनां वक्तुं भावनासुगमत्वाय च लौकिकप्रसिद्धविशेषवत्तदनुवदति । ततोऽधिकारे सिद्धे कीदृक् तदनुभूयते इत्याकाङ्क्षायां श्रुतिरस्थूलमनण्वित्यादिना तत्स्वरूपं निरूपयति । अत एव, अरूपवदेव हि तत्प्रधानत्वात् इति सूत्रकारोऽप्याह । नचैवं सति सविशेषरूपकश्रुतिवन्निर्विशेषकरूपाणां स्वरूपमात्रनिरूपणं विहायान्यत् प्रयोजनं घटते । तस्य दृश्याविषयत्वात्, तत् केन कं पश्येदित्यादिश्रुतम् । अत एव निषेधमुखेनैव निरूपयति, अथात आदेशो नेति नेतीति, अन्यदेव तद्विदितादथो अविदितादित्यादिना । एवं च सति निर्विषयज्ञानस्वरूपत्वम्निरुपाधिकस्यापि स्वरूपत्वमेव भवेदिति तद्व्यावृत्त्यर्थं चित्स्वरूपत्वमाह । स यथा सैन्धवघनो अनन्तरो बाह्यः कृत्स्नो रसघन एवैवं वारे अयमात्माऽनन्तरो बाह्यः कृत्स्नः प्रज्ञानघन एवेति ॥ अन्यच्च, द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चेत्युपक्रम्य रूपद्वयं प्रतिपाद्य पुनः पठ्यते, अथात आदेशो नेति नेतीति । तत्रेतिशब्दस्य संनिहितावलम्बनत्वम्, इति ह स्मोपाध्याया ऊचुरित्यादिषु दृश्यते । प्रकृतेऽपि पूर्वनिरूपितरूपद्वयस्य सन्निहितत्वेन तन्निषेध एव ब्रह्मणि नेति नेतीत्यनेन प्रतिपाद्यते । एवं सति विशेषनिरूपिकाः श्रुतयो निषेध्यकोटिनिरूपिका इति सिद्धम् । निषेधश्चैतेषामविद्याकल्पितत्वे एव संगच्छते । नहि वस्तु सन्निषेधार्हं भवति । तदेव ब्रह्म त्वं विद्धि । नेदं यदिदमुपासते इति श्रुत्योपासनाविषयाणामब्रह्मत्वोक्तेश्च । तस्मान्निर्विशेषमेव ब्रह्मेति मन्तव्यम् । नचैतादृशस्याविषयत्वात् कश्चिद्धीर इत्यादिश्रुत्या च

विषयत्वनिरूपणान्नैवमिति सांप्रतम् । पूर्वोक्तन्यायेन सर्वश्रुत्य-विरोधचिन्तने प्रापञ्चिकधर्माणामविद्याकल्पितत्वावधारणेनात्रापि तत्समानयोगक्षेमत्वस्योचितत्वात् । तदा द्रष्टृदृश्यभावः क्व निर्विशेषतदवगतौ च तत् केन कं पश्येदित्यादिना तन्निषेधाद्ध्येव-मवगम्यते । अविद्याकार्यस्य तद्दर्शनस्य सत्त्वात् तदा न सर्वात्म-नाऽविद्यानाशोऽपि, येनाविद्या तदा नष्टेति तद्दृश्यत्वस्य नावि-द्यकत्वमिति कथनं स्यात् । किंच, सविशेषस्य सूर्यदीपादिप्रकाश्य-त्वकथनेन व्यवहार्यत्वेन चाक्षुषत्वेन क्रियादिमत्त्वेन च कथं ब्रह्म-त्वमवधारयितुं शक्यम् । यतो, न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः ॥ तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति, न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वेति, यत्तदद्रेश्यमग्राह्यमिति, निष्कलं नि-ष्क्रियं शान्तमित्यादिभिः श्रुतिभिस्तद्विरुद्धं तन्निरूप्यते । अत एव सू-त्रकारोऽप्याह, प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय इति । अस्यार्थस्तु नेति नेतीति श्रुतिः प्रकृतं यदेतावत् पूर्वोक्तं मू-र्तामूर्तलक्षणं रूपद्वयं तद्भावं निषेधति ब्रह्मणि । तर्हि तत्सद्भावे किं प्रमाणमत आह, ततो ब्रवीति च भूयः । ततो निषेधानन्तरं, नह्येतस्माद् ब्रह्मणः परमन्यदस्तीति धर्मिसद्भावं श्रुतिः स्वयमेव ब्रवीतीति च भूयः । एवं सति धर्मिणोऽन्यस्याविद्यकत्वं सिद्ध-मिति निर्विशेषमेव तदिति प्राप्ते ।

अत्र विरुद्धधर्माश्रयत्वस्यायुक्तत्वं मन्वानो निर्विशेषवादी पुनः प्रत्यवतिष्ठते ।

स्यादेतदित्यादि ॥ नैवमिति ॥ न श्रुतिमात्रेण । तथाच श्रुतावपि युक्तिपूर्वकं निरूपणदर्शनाद्युक्त्यादिविरोधे श्रुतिरप्रयोजिकेत्यतस्त-थेत्यर्थः । तात्त्विकोपाधिवादिकृतां समाधिमाशङ्कते ॥ नन्वित्यादि ॥ इतीति ॥ उपाधिकृतत्वात् । तं दूषयति ॥ मैवमित्यादि ॥ उपाधि-

सम्बन्धेनावगम्यमानमणुत्वादि किं स्वाभाविकत्वेनोपगम्यत उतारोपितत्वेन वाऽऽगन्तुकत्वेन । क्रमेण त्रयं दूषयति ॥ नहीत्यादि, द्विरूपो भवतीत्यन्तेन ॥ अरुणो भवतीति ॥ उपधायकोपाधिरूपं गृह्णन् स्वाभाविकं स्वच्छत्वं न त्यजतीत्यर्थः । रूपस्याप्यवृत्तित्ववादिमते औपाधिकरूपेणापि द्वैरूप्यं सम्भवतीति तद्वैधर्म्यं ब्रह्मण्याह ॥ तत्रेत्यादिसिद्धमाह ॥ तस्मादिति ॥ त्रिविधस्याप्यौपाधिकधर्मस्याशक्यवचनत्वादुपाधीनां तात्त्विकत्वे ब्रह्मण्यज्ञत्वादिदोषे प्रसक्तेरुपाधीनामवास्तवमङ्गीकृत्य ब्रह्मणो निर्विशेषत्वमङ्गीकार्यमित्यर्थः । ननूपाधीनामाविद्यकत्वे असत्त्वेनौपाधिकरूपनिरूपकानेकश्रुतिबाधापत्तेर्निर्विशेषस्यैव बाधो युक्त इति चेत्तत्राह ॥ नचेत्यादि ॥ परिच्छिन्नत्वे को दोष इत्याकाङ्क्षायां श्रुतिसूत्रविरोध एव दोष इति बोधयितुं न भेदादिति चेन्न प्रत्येकमतद्वचनादिति सूत्रार्थमाह ॥ तेषामित्यादि ॥ ननु समो मशकेनेत्यादिश्रुत्यैकस्य नानापरिमाणवत्ताश्रावणाल्लौकिकयुक्तेरप्रयोजकत्वेन ब्रह्मण औपाधिकानेकरूपवत्त्वेऽपि न ब्रह्मानेकत्वापत्तिरित्यत आह ॥ सम इत्यादि ॥ ननु स्वतः सविशेषत्वे कुतो नोपपद्यते इत्याशङ्कायामाह ॥ अन्यथेत्यादि ॥ अन्यथा स्वतः सविशेषत्वे विशेषभूतस्वपरिमाणापायस्याशक्यवचनत्वात् । उपाधीनां परिमाणान्तरप्रयोजकानां मशकनागादीनां दिक्कालादिवद् व्यापकत्वे तेषां परस्पराश्रयाश्रयिभावात्तदवच्छिन्नस्य ब्रह्मणोऽपि तत्तत्परिमाणवत्तायां सर्वपरिमाणवत्त्वं स्याद्पीह तु तेषां व्यापकत्वेन परिच्छिन्नत्वेनान्योन्याश्रयाश्रयिभावाभावाच्च तथा स्यादित्यर्थः । ननु मास्तूपाधिपक्षः । तथापि ब्रह्मणः सर्वसमर्थत्वाद्विरुद्धधर्माधारत्वाङ्गीकारे न कोऽपि दोष इत्यत आह ॥ किञ्चेत्यादि ॥ अत्र गौरवप्रदर्शनेन सर्वाधारत्वत इति हेतुद्वयमाक्षिप्तं ज्ञेयम् । अप्रयोजकत्वमपि तयोर्दर्शयति ॥ अस्थूलतेत्यादि ॥ उक्तमिति ॥ उपजीव्यतः श्रौतीति कारिकार्थव्युत्पादन एवोक्तमित्यर्थः । नन्वस्थूलादिवाक्यस्य लौकिकनिषेधपरत्वेनाविरोधात् सर्वत इत्यादीनां चालौकिकधर्मविधिमुखेन ब्रह्मपरत्वाद् दुर्बलत्वाभावेन तत्सिद्धालौकिकधर्माणां कल्पितत्वाभावेन गौरवस्य प्रामाणिकत्वेनादुष्टत्वाच्च कोऽपि दोष इत्यत आह ॥ अन्यच्चेत्यादि ॥ ननु सविशेषनिरूपकाणामुपासनार्थत्वमस्थूलादिवाक्यानामेव च ब्रह्मपरत्वमित्यत्र किं गमकमित्यत

आह ॥ अत एवेत्यादि ॥ अत एवेति ॥ यतः सविशेषश्रुतिरुपासनार्था, न तु स्वरूपनिरूपणार्था, अतो हेतोरेवेत्यर्थः । तस्य वृत्त्यऽविषयत्वादिति ॥ वृत्तिर्ज्ञानाभिव्यञ्जको मनोधर्मः । सा नेत्रकिरणद्वारा बहिर्निर्गच्छन्ती पुरःस्थितेन घटादिना विषयेण संसृज्य तदाकारा भवति । तदा तद्द्वारा निर्गतं साक्षिचैतन्यमपि तथा भवति । कुल्याद्वारा निर्गतमहासरःसलिलं केदारं प्राप्य तत्तद्वर्त्ताद्याकारतां यथाप्नोति तद्वत् । एवं जीवविषयचैतन्ययोरैक्ये विषयसाक्षात्कारवृत्त्यभेदाभिव्यक्तिपक्षः । उक्तरीत्या निर्गतायां वृत्त्युपारूढं जीवचैतन्यं विषयं गोचरयति वृत्तिद्वारको यस्तस्य संसर्गः सविषयोपराग इति चिदुपरागपक्षः । एवं प्रकारत्रयेणापि तस्य निर्विशेषस्य पूर्वोक्तवृत्त्यगोचरत्वादित्यर्थः । वृत्त्यविषयत्वे प्रमाणमाह ॥ तदित्यादि ॥ अत एवेति ॥ वृत्त्यविषयत्वेन दुर्ज्ञेयत्वादेव । ननु निषेधमुखेन निरूपणं न विशेषबाधकज्ञानदृष्टान्तेन निष्प्रतियोगिकाभावे रूपत्वस्यापि शक्यवचनत्वादित्यत आह ॥ एवं सतीत्यादि ॥ आहेति ॥ द्वितीये । मैत्रेयिब्राह्मणे आह । तथाच केवलज्ञानरूपत्वस्यैव निरूपणान्न विशेषसिद्धिरित्यर्थः । ननु, नेतीत्यत्रैतावत्त्वस्यैव निषेधो, न तूक्तरूपद्वयस्येत्यत आह ॥ अन्यच्चेद् इत्यादि ॥ तथाच प्रसिद्धार्थविरुद्धतथाकल्पनमित्यर्थः । प्रसिद्धार्थाङ्गीकारेण सिद्धिमाह ॥ एवं सतीत्यादि ॥ यत्र न विशेषनिषेधस्तापनीयादौ तत्रापि तं बोधयितुं श्रुत्यन्तरमाह ॥ तदेवेत्यादि ॥ सिद्धमाह ॥ तस्मादिति ॥ सविशेषश्रुतीनां निषेधको निरूपकत्वादुपासनाविषयाणामब्रह्मत्वाच्चेत्यर्थः । कश्चिदाशङ्का परिहरति ॥ नचेत्यादि । नैवमिति ॥ न यावद्विशेषराहित्यं सांप्रतमुचितम् ॥ पूर्वोक्तन्यायेनेति ॥ उपजीव्यत इति कारिकोक्तेन न्यायेन ॥ अत्रापीति ॥ कश्चिद्धीर इति श्रुतावपि ॥ एवमिति ॥ दृश्यत्वस्याविद्यकत्वम् । धर्मिणोऽन्यस्येति ॥ सविशेषस्य ॥ प्राप्त इति ॥ सर्वाधारत्वादित्यादिहेतुदूषणप्राप्तइत्यर्थः ।

वयं वदामः । विशेषाणामविद्याकल्पितत्वं वदन् वादी प्रष्टव्यः । का सा अविद्या, जीवगता ब्रह्मगता वा यत्कल्पिता विशेषाः । न तावदाद्यः । तस्या ब्रह्मगतधर्मकल्पने सामर्थ्याभावात् । तथाहि, कल्पना हि शुद्धब्रह्मणि वाच्या । तादृशस्य मनोव-

चक्षुरूप्यविषयत्वेनाधिष्ठानज्ञानाभावाज्जीवस्य तस्याः सम्बन्धस्तु दूरतरः । पराञ्चि खानीत्यनेनाविद्यासंबन्धीन्द्रियाणामविषय इत्युक्त्वा, तद्रहितेन्द्रियविषयत्वं, कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्नित्यनेन निरूप्यते । ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमान इति श्रुतौ ज्ञानवत एव तद्दर्शनमुच्यते । न हि तदा सास्तीति वक्तुं शक्यम् । ज्ञाननाश्यत्वेनाभ्युपगमात् । यद्धि पश्यन्ति मुनयो गुणापाये समाहिता इत्यादिस्मृतिविरोधश्च । ननु तदा द्रष्टृदृश्यभावस्य सत्त्वान्निर्विशेषतदवगतौ, तत्केन कं पश्येदित्यादिना तन्निषेधान्न सर्वात्मना अविद्यानाश इति तत्कल्पनैवं तत्रापीति चेत्, तर्हि ब्रह्मणो दृश्यत्वमप्याविद्यकं तव मनीषितम् । तथा सत्यविद्यया ब्रह्मणि निशेषकल्पनायां दृश्यत्वं, दृश्यत्वे च सत्यधिष्ठानज्ञाने सति तत्कल्पनमित्यन्योन्याश्रयः । निष्कलमिति प्रत्यगात्मानमितिपदेन चाविद्यारहितस्यैव दर्शनविषयत्वेनोक्तेस्तद्विरोधश्च । नच तत्र विषयत्वाविद्यकमेव, भेदनिरूपणात् । निष्कलादिपदं तु वास्तवाभिप्रायमिति वाच्यम् । प्रकृते कर्मतानुपपत्तेः । कश्चिद्धीर इत्यत्रेक्षणक्रियाकर्तृवाचकस्य प्रत्यगात्मपदातिरिक्तस्याभावादस्य चात्रावाचकत्वादीक्षणक्रियोक्त्यनुपपत्तिश्च । किञ्चैवं निर्विशेषब्रह्मदर्शनोच्छेदात् तन्निरूपकश्रुतीनां ब्रह्म वेद ब्रह्मैव भवति, तमेव विदित्वाऽतिमृत्युमेति, तस्मिन् दृष्टे परावरे, कश्चिद्धीरः प्रत्यगात्मानमैक्षदित्यादीनां, वेदैश्च सर्वैरहमेव वेद्यः, भक्त्या मामभिजानातीत्यादिस्मृतीनां चोपप्लवः । अपरं च, अवास्तवमिति कोऽर्थः ? । वस्तुनो नैसर्गिको धर्मो वास्तवस्तद्भिन्न आगन्तुको धर्मस्त्ववास्तव इति यदि, तदा मृदः पृथुबुध्नोदराद्याकाराणामप्यविद्याकल्पितत्वमेव शुक्तिकारजतवन्नतु कुलालेन दण्डादिसहका-

रेण जनितत्वमित्यागतम् । तथाच प्रत्यक्षविरोधः । क्वचिद् विनापि कुलालादिकं तदुत्पत्त्यनुभवप्रसङ्गत्वेन जलाहरणमपि क्रियेत जाग्रतैव । जलाहरणार्थिनो नियततो घटे प्रवृत्त्यनुपपत्तिश्च । तद्यज्ञानकल्पितमरुमरीचिकापाथसः पानार्थं पिपासोर्नियमेन प्रवृत्तिः संभवति । नच दोषदशायां प्रतीयमानः स इति वाच्यम् । इदमंशस्यापि तथात्वापत्तेः । नच तत्प्रयुक्तत्वे सतीति वाच्यम् । तिमिरोपहतनयनस्य नेत्रदर्पणाधानेन सूक्ष्मेष्वपि वर्णेषु स्थूलत्वभ्रमो वर्णप्रपा चैकेनैव जन्यत इति वर्णांशेऽपि भ्रमत्वापत्तेः । नच तस्मिन्नंशे तस्य गुणत्वमेव । अविद्यायामपि ब्रह्मांशे गुणत्वमेवाङ्गीकुरु । सर्वश्रुत्येकवाक्यतार्थमिदमपि त्वद्रीत्योच्यते वस्तुतस्तु ब्रह्मधर्मा सर्व एवानागन्तुका एव, यतो नित्याः । श्रुत्या तथैव निरूपणात् । तथाहि । न तस्य कार्यं करणं च विद्यते, न तत्समश्चाभ्यधिकश्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानक्रिया बलं चेति तत्सम्बन्धि यत्किञ्चित् कार्यं जन्यं नास्ति, किन्त्वजन्यमेव ॥ किञ्च तस्येति षष्ठ्या भेदो निरूप्यते । तथाच जीववत्स्वरूपातिरिक्ते ज्ञानक्रियादिषु करणमिन्द्रियादिकमपि तस्य नास्ति । आनन्दमात्रकरपादमुखोदरादित्वात् । अथवा नित्यत्वात्तद्धेतुभूतं करणं च नास्ति । अत एव, न तत्सम इत्यादि । जीवानामतादृशत्वात् । अत एव, सर्वस्येशान इति श्रुतिः । अत एव तद्दासा एव जीवा इति फलितम् । परा मनोवचसामपीदमित्थनया ज्ञातुमशक्या विविधा अनेकरूपाः शक्तयः । शक्तिस्वरूपविचारे ब्रह्मस्वरूपान्नातिरिच्यते इति ज्ञापनायैकवचनम् । तेनाचिन्त्यानन्तशक्तिमत्त्वमुक्तं भवति । सापि शक्तिः स्वाभाविकी, न त्वागन्तुकी । तथैव ज्ञानशक्तिः क्रियाशक्तिश्च स्वाभाविक्येव, न तु देहेन्द्रियव्यतिरेकेण ज्ञानक्रिये भवत इत्यर्थः ।

एवं सति नित्यं वस्तुसदविद्यया कल्पितमिति वक्तुं न शक्यम् । विरोधात् । तस्य किंचित् कार्यं कर्तव्यं नास्ति, करणमिन्द्रियादिकमपि नास्ति । अत एव, न तत्सम इत्यादि । यतः कर्तव्यं विनापि विविधाः शक्तयः, करणं विनापि ज्ञानादिमत्त्वं च श्रूयते । अतः सर्वा अपि शक्तयः स्वाभाविक्य इति व्याख्यानमपि नातिदुष्टम् । यद्यपि नित्यत्वेन सृष्टेः पूर्वमनन्तरं च तासां वर्तमानत्वान्नहि तदा किंचित् कर्तव्यमस्ति, तथापि सामान्यनिषेधपरत्वेन दुष्टमेव । ईक्षत्यधिकरणविरोधात् । तथाहि । सदेव सौम्येदमग्र आसीद् एकमेवाद्वितीयमित्युपक्रम्य, तदैक्षत बहु स्यां प्रजायेयेति, तत्तेजोऽसृजतेति । तथाऽन्यत्र, आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चन मिषत् स ऐक्षत लोकानु सृज इतीमाँल्लोकान् सृजत इत्यादि श्रुतेः सृष्टेः प्राग् ब्रह्मणोऽशरीरत्वं तेजःप्रभृतिलोककर्तृत्वं च मिथ्यावादिनाप्यङ्गीकार्यम् । अतः कर्तव्यांशसामान्यनिषेधस्तु नोपपद्यते । नहि तदा कश्चिज्जीवोऽस्ति । येन स्वाविद्यया तत्कर्तृत्वलक्षणविशेषः कल्प्यते । अस्तीति चेत् सदेवेतिश्रुतिविरोधः । एवंसति यथा स्वाभाविक्यो ज्ञानादिशक्तयः श्रुतिबलेनाङ्गीकृताः, अस्येति षष्ठ्या भेदेन निर्देशाद्धर्मरूपास्तथा, सर्वतः पाणिपादान्तं सर्वतोऽक्षिशिरोमुखमित्यादिश्रुतिस्मृतिबलेन स्वरूपभूतानन्दमात्रकरपादादीनामपि संभवान्न करणानामपि सामान्यनिषेध उपपद्यते । तस्मादस्मदुक्त एवार्थः ॥

तदुभयलिङ्गाधिकरणेन समाधातुं प्रतिजानते ।

वयं वदाम इति ॥ तत्र वादिना युक्तिविरोधं प्रदर्श्य विरुद्धधर्माधारत्वं दुष्यत इति पूर्वं तमेतं प्रतिवक्तुं पृच्छन्ति ॥ कासेति ॥ आद्यां दूषयन्ति ॥ नेत्यादि ॥ दूरतर इति ॥ अयमर्थः । शुक्तिरजतादिस्थले विषयावरकमज्ञानं चेद्रजतकल्पकं स्यात् सर्वान् प्रति स्यात् । साधारणत्वात् । तथा सत्यस्यरजतस्यापि तत्र रजताध्यासः

स्यात् । कस्य चिद्विशेषदर्शनदशायां तदभिभवे तस्य सर्वान् प्रत्यभिभूतत्वाद्विशेषदर्शनाभाववतांऽपि रजताध्यासनिवृत्तिश्च स्यात् । अतो विषयावरकमज्ञानं यथा तत्र न रजतकल्पकमेवं ब्रह्मावरकाज्ञानमपि । अतः परं तत्रैवात्रापि जीवावरकाज्ञानं तत्कल्पकमित्यवशिष्यते । तच्च विषयेण संबद्ध्यमानमेव कल्पकम् । अन्यथा शुक्त्यदर्शने विकल्पयेत् । सवन्धश्च तस्य मनोद्वारक एव । मनो यदेन्द्रियेण संसृज्यते तदैव स्वज्ञानोदयात् । यतो वाच इति पूर्वोक्तश्रुत्या च मनःसंसर्गे निवारिते द्वाराभावाज्जीवावरकलिङ्गशरीरनिष्ठायास्तस्याः सवन्धस्तथत्यर्थः । ननु मास्तु मनोद्वारकः सम्बन्धो बहिरिन्द्रियद्वारक एवास्तां बहिर्विषयकज्ञाने मनसोऽपीन्द्रियाधीनत्वादतो न कल्पनानुपपत्तिरित्याशङ्कायां प्रकारान्तरेण तत्सम्बन्धाभावमाहुः ॥ अपि वेत्यादि, विरोधश्चेत्यन्तम् ॥ तथाचाविद्यासम्बन्धदशायामिन्द्रियाणामपि द्वारकत्वाभावेन सम्बन्धाभावस्तदभावदशायां तु द्वारसत्त्वेऽपि कल्पिकाया एवाभाव इत्युभयथापि न तस्याः सम्बन्ध इति कुतः कल्पकत्वामित्यर्थः । पूर्वपक्षिणा निर्विशेषस्याविषयत्वं यदुपगतं तदनेन प्रत्युक्तम् । अविषयत्वश्रुतिविरोधस्त्वग्रे परिहार्यः । अभावदशायां पुनस्तस्याः सत्त्वमाशङ्कते ॥ नन्वित्यादि ॥ तत्कल्पनैव तत्रापीति ॥ तादृशस्य दृश्यत्वकल्पनैव श्रुतावपीत्यर्थः । तदानीं तत्सत्त्वमुपगम्यापि तदुक्तिं दूषयन्ति ॥ न हीत्यादि ॥ अविद्यारहितस्येति ॥ ब्रह्मण इति शेषः ॥ पुनः किञ्चिदाशङ्क्य परिहरति ॥ नचेत्यादि ॥ प्रकृते कर्मतानुपपत्तेरिति ॥ अविद्यालेशसत्तासमये वास्तवरूपस्यागोचरत्वाद्दर्शनक्रियाकर्मत्वानुपपत्तेः । तथाचैवमुपगमेऽपि विभक्तिश्रुतिविरोधो दुर्वार इत्यर्थः । स्फुटमन्यत् । पुनर्वास्तवरूपाभिप्रायमित्युक्तम् । तत्र वास्तवरूपमितरव्यावृत्त्या निर्णेतुमवास्तवपदार्थं विचारयन्ति ॥ अपरश्चेत्यादि, संभवतीत्यन्तम् ॥ तथाचागन्तुकस्यापि प्रत्यक्षादिना वास्तवत्वनिश्चयान्नैसर्गिको धर्म एव वास्तव इति नियमोऽसंगत इत्यर्थः । अवास्तवभिन्नो वास्तव इति विवक्षां दूषयितुमवास्तवपदार्थं विचारयितु विकल्पयन्ति ॥ नचेत्यादि ॥ स इति ॥ अवास्तवः ॥ इदमंशस्येति ॥ शुक्तिरजतस्थले इदं रजतमिति प्रतीयमानस्य तस्येत्यर्थः । दोषप्रयुक्तत्वे सति दोषदशायां प्रतीयमानम् । अवास्तव

इत्यपि दूषयन्ति ॥ नच तदित्यादि ॥ एकेनेति ॥ नेत्रदर्पणेन । तथाच वास्तवपदार्थस्य निश्चेतुमशक्यत्वादेषा विवक्षाप्यसंगतेति वास्तवरूपाभिप्रायमित्युक्तिरसंगतैवेत्यर्थः । ननूक्ता विवक्षा नासंगता, किन्तु नेत्रदर्पणस्य दोषत्वमेव क्वाचित्कमतो, न दोष इत्यत आहुः ॥ नचेत्यादि ॥ तस्येत्यादि ॥ नेत्रदर्पणस्य ॥ ब्रह्मांश इति ॥ अविद्यया प्रतीयमानब्रह्मांशे । तथाच । अविद्याप्युपकाराय विषवज्जायते नृणाम् । अनुग्रिताप्युपायेन बन्धायान्यायतो हि सेति मार्कण्डेये रौच्यमन्वन्तरे वाक्याद्यथा तेनकर्तृत्वादयो वास्तवा एव प्रतीयन्ते विषेण च क्षुधादिकं तथात्रापि तया दृश्यत्वकरचरणादिकं वास्तवमेव प्रतीयत इति सिद्धेरुक्तश्रुतिस्थे कर्मवाचकपदे वास्तवरूपविभागीकारोऽसंगत इत्यर्थः । अस्मिन् प्रकारे धर्माणां वास्तवत्वासिद्धावपि नैसर्गिकत्वासिद्ध्या श्रुत्यन्तरविरोधापरिहारादरुचिं सूचयन्ति॥त्वद्रीत्येति॥ दर्शनस्याविद्यकत्वमङ्गीकृत्येत्यर्थः॥ परिहाराय सिद्धान्तपक्षमाहुः ॥वस्तुत इत्यादि॥ तद्धेतुभूतमिति ॥ करादिहेतुभूतम् ॥ अत एवेति ॥ आनन्दमात्रकरादिमत्त्वादेव ॥ अत एवेति ॥ समाभ्यधिकराहित्यादेव । अन्यथा सर्वेशानत्वं निरङ्कुशं न स्यात् ॥ अत एवेति ॥ निरङ्कुशेशानत्वादेव । एकवचनश्रुतिविरोधं परिहरन्ति ॥ शक्तीत्यादि ॥ तनोति ॥ विविधत्वश्चावगेरनन्तत्वाद्बलशक्तिः । एवं सिद्धान्तवर्त्मना श्रुतिव्याख्यां मतान्तरीयव्याख्याने अविद्याया भावेन तदभावतस्तत्सम्बन्धाभावरूपं दूषणं बोधयितुं तत् प्रदर्शयति ॥ तस्येत्यादि ॥ उत्तरार्द्धव्याख्यानमाहुः ॥ यत इत्यादि ॥ अदोषे हेतुमाहुः ॥ नित्यत्वेनेत्यादि ॥ तदेति ॥ प्रलयकाले ॥ दोषे हेतुमाहुः ॥ तथापीत्यादि ॥ तथान्यत्रेति ॥ ऐतरेयब्राह्मणे ॥ मिषद्विति ॥ व्यापारं कुर्वत् । तेज प्रभृतिलोककर्तृत्वमिति ॥ तेजोऽबन्नादिकर्तृत्वं लोककर्तृत्वं चेत्यर्थः । कुतो वोपपद्यत इत्याकाङ्क्षायामाहुः ॥ न हीत्यादि, विरोध इत्यन्तम् ॥ करनिषेधेऽपीमामुपपत्तिमतिदिशन्ति ॥ एवं सति यथेत्यादि ॥ तस्मादस्मदुक्त एवार्थ इति ॥ सामान्यनिषेधप्रतिज्ञायाः सकृत्प्रवृत्तावगुण्ठनन्यायेनापार्थत्वात् कार्यरूपकरणादिविशेषनिषेधरूप एवार्थ इत्यर्थः । एवमिन्द्रियादीनामौतत्वव्युत्पादनेन गौरवदोषः परोद्दङ्कितः परिहृतः ॥

किंच, अविद्याकल्पनपक्षे तत्प्रसादेन तत्प्राकट्यतद्दर्शनाद्य-

नुपपत्तिः । तदर्थं तपस्यादितत्साधनप्रवृत्त्यनुपपत्तिश्च । नहि तपस्यादिसाधनानां दोषोद्भव एव फलम् । येन तेषु क्रियमाणेष्वेव तादृशो भ्रमोऽविद्यया जन्यत इत्युच्येत । तथा सति चित्तकषायशोधकत्वं साधनानां सर्वत्र श्रूयमाणं व्याहन्येत । दोषाधिक्यजनकत्वेन निन्दितत्वं च स्यात् । किंच पराञ्चि खानीतिश्रुत्याऽविद्यावादिन्द्रियाविषयत्वं, तद्रहिततद्विषयत्वं च प्रतिपाद्यते । श्रीमद्देवकीगर्भरत्नेनापि, नाहं वेदैर्न तपसा न दानेन न चेज्यया* शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथेतीतरसाधनासाध्यतोक्तिपूर्वकं, भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुनेति भक्त्यैकसाध्यत्वं दर्शनादीनां निरणायि । तथाचैवंविधश्रुतिस्मृतिविप्लवं कुर्वन् पारलौकिकसन्मार्गमात्रोच्छेदनाय प्रवृत्त आसुर एवेति सद्भिरुपेक्ष्यः । कल्पान्तकाले शरीरेन्द्रियाभावेन जीवानां भगवति प्रवेशाच्च कल्पनासामर्थ्याऽभावे सत्यपि नारायणशयनकथनाच्च । इत एव प्रलयानुपपत्तिरपि ज्ञेया ॥

सृष्टिसामयिकं तदीयकल्पनापक्षं पुनः प्रकारान्तरेण दूषयन्ति । किञ्चेत्यादि ॥ तत्प्रसादेनेति ॥ ज्ञानप्रसादेन विशुद्धसत्त्व इति, तमक्रतुं पश्यति वीतशोको धातुः प्रसादादिति श्रुतेर्ज्ञानप्रसादेन भगवत्प्रसादेन वा । तत्प्राकट्येति । तस्यैष आत्मा वृणुते तनुं स्वामिति श्रावितंतत्प्राकट्येत्यर्थः ॥ तदर्थमित्यादि ॥ तथाच कल्पनायाः सर्वकालसम्भवात् तथेत्यर्थः । ननु कल्पने चिन्ताया इव तपस्यादीनामपि साधनत्वान्न तत्करणानुपपत्तिरित्यत आहुः ॥ न हीत्यादि ॥ तथाचाविद्याया ज्ञानावरकत्वेन कल्पनादशायां ज्ञानतिरस्कार एव भवेन्न प्रसादो, नाप्यावरणभङ्ग इति न प्राकट्यादीत्यर्थः । ननु, यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति । * सिद्धिं तत्र विजानीयात्तस्मिन् स्वप्ननिदर्शन इति श्रुतौ यथा काम्यस्य कर्मणस्तादृग्भ्रमजनकत्वमेव तपस्यादीनामपि तादृशदोषजनकत्वमेव चेत् तत्राहुः ॥ तथा सतीत्यादि ॥ तथाच काम्यस्य कषायजनकत्वेन निन्दितत्वात्तद्-

दृष्टान्तेनात्र प्रत्यवस्थानं न युक्तमित्यर्थः । ननु, कः क्षेमो निजपरयोः कियानर्थः स्वपरद्रुहा भ्रमेणेत्यादिस्मृतौ तन्निन्दापि स्मर्यते एवेति-चेत् तत्राहुः ॥ किञ्चेत्यादि ॥ तथाच तपो मे हृदयं साक्षादित्यादौ तत्प्रशंसादर्शनाद्युक्तनिन्दापि काम्यतपस्यादिविषयैवेति तदनालोचनात् तथेत्यत उपेक्ष्य एवेत्यर्थः । ननु मध्वादिविद्यायां कल्पनोपदेशस्य स्वीकाराद्त्रापि तदङ्गीकारे को दोष इत्याशङ्कायां पूर्वोक्तमेव दोषं पुनः प्रकारान्तरेणाहुः ॥ कल्पान्त इत्यादि ॥ कल्पनापक्षो न युक्त इति शेषः । तथा सृष्टिदशायां तथाङ्गीकर्त्तु शक्यत्वेऽपि प्रलयदशायां तदशक्त्या सिद्धे विशेषस्य वास्तवत्वे, सृष्टिदशायामपि तदङ्गीकारो युक्त एवेत्यर्थः ॥ इत इति ॥ कल्पकाभावादेव ॥ ज्ञेयेति ॥ कल्पनापक्षदूषणत्वेन ज्ञेया ।

किंच, यो ब्रह्माणं विदधाति पूर्वमितिश्रुत्याद्युक्तप्राथमिकब्रह्मसृष्ट्यनुपपत्तिः । तदानीमीश्वरातिरिक्तस्याभावेन तत्कल्पकाभावात् । ईश्वरस्य च न कल्पकत्वं वक्तुं शक्यम् । ईश्वरत्वव्याहतेः । यो विदधातीतिश्रुत्युक्तमीश्वरकर्तृत्वं चापेयात् ॥ किंच सूत्रकारः सर्वेषां वेदानां ब्रह्मणि समन्वयं प्रतिज्ञाय तन्निरूपणार्थं प्रवृत्तः सन् निःसंदिग्धतत्पराणां निश्चितत्वादेव निरूपणमकृत्वा संन्दिग्धतत्पराणामेव, य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुरिति, अस्य लोकस्य का गतिराकाश इति होवाचेत्यादि, अथ यदतः परो दिवो ज्योतिर्दीप्यत इत्यादीनाम्, अन्तस्तद्धर्मोपदेशात्, आकाशस्तल्लिङ्गात्, अत एव प्राणः, ज्योतिश्चरणाभिधानाद् इत्यादिभिरधिकरणैर्महता प्रबन्धेन यन्निरूपयत्यतो यत्प्रकारकं श्रुतिर्निरूपयति तादृशमेव तद्ब्रह्मेति सूत्रकाराशय इति ज्ञायते । अन्यथा, य एषोऽन्तरादित्य इत्यादिश्रुतिनिरूपितस्वरूपाणां तादृग्जीवादिस्वरूपत्वे ब्रह्मस्वरूपत्वे वा तव मतेऽविद्याकल्पितत्वस्याविशिष्टत्वाद्ब्रह्मपरत्वमेवैतेषामिति न निर्णयं कुर्यात् ॥

दूषणान्तरमनुवदन्ति ।

किञ्चेत्यादि ॥ तथाच त्वदभिमतकल्पनानुपपत्तिरेव दोष इत्यर्थः । नन्वीश्वर एव तदानीं कल्पक इति चेत्तत्राहुः ॥ ईश्वरस्येत्यादि ॥ कल्पनायां व्यासाशयविरोधं स्फुटीकुर्वन्ति ॥ किञ्च, सूत्रेत्यादि, कुर्यादित्यन्तम् ॥ तद्धर्मोपदेशादिति ॥ स एष सर्वेभ्यः पाप्मभ्य उदित इति ब्रह्मधर्मोपदेशादित्यर्थः ॥ तल्लिङ्गादिति ॥ सर्वाणि वा ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्तीत्यादिश्रावितादब्रह्मलिङ्गादित्यर्थः ॥ अत एवेति ॥ सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहत इति श्रावितादब्रह्मलिङ्गादेवेत्यर्थः ॥ चरणाभिधानादिति ॥ एतावानस्य महिमा ततो ज्यायांश्च पूरुषः पादोऽस्य सर्वा भूतानि त्रिपादस्याऽमृतं दिवीति चरणाभिधानादित्यर्थः ॥ निरूपयतीति ॥ निर्णयं निरूपयति ॥ अन्यथेति ॥ तेषां ब्रह्मत्वे यदि सूत्रकारानुशयो न स्यात्तदेत्यर्थः ॥ निरूपितस्वरूपाणामिति ॥ निरूपितानि यानि स्वरूपाणि तेषाम् । तथाच मध्वादिसूत्रेऽपि सांख्यं प्रत्येव गौण्यापादनम् । पञ्चशिखवृत्तौ चक्षुरधिदैवत्वेन सिद्धस्य सूर्यस्य मधुत्वासम्भवे तेनापि तत्र गौण्येणादरणीयेति तद्वदजाशब्दे गौण्यादरणीयेति बोधनार्थत्वात् । अतस्तदुदाहृत्य प्रकृतेऽप्यङ्गीकरणमसङ्गतमित्यर्थः ।

ननु ब्रह्मपरत्वेनैवोपासनानि तत्तत्फलसाधकानि । ईश्वरपुरुषाकाशप्राणादिरूपेष्वब्रह्मत्वेनोपासने कृते तत्तत् फलं न भविष्यतीति तेषु ब्रह्मत्वबोधनार्थं सूत्रकारेण निर्णयः कृत इति चेन्मैवम् । वस्तुतस्तेषामब्रह्मत्वे तन्निरूपिकाणां श्रुतीनामब्रह्मपरत्वापत्त्या तन्नियमव्याहतेः, प्रतारकत्वापत्तेश्च । किञ्चाविद्याकल्पितत्वाविशेषात् प्रसिद्धार्थानेवानूद्य नेतादिति निषेधमेव कुर्यात् । समन्वयप्रतिज्ञामेव च न कुर्यात् । तेषामब्रह्मत्वेन तन्निरूपिकाणां तासामतन्निरूपकत्वात् । तथाच, सर्वे वेदा यत्पदमामनन्तीतिश्रुतिविरोधः । एतेन सविशेषनिरूपिका श्रुतिर्न ब्रह्मस्वरूपं निरूपयितुं प्रवृत्तेत्यादि निरस्तम् ॥ किंच, कृते शुक्लश्चतुर्बाहुरित्यादिना

इत्याद्युक्तादिदेशविशेषेषु, तुरीयां तामसीं मूर्तिमित्यादिना च नियतदेशे नियतकाले नियतानेककथनमनुपपन्नं स्यात् । एकस्या एवाविद्याया नियतसमायिकनियतवस्तुकल्पने समयान्तरे चान्यादृशकल्पने हेतोरशक्यनिरूपणत्वात् । नच कालादेरेव हेतुत्वं, तस्याप्येतत्तुल्यत्वात् । नच तादृक्स्वभावैव सेति वाच्यम् अद्वैतश्रुत्यनुरोधेनासद्रूपत्वेनैव सा त्वदभिमतेति तत्स्वभावस्यापि तादृशत्वेन कस्य कारणत्वम् ॥ ननु कार्यमपि तथैवेति पक्षवालिन्याय इति चेत्, कार्यमास्तां वा तथा, कारणेन तु सतैवभाव्यं मणिमन्त्रादिन्यायेनेति पूर्वमेवावोचाम । किंच, ब्रह्मजिज्ञासां प्रतिज्ञाय ब्रह्मत्वेन निरूपितसविशेषाणां कल्पितत्वं वदन् व्यासस्य प्रतिज्ञाहानिमपश्यन्नुन्मत्तोऽसि । ननु ब्रह्मण एकरसत्वेन सविशेषाणां वानेकरसत्वेन ब्रह्मत्वानुपपत्तिरिति चेन्नैवम् । धर्मिग्राहकप्रमाणसिद्धत्वात् । तथाहि । ब्रह्म वेदैकसमधिगम्यम् । तत्रच सर्वकामः सर्वगन्धः सर्वरस इति निरूप्यते । सर्वतः पाणिपादान्तं सर्वतोऽक्षिशिरोमुखम् * सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति * सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् * असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ चेत्यादिना भगवतैव स्वस्वरूपं प्रतिपादितम् । अत्रान्तपदेन करचरणाद्यवच्छेद उच्यते । अतएव पौगण्डलीलासामयिकं स्वरूपं यावत्परिमाणकं तदेव स्वरूपं पूतनामुक्तिदानदशायामपि वर्तत इति संगच्छते । सर्वेषामपि रूपाणां नित्यत्वात् । अग्रे च क्रमेण प्रादुर्भावः परम् । यतो बाल्येऽल्पदेशावच्छेदः करादीनां, पौगण्डादिषु चाधिकदेशावच्छेदो भक्तैरनुभूयते । तत्रच शुद्धब्रह्मत्वं ब्रह्मणैव विचारितम्, तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोपवृत्तः * यद्रिङ्गताऽन्तरगतेन दिविस्पृशोर्वा उन्मूलनं त्वितरथाऽर्जुनयोर्न भाव्यमित्या-

दिना द्वितीयस्कन्धे । दशमस्कन्धेऽपि दामोदरलीलाप्रस्तावे, न-
चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम् * पूर्वापरं बहिश्चान्तर्ज-
गतो यो जगच्च यः * तं मत्वात्मजमव्यक्तं मर्त्यलिङ्गमधोक्षजम् *
गोपिकोलूखले दाम्ना बबन्ध प्राकृतं यथेत्युक्त्वा रज्जुन्यूनतानि-
रूपणेनापि पूर्णत्वं तस्यैव प्रतिपादितम् । त्रय्या चोपनिषद्भिश्च
सांख्ययोगैश्च सात्वतैः * उपगीयमानमाहात्म्यं हरिं साऽमन्य-
तात्मजमितिवाक्येन मृत्स्नाभक्षणानन्तरीययशोदाप्रार्थितनिजवदन-
व्यादाने प्रदर्शितनात्मव्रजसहितसकललोकावलोकनजनितवस्तुवि-
ज्ञानायां यशोदायाः पक्षान्तरनिराकरणपूर्वकतत्त्वनिर्द्धारिकाऽथो
अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोग इति वाक्येन
च । एतेनैव, यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद
यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति स त आत्मान्तर्या-
म्यमृत इति श्रुत्युक्तधर्मवत्त्वेनापि ब्रह्मत्वं सिद्धम् । यत एकोऽप्य-
साधारणो धर्मो विद्यमानः सिद्धं न संदिग्धं नापि ब्रह्मधर्मानिव ग-
मयति । इममेव हि श्रुत्यभिप्रायमङ्गीकृत्य सर्वत्र ब्रह्मवाक्यनिर्ण-
यमाह सूत्रकारः । एतत्सर्वं भागवतविवरणे तत्त्वसूत्रभाष्ये च
विस्तृतं पितृचरणैरिति दिङ्मात्रं प्रदर्श्यते ॥ किञ्च सर्वाणि यानी-
न्द्रियाणि चक्षुर्वागादीनि तद्द्वारा गुणाश्चालौकिकास्तथैव शुद्ध-
मेव ब्रह्मावभासते । ब्रह्मैव कर्मेन्द्रियज्ञानेन्द्रियादिरूपेण भासत इ-
त्यर्थः । ननु लौकिकानीन्द्रियाणि तत्र सन्ति । तदाह । सर्वेन्द्रिय-
विवर्जितमिति । असक्तमित्यादि स्पष्टम् । अत एव, वैश्वानरः
साधारणशब्दविशेषादित्यधिकरणे, यस्त्वेतमेवं प्रादेशमात्रमभि-
विमानमात्मानं वैश्वानरमुपास्ते इति श्रुत्युक्तप्रादेशपरिमाणवत्त्व-
मभितो विगतमानत्वलक्षणं व्यापकत्वं वाजसनेयिशाखोक्तं, स ए-
षोऽग्निर्वैश्वानरो यत्पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पु-

रूपेऽन्तः प्रतिष्ठितं वेदेत्यनेन पुरुषत्वं तस्यैव तद्विधत्वं तस्मिन् प्रतिष्ठितत्वं च परस्परविरुद्धं ब्रह्मण्येव संभवति तस्यैव विरुद्धसर्वधर्माश्रयत्वाद्, नाग्न्यादिष्विति निरूपयन् जैमिन्यादिमतोपन्यासकरणेन पक्षान्तरेष्वरुचिमुद्भाव्य सिद्धान्तमवदत्, आमनन्ति चैनमस्मिन्निति । अस्यार्थस्तु, एनं परमेश्वरं व्यापकमेवास्मिन् मूर्द्धचिबुकान्तराले प्रादेशमात्रं जाबालाः समामनन्ति, य एषोऽनन्तोऽव्यक्त आत्मा योऽविमुक्ते च प्रतिष्ठित इति, सोऽविमुक्तः कस्मिन् प्रतिष्ठित इति वरणायां नास्यां च मध्ये प्रतिष्ठित इत्यादिना । तथाचानन्तपदाद्देशकालापरिच्छिन्नस्यैव संकुचितस्थाने श्रुतिः स्थितिं कथयतीति प्रादेशमात्रस्याप्यभिविमानत्वं सङ्गच्छते । एतेन विरुद्धधर्माश्रयत्वं ब्रह्मणः श्रुत्यभिमतं वेदितव्यम् । अन्यथानन्त इति न वदेत् । प्रयोजनाभावात् ।

किञ्चिदाशङ्क्य परिहरन्ति ।

नन्वित्यादि, विरोध इत्यन्तम् ॥ एवं तात्पर्यनिरूपणेन यत्सिद्धं तदाहुः ॥ एतेनेत्यादि ॥ तथाच सविशेषश्रुतिरपि अस्थूलादिश्रुतिवत् स्वरूपस्यैव निरूपिकेति उपजीवकत्वनैर्बल्ययोरभावात्तस्या यथाकथञ्चित्प्रतिपत्त्यर्थत्वमित्यत्र गमकस्याऽभावाच्च तन्निरस्तमित्यर्थः । अविद्याकल्पनपक्षे उपबृंहणविरोधं बोधयितुं दूषणान्तराण्याहुः ॥ किञ्च कृत इत्यादि ॥ एतत्तुल्यत्वादिति ॥ जडं तत्कार्यत्वेन तुल्यत्वात् । ननु कार्यस्याऽसत्त्वेऽङ्गीकृते विशेषाणामसिद्धेः किं कारणं सत्त्वापादनेनेति शङ्कायामाहुः ॥ किञ्चेत्यादि ॥ तथाच तवोन्मत्तत्वबोधनाय तथोच्यते, न तु कार्यासत्त्वमुपगम्यत इत्यर्थः । स्वस्योन्मत्तत्वं वारयितुं यतते ॥ नन्वित्यादि ॥ तथाच, स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वारे अयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेत्यादिश्रुत्या ब्रह्मणो रसत्वस्य सिद्धत्वात् । सविशेषस्य ब्रह्मत्वानुपपत्तेः न हि त्वमुन्मत्त इत्यर्थः । अनुपपत्तिं समादधते ॥ मैवमित्यादि ॥ तथाच प्रमाणसिद्धत्वेनानेकरसत्वेन प्रतीयमानत्वेऽप्येकरसत्वाऽनपायात् सुखेन ब्रह्मत्वोपपत्तेस्तवोन्मत्तः

त्वमनिवार्यमित्यर्थः । तथात्वमुपपादयन्ति ॥ तथाहीत्यादि ॥ वेदैकसमधिगम्यमिति ॥ न निर्विशेषश्रुतिमात्रैकगम्यम् । तद्ब्रह्मस्वरूपं लिङ्कृष्टम् । श्रुतिसमानानुपूर्वीकं गीतावाक्यमुपन्यस्यन्ति ॥ सर्वत इत्यादि ॥ प्रतिपादितमिति ॥ स्वस्य पुरुषोत्तमत्वं पुरुषोत्तमलक्षणादिकं च वदता आसमाप्ति प्रतिपादितम् ॥ अत एवेति ॥ सर्वतः पाणिपादान्तत्वादेव ॥ सङ्गच्छत इति ॥ श्रीमदाचार्यचरणोक्तिः सङ्गच्छत इत्यर्थः । नित्यत्वे सर्वरूपाणि प्रतीयेरन्निति चेत् तत्राहुः ॥ अग्रे चेत्यादि ॥ ननु प्रामाणिकप्रतीतिबलादनित्यमेवास्त्विति शङ्कानिवृत्त्यर्थं तत्र ब्रह्मत्वं निगमयितुं संमतिमाहुः ॥ तत्रेत्यादि ॥ तत्रेति ॥ भक्तदृग्गोचरे स्वरूपे । ननु ब्रह्मणा सामर्थ्यमात्रमुक्तं, न तु ब्रह्मत्वमपीत्यत आहुः ॥ दशमस्कन्धेऽपीत्यादि ॥ त्रय्या चेति वाक्ये त्रय्युपनिषत्पदाभ्यां, चकारद्वयेन च सर्वाः परापरविद्याः संगृहीताः । सांख्यादिपदैश्च सर्वाः स्मृतयः । मोक्षधर्मे तथा प्रतिपादनात् सात्वतैर्वैष्णवतन्त्रैः । सत्त्वस्य समूहः सात्त्वं, तद्वन्तः सात्वता इति तदर्थात् । तेन सर्वविद्याप्रतिपाद्यत्वमुक्तं भवति ॥ एतेनैवेति ॥ त्रय्याद्युपगीतत्वेनैव । अपिना श्रुतिसंग्रहः । तथा च श्रुतिलिङ्गाभ्यां सिद्धमित्यर्थः । लिङ्गेन सिद्धौ प्रकारं, तथाऽऽदरे बीजं च क्रमेणाहुः ॥ यत इति ॥ इममित्यादिच ॥ अत्र श्रीमदाचार्यसम्मतिविशेषताकथने बीजं चाहुः ॥ एतदित्यादि ॥ पूर्वोक्तगीतावाक्ये निर्विशेषमेव मुख्यतया प्रतिपाद्यत इति मतं व्युदसितुं प्राणन्नेव प्राणो भवतीति श्रुत्यनुसारेण तदाशयं हृदिकृत्य इन्द्रियाणि च गुणाश्चेन्द्रियगुणाः सर्वे च तदिन्द्रियगुणाश्च सर्वेन्द्रियगुणाः । आसमन्ताद्भासत इत्याभासः प्रकाशः । त इव आभासः सर्वेन्द्रियगुणाभास इत्युपमानसमासेन तदर्थमाहुः ॥ किञ्चेत्यादि ॥ गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्तीति महाभाष्याद्विशेषणमहाभूतस्यास्य शब्दस्यात्र नपुंसकत्वं बोध्यम् । श्रुत्यादिसिद्धविरुद्धधर्माश्रयत्वं न्यायतोऽपि दृढीकर्त्तुमाहुः ॥ अत एवेत्यादि ॥ अधिकरणार्थस्तु यस्त्वेतमित्यादिश्रुतौ वैश्वानरशब्दस्तावद्वस्तुष्वर्थेषु प्रसिद्धः । जाठराऽग्नौ तावत्–अयमग्निर्वैश्वानरो येनेदं पच्यते । यदद्यते इत्यादिषु । महाभूततृतीये च–विश्वस्मा अग्निं भुवनानि देवा वैश्वानरं केतुमह्नामकृण्वन्नित्यादौ । देवतायां च वैश्वा-

नरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीरित्यत्र । संवत्सरो वा अग्निर्वैश्वानर इति संवत्सरश्च प्रजापतिरित्यपि तैत्तिरीयश्रुतौ सिद्धम् । विश्वे च–विश्वो वैश्वानरः प्रथमः पाद इति । स च प्रजापतिरेव । छान्दोग्ये तु, आत्मानमेव वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीत्यात्मानमुपक्रम्य पठ्यते । ततः संदेहः । अत्र किं जाठराद्यन्यतमोऽभिधीयत, उत परमात्मेति । तत्र जाठराग्निभूततृतीयदेवतासु मूर्द्धैव सुतेजाश्चक्षुर्विश्वरूप इत्यादिना श्राविता द्युमूर्द्धत्वादयो धर्मा न युज्यन्त इति विश्वात्मकः प्रजापतिर्हिरण्यगर्भ एवार्थ इति प्राप्तेऽभिधीयते वैश्वानरः परमात्मैव । कुतः । साधारणशब्दविशेषात् । साधारणशब्दाद् यो विशेष आधिक्यं, तस्मादिति । स एव विशेषो, यस्त्वेतमेवं प्रादेशमात्रमभिविमानमित्यादि श्राव्यते । एवम् इति विरुद्धधर्माश्रयत्वं निरूपयन् व्यासो जैमिन्यादिमतोपन्यासकरणेन सापेक्षादप्यविरोधं जैमिनिः । अभिव्यक्तेरित्याश्मरथ्यः । अनुस्मृतेर्बादरिरित्यादिभिस्तत्करणेन पक्षान्तरेषूक्तेषु अरुचिं प्रथमोक्तोऽविरोधो विश्वसाधारणो, द्वितीयो देवतासाधारणस्तृतीय उपास्यकर्तृत्वात् सर्वसाधारणइत्येवंरूपामुद्भाव्य सूचयित्वा स्वसिद्धान्तमसाधारणरूपमवददित्यर्थः । स्पष्टमन्यत् । अधिकरणोपन्यासेन सिद्धमाहुः ॥ एतेनेत्यादि ॥

ननु मया पूर्वमेवावादि सविशेषनिरूपणमुपासनार्थमिति । नन्वनुपहतकर्णेन मयाप्यश्रावि । तर्हि किमनुपपन्नम् । त्वदभिमतोपासनार्थत्वमेव । कथम् ? इत्थम् । उपासनायां तत्र तत्प्रकारकभावनामात्रं नतु तद्वस्तु तादृशमिति हि तवाभिमतम् । उपास्यं चात्मत्वेनैव, नत्वनात्मत्वेन । आत्मन्येवोपासीत, अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति, न स वेद यथा पशुरेवं हि स देवानां पशुरिति श्रुतेः । एवं च सति, योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते * किं तेन न कृतं पापं चौरेणात्मापहारिणेति श्रुत्या यथाकल्पनस्य निन्दितत्वात् तादृशमेव तद्रूपमिति मन्तव्यम् । एवं सत्यनन्तरूपत्वमेव ब्रह्मणः श्रुत्यभिमतम् । तथाचानेन

रूपेण तादृशोपासकस्यैतादृशं फलं दास्यामीतीश्वरेच्छैव भवतीति ज्ञापयन्ती श्रुतिरुपासनाभेदेन फलभेदमप्याह । किंच त्वदुक्तरीत्योपासनाविषयस्यातत्प्रकारत्वेनाब्रह्मत्वमागतम् । तथाच तन्निरूपिकाणां श्रुतीनामब्रह्मपरत्वे प्राप्ते, सर्वत्रप्रसिद्धोपदेशादिति तत्त्वसूत्रविरोधश्च । असद्भावनया चासदेव फलं स्यात् । तथाच, तन्निष्ठस्य मोक्षोपदेशादिति तत्त्वसूत्रविरोधश्च । असन्नेव स भवति असद्ब्रह्मेति चेद्वेदेतिश्रुतेरुपासनाविषयाणामसत्त्वं जानानस्य तवान्धन्तमः प्रवेशेनासत्त्वमेव फलमिति प्रतिजानीमः । तथाचोक्तं, त्वादृशानेकासुरचमूपतीनां श्रुतिस्मृत्याचारपराणामपि निजबन्धुसुहृद्रूपाणामपि वधाय सकलप्रमाणनिषिद्धत्वेनाधर्मबुद्ध्या तद्वधविमुखं विजयं शिक्षयता तद्वधेन सकलसज्जनान् परिपालयता श्रीदेवकीपुत्रेण, अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् * परं भावमजानन्तो मम भूतमहेश्वरमित्यादिना असुराणां स्वाभजनमुक्त्वा, महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः * भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययमिति । तथैवाऽसुरभावनिरूपणे च, असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरमित्यादिना निरूप्य, आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि * मामप्राप्यैव कौन्तय ! ततो यान्त्यधमां गतिमित्यन्तेन । अत्र, मानुषीं तनुमाश्रितमिति तज्ज्ञानप्रकारकथनम्, नतु स्वरूपस्य । पूर्वोक्तयुक्तिभिरानन्दरूपत्वस्यैव निर्णीतत्वात् । यथाचैतत् तथाऽऽनन्दमयाधिकरणविचारे निरूपितं भाष्ये पितृचरणैः । अत एवाग्रे भगवानाह, परं भावमजानन्त इति । परो भाव आनन्दमात्रत्वलक्षणः । एतेन विशेषाणां लौकिकत्वात् तन्निषेधस्तत्र युक्तः । तेषामप्यलौकिकत्वकल्पने ब्रह्मणि च विरुद्धसर्वाधारत्वादलौकिकशक्तिकल्पने गौरवमिति निरस्तम् । सर्वस्यैव प्रमाणसिद्ध-

त्वेनाकल्पितत्वात् । स्वयुक्त्या कल्पने हि त्वदुक्तं दूषणम् । अन्यथा ब्रह्माङ्गीकारेऽपि गौरवमिति तदनङ्गीकारोऽप्यापद्येत । तथा च शून्यवाद आपद्येतेति गङ्गातरङ्गसङ्गिकमलपरागधूसरितानिलसुखभिया स्ववैराग्यख्यापनाय जनतासमक्षं पलायमानस्य मायावादिकुहकनिर्विण्णस्य शूकरगर्ते निपातः । किञ्च, अस्थूलादिवाक्यविरोधेन हि विशेषाणां कल्पितत्वं ब्रूषे । तत्र विरोधः कयोरिति पृच्छामः । परस्परात्यन्ताभावसमानाधिकरणयोरिति चेद् ब्रूषे, तत्रापि पृच्छामः । यत्र कुत्रचित् तथात्वेऽपि सामान्यविरोध, उभयत्र तथात्वे प्रतीतिस्तत्रैव तयोः प्रतीतौ विरोधो नान्यत्रेति । तत्र नाद्यः । परस्परात्यन्ताभावसमानाधिकरणयोरपि निष्क्रमणत्वप्रवेशनत्वयोरेकस्मिन् धर्मिण्यनुभवात् । अथ तत्र प्रमाणप्रतीतिसिद्धत्वान्न विरोध इति चेद् ब्रूषे, तदा ब्रह्मण्यप्रामाण्यशङ्काकलङ्करहितवेदसिद्धत्वादुभयधर्माणां न विरोध इति तुल्यम् । तेन द्वितीय एव पक्षः साधुरिति मन्तव्यम् । तथाच लोक एव तथात्वेन प्रतीतेर्लौकिकेषु तथात्वे विरोधो, नत्वलौकिकेषु ब्रह्मधर्मेषु धर्मिग्राहकप्रमाणसिद्धत्वात् ।

निमील्य पुनराशङ्कते ।

नन्वित्यादि ॥ तस्य बाधिर्यं सूचयन्तः समादधते ।

नन्वित्यादि ॥ अत्र, ननु निश्चयार्थः । एवञ्च सतीति ॥ आत्मत्वेनोपास्यत्वे सति । एवं सतीति ॥ आत्मस्वरूपेऽन्यथाकल्पनस्य निन्दितत्वे सति । तथैव भवतीति ॥ तादृशाकारमेव ब्रह्म भवति । अतो, ननु ब्रह्मत्वेन चोपासनेत्यादिना यस्त्वया सूत्रकाराशय उद्घाटितः सोऽसङ्गत इत्यर्थः । दूषणान्तराण्याहुः ॥ किञ्चेत्यादि ॥ नन्वस्त्वेवं तथापि तद्ब्रह्मान्यदेव । कृष्णाकारं तु नानारूपेष्वन्यतमम् । वाराहपुराणे दशानामप्यवताराणां सोपानत्वेन गणनात् । अतोऽवताररूपे तथा कल्पनं न दोषायेति चेत् तत्राहुः ॥ तथाचेत्यादि ॥ निरूप्येति ॥ आसुरलक्षणं निरूप्य तथाच कृष्णाकारस्यान्यथाज्ञानेऽपि

भगवता आसुरत्वाधमगत्योः कथनात् तस्य मूलरूपत्वमेव बोध्यते, न तु सोपानतुल्यत्वम् । वाराहवाक्यं त्वंशावतारपरं, न तु मूलरूपपरम् । अन्यथैतद्वाक्यविरोधापत्तेः । अतः श्रीकृष्णाकारस्य मूलरूपत्वात् तदन्यथाज्ञानेऽपि स एव दोष इत्यर्थः । ननु यद्येवं तदा भगवता, मानुषीं तनुमाश्रितमिति ततो भिन्नतया तनुः किमुच्यते इति चेत् । तत्राहुः ॥ अत्रेत्यादि ॥ पूर्वोक्तयुक्तिभिरिति ॥ अत्र मां मार्गयन्त्यद्धा युक्ता हेतुभिरीश्वरम् * गृह्यमाणैर्गुणैर्लिङ्गैरग्राह्यमनुमानत इत्यादिवाक्याद्दामोदरलीलाप्रस्तावदर्शिताभिः परिच्छेदत्रयातीतत्व–सर्ववेदवेद्यत्व–सकलजगदाधारत्वादिभिरित्यर्थः । ब्रह्मण आनन्दमयस्य विरुद्धधर्माधारत्वं श्रुत्यादिसिद्धमित्याहुः ॥ यथा चेत्यादि ॥ यथा ब्रह्मण आनन्दरूपत्वं तथा आचार्यचरणैर्ब्रह्मवित्प्रपाठके परस्य विपश्चितो जगज्जनकत्वस्यादौ कथनान्मध्ये, को ह्येवान्यात् कः प्राण्याद् यदेष आकाश आनन्दो न स्यात् । एष ह्येव आनन्दयातीत्यार्थिकाभ्यासेन तस्यैव परामर्शादन्ते चैतमानन्दमयमात्मानमुपसंक्रामतीति श्रावणादुपक्रमादिभिर्निर्णीयोक्तमित्यर्थः । सिद्धमाहुः ॥ एतेनेत्यादि ॥ ननु मास्तु गौरवं तथाप्यस्थूलादिवाक्यविरोधस्तु दुष्परिहर इत्यत आहुः ॥ किञ्चेत्यादि ॥ तत्र विरोधः कयोरिति ॥ तत्र वाक्यविरोधपरिहारार्थं तन्मूलभूते तदर्थविरोधे विचारणीये स कीदृशयोरित्यर्थः ॥ सामान्यविरोध इति ॥ सार्वत्रिको विरोधः । ननु निष्क्रमणत्वप्रवेशनत्वयोर्न वास्तवो भेदः । शालाया निष्क्रम्याऽङ्गणे प्रवेशे एकस्मिन्नेव कर्मणि निरूपकभेदेन पुरुषाभ्यां तत्प्रयोगात् । भेदप्रतीतिस्तु निरूपकभेदकृतेति नेदमुदाहरणमिति चेत् । एवमुपगमे दैशिकपरत्वापरत्वयोरप्यभेदापत्तेः । तत्रापि निरूपकभेदमात्रादेव भेदप्रतीतेरनुभवात् । नच तत्र द्रव्यस्य समवायिकारणत्वात् तत्रापेक्षाव्यध्यातौ गुणैर्जन्यत इति तयोर्भेदः । प्रकृते तु कर्मणः समवायित्वाभावादेतयोश्च तन्निष्ठत्वेन गुणत्वाभावात् कर्मत्ववदजन्यधर्मत्वेनैकमेवास्थेयम् । भेदस्तत्प्रतीतिनिष्ठ एव तत्रारोप्यत इति नेदमुदाहरणमिति वाच्यम् । तथा सति तयोः पर्यायत्वापत्तेः । विपरीतप्रयोगस्य धर्मत्वापत्तेश्च । प्रतीतेर्भ्रमत्वापत्तेश्च । अत एतयोर्भेद एवास्थेय इति नोदाहरणासंगतिरिति बुद्ध्यस्व । सिद्धमाहु ॥ तेनेत्यादि, प्रमाणसिद्धत्वादित्यन्तम् । तथात्र इति ।

प्रमाणयतीत्यसिद्धत्वे ।

पुनश्चोदयति ।

ननु स्यादेवं यदि परस्परविरुद्धानेकधर्मवत्त्वमात्रं बोधयेच्छ्रुतिर्न निषेधेत् । तथाचाखिलश्रुत्युपपत्त्यर्थं ब्रह्म निर्धर्मकमेव । यतो धर्मान् स्वयमेवोक्त्वा स्वयमेव तत्र निषेधति । धर्मनिरूपणं तु यथाकथञ्चिद्धर्मिप्रतिपत्त्यर्थम् । अन्यथा तादृशस्य निरूपयितुमशक्यत्वात् तदज्ञानेन सर्वेषां मोक्षोच्छेद एव स्यात् ततस्तत्सिद्धौ धर्मनिषेधमुखेन शुद्धं तन्निरूपयतीति मन्तव्यमिति चेद् बाढमेव मन्तव्यं स्याद् यदि स्वोक्तान् धर्मानेव श्रुतिर्निषेधेत । नत्वेवम् । किन्तु ब्रह्मधर्मनिरूपणे कृते तेषु प्राकृतत्वादिशङ्का स्यात्, तन्निवृत्त्यर्थं प्रापञ्चिकधर्मानेव ब्रह्मणि निषेधति । अन्यथाऽसत्पदार्थनिरूपकत्वेन प्रतारकत्वेन च श्रुतेरप्रामाण्यं स्यात् । लोकप्रसिद्धदुःखित्वादिधर्मनिषेधनापि निर्धर्मकतन्निरूपणस्य शक्यत्वात् । ननु श्रुत्युक्ता अपि लौकिका एवेति चेद्, रे मूढ ! कुत्र वा लोके त्वया त्वत्पित्रा वा सर्वतः पाणिपादान्तत्वादय एकस्मिन् धर्मिणि सर्वेशितृत्वादिकं श्रुत्युक्तमानन्दमात्रकरादिमत्त्वं च दृष्टं श्रुतं वा ब्रह्मातिरिक्ते, येनैतेषु लौकिकधर्मानुवाद इति ब्रवीषि । अप्रसिद्धानपि बाधनार्थं स्वयमेवोक्त्वा निषेधतीति न वक्तुं शक्यम् । दत्तोत्तरत्वात् । तथाच तदुक्तब्रह्मण्यप्यनाश्वासनप्रसङ्गेन महानेवानयो भवेत् । किञ्चैवं, जन्माद्यस्य यत इत्यादिलक्षणं ब्रह्म निरूपयिष्यमाणो बादरायणः पूर्वमथातो ब्रह्मजिज्ञासेत्युक्त्वाऽस्थूलादिश्रुतिं विचारयन्नथ ब्रह्मजिज्ञासेति वदेत् । एवं सति सर्वेषां वेदान्तानां ब्रह्मपरत्वं दत्ततिलाञ्जलि स्यात् । तथाच समन्वयासङ्गतिः । सूत्रे सविशेषनिरूपिकाणां श्रुतीनां परस्पराविरोधचिन्तनमप्यप्रयोजनकं स्यात् । निषेध्यानामविरोधे विरोधे

धा विशेषाभावात् ।

नन्वित्यादि ॥ निषेधतीति ॥ श्रोतव्यो, मनसैवानुद्रष्टव्य इत्यत्रोक्तानां यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति, श्वेताश्वतरेऽपि । सर्वतः पाणिपादं तदित्याद्युक्त्वा, ततो यदुत्तरं तदरूपमनामयमिति निषेधाद्विरुद्धधर्माश्रयत्वं नेत्यर्थ ॥ तदुक्तं दूषयन्ति ॥ बाढमित्यादि ॥ अन्यथेति ॥ यावद्धर्मनिषेधे । श्रुतेरिति ॥ धर्मनिरूपकश्रुतेः । नन्वेवं सत्यपाणिपादः तदरूपमित्यादेर्निर्धर्मतन्निरूपणस्य कथं सामञ्जस्यमित्यत आहुः ॥ लोकेत्यादि ॥ तथाच तदरूपमित्युक्त्वा, अग्रेऽनामयमिति कथनाद् दुःखितत्वसमानाधिकरणस्यैव रूपस्य निषेधस्तत्र गम्यत इत्यत्रापि लोकप्रसिद्धा ये प्राकृताः पाण्यादयो दुःखितत्वसमानाधिकरणास्तन्निषेधनैव सर्वश्रुत्युपपत्तिर्न, तु त्वदुक्तरीत्या यावद्धर्मनिषेधेनेत्यर्थः । पाण्यादीनामाकारे विशेषाभावमनुसंधाय पुनश्चोदयन्ति ॥ न न्वित्यादि ॥ तद् दूषयन्ति ॥ रेमूढेत्यादि ॥ तथाचाकारसाम्यं न लौकिकत्वापादकमित्यर्थः । एतेनैव गोपरूपो हरिः साक्षादित्यादौ गोपरूपत्वादिकमपि सर्वेश्वरत्वनिराकारत्वादिपुरःसरमेवोच्यत इति बोद्धव्यम् ॥ दृष्टोत्तरत्वादिति ॥ असत्पदार्थनिरूपकेत्यादिना तथात्वात् । तदुक्तं पूर्वोक्तदूषणान्तरं पुनः स्मारयन्ति ॥ तथाचेति ॥ असत्पदार्थनिरूपके चेत्यर्थः । उक्तदार्ढ्यार्थं दूषणान्तराण्याहुः । किञ्चेवमित्यादि ॥ वदेदिति ॥ प्रतिज्ञान्तरं कुर्यात् । द्वितीयाध्यायस्याप्यसंगतिं दर्शयन्ति सूत्र इत्यादि ॥ असद्व्यपदेशादिति चेन्न धर्मान्तरेण वाक्यशेषात् श्रुतेस्तु शब्दमूलत्वात् सर्वोपेता च तद्दर्शनात् ॥ विकरणत्वान्नेति चेत्तदुक्तमित्यादिसूत्रेषु सदेव सोम्येदमग्र आसीत् ॥ असद्वा इदमग्र आसीदिति विरोधे अव्याकृतत्वरूपधर्मान्तरेण वर्तमानतया कारणरूपमकुरुतेति, अतो न सत्स्यत्कारणबोधकश्रुतिविरोधः ॥ एवं शब्दमूलत्वसूत्रे कृत्स्नप्रसक्त्यादिदोषपरिहारः ॥ एवं सर्वशक्तिमुक्तत्वसाधनं सर्वोपेतसूत्रे परदेवता सर्वशक्त्युपेता, कुतः, सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वज्ञः सर्ववित् एतस्यैवाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादिषु तथात्वदर्शनादित्यर्थः ॥ एवं विकृतत्वपरिहारो विकरणत्वसूत्रे ॥ तथा अन्ध-

ष्वपि तत्तच्छ्रुत्यनुभवविरोधचिन्तनं तत्सर्वं तथा स्यादित्यर्थः ॥ निषेध्यानामिति ॥ धर्माणां तन्निरूपकश्रुतीनां चेत्यर्थः ॥

ननु सूत्रेष्वपि निर्विशेषस्यैव मुख्यतया निरूपणं दृश्यते, 'अरूपवदेव हि तत्प्रधानत्वात् * प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय इत्यादिभ्य' इति चेन्मैवम् । तदर्थानवबोधात् । तथाहि । तत्र जडजीवधर्मा ब्रह्मणि सन्ति नवेति विचारयँस्तन्निरूपकनिषेधकश्रुतीनामन्योन्यविरोधपरिहारं विचारयन्नुभयोरपि श्रुतिवाक्यत्वेनान्यतरबाधमप्यशक्यं जानन्नौपाधिकं ब्रह्म सविशेषश्रुतिविषयो, निरुपधिस्वरूपं तन्निर्विशेषश्रुतेरिति मतं, न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र इति सूत्रेणौपाधिकत्वे तत्स्वभावत्वं ब्रह्मणो न सम्भवतीति तच्छ्रुतीनामब्रह्मनिरूपकत्वापत्तिरिति निरस्य पुनरुपहितानुपहितयोर्भेदाङ्गीकारेणोभयरूपत्वं ब्रह्मणो भविष्यतीति तन्मतोपपत्तिमाशङ्क्य, 'न भेदादिति चेन्न प्रत्येकमतद्वचनाद्' इति सूत्रेण, 'अपि चैवमेके' इत्यग्रिमेण चाभेदबोधकश्रुतिविरोधनिरूपणेन निरस्य, पुनराकाराणां प्रपञ्चमध्यपातित्वात् प्रपञ्चस्य जन्यत्वात् तेषामपि तथात्वात् तेषु ब्रह्मभेदबोधनमौपचारिकमतः साकारवादिन्यो न ब्रह्मनिरूपिका इति प्राप्ते आह 'अरूपवदेव हि तत्प्रधानत्वाद्' इति । स्यादेतदेवं, यद्याकाराणां प्रापञ्चिकत्वं वक्तुं शक्यम्, त्वदभिमतस्यापि तथात्वापत्तेः । अतो निराकारवादिनीष्विव साकारवादिनीष्वपि श्रुतिष्वरूपवदेव तत्प्रतिपाद्यते । रूप्यते निरूप्यते व्यवह्रियत इति रूपं सर्वव्यवहारविषयत्वं, तद्युक्तं रूपवद्विश्वम् । ब्रह्म तु तद्विलक्षणमित्यर्थः । यथाचैतत्तथा मृत्स्नाभक्षणादिकप्रसङ्गनिरूपणेन निरूपितम् । अथवा रूप्यते व्यवह्रियतेऽनेनेति करचरणाद्युच्यते । तथाच यथा लोके करादिकं भिन्नं तद्वानभि-

क्षानी भिन्नः । तथा ब्रह्म न श्रुतौ करादिभिन्नं तदभिमानित्वेन निरूप्यते । किन्तु करादेरपि ब्रह्मत्वाद् भेदाभावाद्रूपमेव निरूप्यते न तु रूपवदित्यर्थः । ननु कुत एतदवगम्यते करादीनामपि ब्रह्मत्वमेव, न तद्भिन्नत्वमित्यत आह तद्विनिगमकम् । तत्प्रधानत्वादिति । सर्वेषां वेदान्तानां ब्रह्मैव प्राधान्येन प्रतिपाद्यं यतः । अयमर्थः । करादीनामब्रह्मत्वे तन्निरूपकाणां वेदान्तानामब्रह्मपरतया ब्रह्मपरत्वनियमव्याहतिरतः करादिनिरूपकाः साक्षाद्ब्रह्मप्रतिपादका एवेति । सर्वत्र प्रसिद्धोपदेशात्, आमनन्ति प्रसिद्धोपदेशात्, आमनन्ति चैनमस्मिन्नित्याद्यधिकरणरूपोपपत्तिर्हिशब्देनोच्यते । यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वारेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेति, सत्यं विज्ञानमानन्दं ब्रह्मेति, आनन्दमात्रकरपादमुखोदरादिरिति, आनन्दमयोऽभ्यासादिति श्रुतिस्मृतिन्यायैकवाक्यतया सच्चिदानन्दरूपत्वं करादीनामवधारणीयम् । अत एवाग्रे सूत्रकारोऽप्याह । आह च तन्मात्रमिति । एता एव श्रुतयोऽत्रानुसन्धेयाः । त्वदभिमतव्याख्याने स्वरूपमित्येतावतैव चारितार्थ्यं स्यात् । रूपवत्त्वस्योभयवाद्यसंमतत्वेनाविवादास्पदत्वात्तन्निषेधानुपपत्तिः । रूपरूपत्वस्य सिद्धान्ताभिमतत्वात् । एवं सति तथा कथनादस्मदुक्त एवार्थः सूत्रकाराभिमत इति ज्ञायते ॥ अपिच, दर्शनाच्चेत्यनेन श्रुतिस्मृतिप्रत्यक्षैः सर्वविरुद्धधर्माश्रयत्वेन विरोधं परिहृत्य युक्त्यापि प्रतिषेधति, प्रकृतेति । अस्थूलादिवाक्यैरेतावत्त्वं स्थूलत्वाणुत्वह्रस्वत्वादिकं श्रुतिर्ब्रह्मणि यत् प्रतिषेधति तत् प्रकृते लोके, प्रकृतं वा यल्लौकिकमेतावत्त्वं तदेव तत्प्रतिषेधति, नतु स्वोक्तान् धर्मान् सर्वेशितृत्वादीनित्यर्थः । एवमेव, नेतीत्यत्रेतिशब्दः प्रकारवाची । तथाच पूर्वं मूर्तामूर्तं ब्रह्मणो विभूतिरूपं य एवं वेदेत्यन्तेन नि-

रूपस्य यस्यैतद्रूपद्वयं पूर्वमेव षष्ठ्यन्तेन पदेन निरूपितमेदस्य त-स्मिन्निरूप्यमाणेऽपि सर्वतः पाणिपादान्तादिष्वेवं लौकिकत्वेन वेदनं मा भूदिति भिन्नपक्रमेणैतत्प्रकारकं वेदनं ब्रह्मणो निषेधति, अथात इत्यादिना । अयमर्थः । ब्रह्मण्यपि मूर्तामूर्तरूपे सर्वतः पाणीत्यादिश्रुत्युक्ते वेदितव्ये । परं त्वनेन प्रकारेण न वेदितव्ये ब्रह्मण एते रूपे इति, । किन्तु ब्रह्मैवेति वेदितव्ये इत्यर्थः । अत्र विनिगमकमाह सूत्रकारः । ततो ब्रवीति च भूय इति । यस्मिन्नेव वाक्ये प्रकरणे वा निषेधति तस्मिन्नेव निषेधानन्तरं पुनस्तं ध-र्ममाह श्रुतिः । यथा, पराञ्चि खानीत्युक्त्वा प्रत्यगात्मानमैक्षदिति । यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेत्युक्त्वा आनन्दं ब्रह्मणो विद्वानिति । अस्थूलाद्युक्त्वा एतस्यैवाक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठत इत्यादि । त्वद्व्याख्याने तु प्रकृतपदं व्यर्थं स्यात् । एतावत्पदेनैव सान्निध्यतो रूपद्वयप्रतीतेः संभवात् । नचैतावत्पदस्य सामान्यवाचकत्वाद् विशेषगमकत्वं तस्येति वाच्यम् । तुल्यत्वात् । अथवाऽत्र हि, नेतिनेतीति वाक्यं विचार्यते, निषेधः कस्येति । तत्र सूत्रे प्रकृतशब्देन द्वे वा व ब्रह्मण इत्यादिनोक्तं मूर्तामूर्तलक्षणं रूपद्वयं परामृश्यत इति तवाभिमतम् । तथाच, प्रकृतत्वं प्रतिषेधतीत्येतावतैव चारितार्थ्ये सत्येतावत्पदं व्यर्थम् । तेनास्मदुक्त एवार्थो व्यासाभिमत इति मन्तव्यम् । तथाच सविशेषनिर्विशेषनिरूपकयोः श्रुत्योर्विरोधाभावात् प्रापञ्चिकधर्मरहितं सहजानन्तधर्मयुक्तं ब्रह्मेति सिद्धम् ॥

एवं समन्वयाविरोधाध्यायविरोधे दर्शिते तृतीयाध्यायसूत्राभ्यां प्रत्यवस्थानं स्मारयति ।

ननु सूत्रेष्वित्यादि । तद्दूषयितुं सूत्रार्थं व्युत्पादयन्ति ॥ मेवास-त्यादि ॥ औपाधिकमिति ॥ तात्त्विकोपाधियुक्तम् ॥ श्रुतेरिति ॥ वि

षय इति शेषः ॥ औपाधिकत्वे । निरस्येति ॥ सर्वत्र हीत्येतत्सूचितेन सार्वत्रिकत्वादिति हेतुना निरस्य प्रत्येकमतद्वचनादिति ॥ प्रतिवाक्यं वाक्यमेव स योयम् । स यश्चायं पुरुषे यश्चासावादित्ये स एक इत्याद्यभेदवचनात् । त्वदभिमतस्येति । निर्विशेषस्य ॥ निरूपितमिति ॥ दशमस्कन्धेत्यादिना ॥ प्रागेवोक्तं विश्ववैलक्षण्यं सर्वेशितृत्वेनापि भवतीत्यतः प्रकारान्तरेण व्याकुर्वन्ति । अथवेत्यादि ॥ उच्यत इति रूपपदेनोच्यते । ननु करादिनिरूपकाणां ब्रह्मपरिचायनार्थतया तन्निरूपकत्वेपि प्राधान्येन ब्रह्मानिरूपकतायाः प्रतिरोधाभावाच्च करादीनां ब्रह्मभेदसिद्धिरित्यत आहुः ॥ स यथेत्यादि ॥ अनन्तरो बाह्याभ्यन्तरभेदरहितः ॥ ननु तन्मात्रसूत्रे कथं करण एव प्रयोगानुवादीनां चातथात्वाद्विरुद्धं व्याख्यानमित्यरुच्या पक्षान्तरमाहुः ॥ श्रुतिस्मृतिभ्यामिति ॥ कश्चिद्धीरः ज्ञानप्रसादेन तमक्रतुं पश्यतीत्यादिश्रुतेः ॥ अनेकबाहूदर, भक्त्या त्वनन्ययेत्यादिस्मृतेश्चेत्यर्थः ॥ ननु सूत्रे संराधने दर्शनं निर्णीतमित्याराधनोत्तरकालीनं दर्शनं तु न संराधनहेतुकं शत्रुमित्रोदासीनसाधारणत्वात् ॥ अतः, सर्वदृश्यत्वं ब्रह्मबाधकं भगवदवतारेष्वतथात्वं गमयतीति न पूर्वोक्तं साधीय इत्यत आहुः ॥ एवं सतीति । मनीषितानुभावोयमिति स्मृत्या भगवदिच्छानुभावेन दर्शने सिद्धे सति तथाचावतारदशायामपीच्छयैव दर्शनमिति न दोषलेश इत्यर्थः ॥ नन्वेवं सति भक्ताभक्तयोर्दर्शनतौल्यात्संराधनन्यायविरोधस्तु दुष्परिहर इत्यत आहुः ॥ भक्तानामित्यादि, स्यादित्यन्तम् ॥ तथाच तदपि परम्परया संराधनहेतुकमेवेति न न्यायविरोध इत्यर्थः ॥ ननु तथापि भिद्यते हृदयग्रन्थिरिति श्रुत्युक्तं दर्शनं फलस्य शत्रुप्रभृतिष्वदर्शनादवतारेषु ब्रह्मत्वं दुर्घटमित्यादि, स्यादित्यन्तम् । एवमेवेति इच्छायाः प्रतिबन्धकत्वादेव ॥ इदमेवोक्तं ब्रह्माण्डपुराणे ॥ तदग्रे प्रभासीयलीलाप्रसङ्गे प्रदर्शनीयम् ॥ नन्ववतारेषु ब्रह्मत्वे लौकिकतेजस्तु दृश्येतेत्यत आहुः ॥ अलौकिकेत्यादि ॥ एवं दृश्यत्वं साधयित्वा तत्साधिकां युक्तिं प्रकाश्यत्वसाधनेऽतिदिशन्ति । एवमेवेत्यादि ॥ प्रकारान्तरस्याथाहुर्वैचित्र्यार्थं यदेत्यादि ॥ न तत्र सूर्यो भातीति श्रुतिविरोधे सत्यपि स्वतेजसो भगवदीयत्वेन प्रतिपादनान्नातिविरोधीत्यर्थः ॥ ननु व्यवहार्यत्वं तु बाधकमपरिहार्यमित्यत आहुः ॥ सर्वेत्यादि ॥ व्यवहारो

ज्ञानकर्मेन्द्रियव्यापारस्तद्विषयत्वं तत्तथेत्यर्थः ॥ तत्र हेतुः ॥ नन्वि-त्यादि ॥ अत्र सूत्रकारसंमतिमाहुः ॥ अत एवेति ॥ व्यवहार्यत्वस्ये-श्वरकृतत्वादेव ॥ पूर्वेणेति ॥ अरूपवत्सूत्रेण ॥ रूपरूपत्वस्यैव तत्र विवक्षितत्वात्तथेत्यर्थः ॥ इदमिति ॥ सूत्रम् ॥ इत्यादिश्रुत्या चेति ॥ लक्ष्यत्वस्य प्राप्त्यात्मकव्यवहारविषयत्वात्मकत्वादित्यतस्तथेत्य-र्थः ॥ एकदेशिभिः सर्वविदिति पाठस्वीकाराच्छ्रुत्यन्तरं परास्य श-क्तिरित्युक्तम् । आधारत्वप्रतीतिविषयत्वादीनां निर्द्धर्मकत्वादिविरो-धित्वात्तदभिमानेन प्रत्यवतिष्ठन्तं प्रत्याहुः ॥ अत एवेत्यादि ॥ तथा-चैव दुर्युक्तिभिः प्रत्यवस्थानं श्रुतिरेव निषेधतीत्यकिञ्चित्करोयं त-वाभिमान इत्यर्थः ॥ उक्तरीतिककुयुक्त्या युक्त्यवस्थानं युक्त्या परि-हरन्ति ॥ किञ्चेत्यादि ॥ ननु दर्शनस्य न वस्तुतत्त्वनिर्णायकत्वं गौ-डवार्तिके । उपलम्भात्समाचाराद् माया हस्ती यथोच्यते * उपल-म्भात्समाचारादस्ति वस्तु तथोच्यत इति दर्शनादेव प्रामाणिकत्व-कथनादिति शङ्कायामाहुः ॥ माया हीत्यादि ॥ तद्धर्मत्वेनैव निरूप-णादिति ॥ तथाच, लौकिकप्रमाणजन्यदर्शनस्याप्रामाण्यं, नतु भगव-त्कृपया साधनकस्यापीति गौडवार्तिकमप्रमाणं चालौकिकं तत्परं वेति दर्शनस्य प्रामाण्यमदण्डवारितमित्यर्थः ॥ अत्र सूत्रकारस्यापि संमति-माहुः ॥ अत एवेत्यादि ॥ नन्विन्द्रो मायाभिः पुरुरूप इति श्रुतौ दर्श-नस्य मायिकत्वकथनाद् मायया दर्शयतीति शङ्कायामाहुः ॥ अपि-चेत्यादि ॥ तद्भिन्नेति ॥ भगवत्स्वरूपाद्भिन्ना ॥ ब्रह्मधर्मत्वेनेति ॥ वि-रुद्धधर्माश्रयत्वस्य तथात्वेन ॥ तादृशामिति स्वान्तःस्थापितपृथिव्या-दित्वेन तदाधारमित्यर्थः ॥ उक्तयुक्तेरिति ॥ विरुद्धधर्माश्रयत्वात् ॥ नन्वस्तु विरुद्धधर्माश्रयत्वं, तथापि तथाप्रदर्शनाङ्गीकारे को दोष इ-त्यत आहुः ॥ असत्यदर्शनमित्यादि ॥ इदमग्रे लीलानित्यतावादे व्यु-त्पाद्यम् ॥ तथाच तथाङ्गीकारे इत्थं विदिततत्त्वाया गोपिकायाः स ईश्वरः ॥ वैष्णवीं व्यतनोन्मायामित्यादिवाक्यविरोध इत्यर्थः ॥ अस्तु करणत्वमेवेत्यत आहुः ॥ तथाचेत्यादि ॥ स्वासक्तौ वा द्रष्टुरयोग्ये वा लोकेपि मायोररीकरणं दृश्यते प्रकृते चोभयाभावान्न तस्याः करणत्वं शक्यवचनमित्यर्थः । अशक्तिं परिहरन्ति ॥ स्वाभाविकी-ति ॥ ननु, तर्हि कौतुकार्थमेव तदादरोस्त्वित्यत आहुः ॥ किञ्चेत्यादि ॥ कौतुकाया अपि हि सद्रूपा असत्प्रदृश्यते ॥ प्रकृते तु तद्विपरीतमतो

मूर्खप्रलपितमेतदित्यर्थः ॥ ननु, गुणत्वादस्तु तदुररीकरणमित्यत आहुः ॥ एतेनैवेति ॥ सहजानन्तशक्तिमत्त्वस्य श्रुतिसिद्धत्वेनैव ॥ अवतीर्णस्य सगुणत्वं तथेत्यर्थः ॥ एवं शक्तस्य तादृशतद्ग्रहणस्यानुपपन्नत्वेनैव पूर्वप्रकृतस्यापि सिद्धिमाहुः ॥ एतेनैव चेति ॥ चकारः असद्रूपेत्यादिनोक्तस्य द्वितीयपक्षस्य विकल्पे यद् दूषणं तत्समुच्चायकः ॥ ननु, माया उपाधित्वं मयाङ्गीक्रियत एवेति चेत्तत्राहुः ॥ अङ्गीकारे इत्यादि ॥ स्वत उपाधित्वे ज्ञाननाश्यत्वभङ्गापत्त्या ईश्वरेच्छैव तथा वाच्या ॥ तथा सति उक्तरीत्या हेत्वभावः ॥ अशक्तिद्रष्टृयोग्यत्वकौतुकान्यतमप्रयोजकताया वक्तुमशक्यत्वात्तथेत्यर्थः ॥ असम्भव इति ॥ उपाध्यसम्भवः ॥ किञ्चिदाशङ्क्य परिहरन्ति ॥ नन्वित्यादि ॥ तन्नूक्तमिति ॥ पूर्णत्वाद्यभङ्गसाधकं विरुद्धधर्माश्रयत्वं प्रागेव निर्णीतमित्यर्थः ॥ ननु ब्रह्मण पूर्णकामत्वेन कामलीलाप्रयोजनाभावादुपपादनसापेक्षविप्रयोगादिक्लेशाङ्गीकारापेक्षया तदनपेक्षकामलीलाया अनुकरणमात्रत्वमेव ज्याय इत्यतः अनुकरणेत्यादि कुतोऽसंगतमित्याकाङ्क्षायां रसवत्त्वस्य बाधकस्य विद्यमानत्वात्तथेति वक्तुं रसवत्त्वं चोपपादयन्ति ॥ तथाहीत्यादि ॥ पूर्वश्रुतौ सर्वगन्ध इति मध्ये श्रावणाच्चेतनधर्मव्यवायाद्गुणविशेष एव तत्रोच्यते ॥ तथाच बहुव्रीहिणा कामवत्त्वरसवत्त्वयोरेव सिद्धिर्न कामादिरूपत्वस्यापि, समासद्वयाङ्गीकारे च वाक्यभेदापत्तिरित्याशङ्कानिवृत्त्यर्थं द्वितीयश्रुतिमाहुः ॥ तैत्तरीयकेपीत्यादि ॥ तथाचानया रसत्वे सिद्धे तस्य कामरूपत्वे पर्यवसानात्कामरूपत्वस्यापि सिद्धिरित्यर्थः ॥ अत्र पूर्वश्रुतौ रसत्वमात्रश्रावणेन तत्स्वरूपसंदेहानपायात्तदर्थमग्रिमां श्रुतिमाहुः ॥ रसमित्यादि ॥ अत्रायमर्थः ॥ रसो वै स इति श्रुत्या हि असद्वा इदमग्र आसीदित्यादिनोपक्रान्तस्य ब्रह्मण एव रसत्वं बोध्यते ॥ रसशब्दश्च रसनाग्राह्ये गुणे ॥ द्रवद्रव्ये सारभूतेऽर्थे ॥ आस्वाद्यानन्दजनके च तत्र तत्र प्रसिद्धस्तेषु प्रकृते कोर्थोविवक्षित इत्याकाङ्क्षायां रसः ह्येवायं लब्ध्वा आनन्दीभवति कोह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात् ॥ एष ह्येवआनन्दयातीत्यनेन रसस्यानन्दत्वे प्राणधारणप्रयोजकत्वहृदयाकाशस्थत्वमानन्दजनकत्वं च तस्यैवोच्यते ॥ तेन हृदयस्थः प्राणितानन्दजनको य आनन्दः स रस इति सिध्यति ॥ तत्र यथानन्दोत्पत्तिरूप-

स्य कार्यस्य तत्तदवयवेष्वनुभूयमानत्वेनानन्दस्य सर्वशरीरव्यापित्वं
तथापि उक्तश्रुत्या स मानसीन आत्मा जनानामिति श्रुत्यन्तरेण च मन-
स्येव तस्य विशेषस्थितिरिति निश्चीयते ॥ एवं सति रसशास्त्रप्रणाड्या
जायमानो यो मानसो विकारः प्रमोदात्मा स रसात्मना भगवत एव
कार्यभूतः एष ह्येवानन्दयातीति सावधारणश्रुतेः ॥ तथा तदंशभूत-
श्च ॥ एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रु-
तेः ॥ अत एव च प्रकृष्यमाणे तस्मिन् रसत्वप्रतीतिर्लोकानाम् ॥ तथा
योगश्च ॥ ब्रह्मादिषु पुरुषपदप्रयोगवद्भाक्तः । नचैवं सत्यानन्दमात्र-
स्यैव तथात्वप्रणाड्यामेव कुतो विशेष इति शङ्क्यम् ॥ रसस्वरूपस्यैव
तथात्वात् ॥ नच मानाभावः ॥ लौकिकस्य प्रणाड्याभिव्यङ्ग्यत्वे सि-
द्धे तद्दृष्टान्तेनालौकिकेऽपि तथानुमातुं शक्यत्वात् ॥ अलौकिको
रसः प्रणाडीविशेषाभिव्यङ्ग्यः रसत्वात् लौकिकरसवदिति प्र-
योगात् ॥ अनन्तरूपमिति श्रुत्या वास्तविकत्वाच्च तेनेदं सिद्धम् ।
कारणधर्माणामेव कार्येऽभिव्यक्ते संदेहनिरासाच्च । नचानित्यत्वाप-
त्तिः ॥ ब्रह्मत्वादेव तन्निरासात् ॥ अत एव न मनोविकारत्वमपि ॥
नाप्यनेकरूपत्वं दोषः ॥ तस्य प्रणाडीकृतत्वेन वास्तविकरूपाबाध-
कत्वात् परब्रह्मैव रसशास्त्रोक्तप्रणाड्या हृद्याविर्भूतं सद्रस इति ॥ त-
च्च चिदंशो न्यग्भूत एव ॥ अत एव कविर्भूवाचक इति श्रुतौ सदान-
न्दत्वमेवोक्तम् ॥ नच भूशब्दस्य सत्तावाचकत्वात्सत्तानन्द इति
भवति नतु सदानन्द इतीति शङ्क्यम् ॥ सत्ताया आत्मरूपत्वेन ध-
र्मत्वाभावस्य व्याकरणमते सिद्धत्वात्सत एव सिद्धेः ॥ अतः परब्र-
ह्मणः सदानन्दत्वेन प्रणाड्याविर्भूतेऽपि तथात्वमेव ॥ नन्वस्त्वेवं
तथाप्युक्तश्रुतौ मानसीनत्वासिद्धेरतिगुप्तस्यैव ब्रह्मणो रसत्वमु-
च्यते ॥ तथासति बहिराविर्भूतत्वस्य भगवतोऽतिगुप्तत्वाभावेन रसत्वा-
भाव इति चेन्नैवम् । यत्रेदं वर्णनेनोपबृंहितं तत्र भगवान्न बहिः प्रकटः
किंतु हृद्येवेत्युपपादितं बर्हापीडमित्यस्य स्वतन्त्रे ॥ यद्यपि बहि-
स्तदापि आसक्तिभ्रमन्यायेन मानसीन एवेति गुप्तत्वेन रसत्वस्या-
ऽबाधात् ॥ नन्वेव सति वृत्तिविशेषरूपत्वान्न भगवानिति चेन्न । लो-
के वृत्त्या ग्राह्यस्य देशकालपरिच्छिन्नत्वेन तत्र देशे तदभावेऽपि वि-
रहादौ संस्कारप्राबल्यादिना वृत्तिनिर्गमात् व्याप्तिः स्वीक्रियते ॥
न तथा प्रकृते देशकालापरिच्छिन्नत्वात् ॥ किंतु अनन्यभक्तिलभ्य-

स्यात् या ईदृशी भक्तिस्तथाविर्भवति ॥ मात्र मनोधर्म इति तद्भिव्यङ्ग्यत्वेन बहिराविर्भूतस्य मानसीत्वेन वृत्तित्वाभावात् ॥ मायावादिमते वृत्त्यवच्छिन्नचैतन्यविषयावच्छिन्नचैतन्ययोरैक्यलोलाभावे बहिष्ठस्य वृत्त्यवच्छिन्नत्वेऽपि वृत्तित्वाभाववत् ॥ नन्वस्त्वेवं तथापि प्रकृतानुरोधात् शृङ्गारात्मकत्वमेवात्र वक्तव्यम् ॥ तस्य च परस्पराकाङ्क्षस्त्रीपुंव्यक्त्यात्मकालम्बनद्वयाधीनस्थितिकत्वादत्रापि तथात्वमङ्गीकर्तव्यं तच्च भगवतो रसत्वे विरुध्यते ॥ एकालम्बनकत्वेन रसाभासत्वप्रसञ्जकत्वादिति चेन्न । आलम्बनत्वस्यापि सत्त्वात् कामिनां दर्शयन् दैन्यमित्यस्य टिप्पण्यां रसात्मको रसवांश्च भगवानिति कण्ठरवेणोक्तत्वात् ॥ अत्रापि तथाङ्गीकाराच्च । न च विरोधः ॥ स्वप्रतियुत्वस्याश्रौतत्वेन सर्वसंमतत्वात् ॥ यथान्येषां कामेन कामत्वं कामस्य तु स्वत एव ॥ तथाऽन्येषां रसेन रसत्वं, रसस्य तु स्वत इत्यस्यापि सुवचत्वाच्च ॥ तदप्रसङ्गात् ॥ तस्माद् बहिराविर्भूतस्यापि भगवतो रसत्वमबाधमेव ॥ तद् हृदि कृत्वाहु ॥ रसोऽपीत्यादि ॥ मुख्यत्वात् ॥ भरतसूत्रादौ तस्यैव प्रतिपादनेन तथात्वात् ॥ तद्रूपतामिति । उपदर्शितरीत्या आलम्बनत्वम् ॥ एतच्छ्रुति ॥ रसरूपत्वं तदालम्बनत्वं च प्रपञ्चितमिति ॥ प्रथमं उद्देशेन इतराभ्यां विमर्शेन च विस्तार्योक्तां प्रतिज्ञातां दिशमाहुः । भगवानित्यादिना उक्तस्यार्थस्य श्रुतावस्फुटत्वेन श्रुतार्थापत्तिसिद्धत्वमाहुः ॥ अन्यथा श्रुत्युक्तस्यारभ्योक्तामित्यन्तम् ॥ एवं रसरूपत्वं तद्धर्मत्वं च समर्थयित्वा तयोरनुकृतित्वशोध्यतां व्युत्पादयन्ति । नहीत्यादि ॥ श्रुतिसक्तानुभवेति श्रुतिश्च भक्तानुभवश्च ताभ्यामित्यर्थः ॥ विरुद्धधर्माश्रयत्वमुपबृंहयन्ति ॥ तत्कामित्यादि । एवं लीलाया अनुकरणमात्रत्वदूषणप्रसङ्गेन भगवतो रसत्वं तद्धर्मत्वं च श्रुतिभ्यां स्थापयित्वा परोक्तमुपगम्यापि स्थापयन्ति ॥ अथ कृत्वा चिन्तयेति । परारोपितमङ्गीकृत्य स्वसुखसाधनविचारः कृत्वाचिन्ता ॥ तथा कर्तत्रामीति ॥ पराधीनत्वम् ।

यत्तु दृश्यत्वेन प्रकाश्यत्वेन चाऽऽवश्यमग्राह्यं, न तत्र सूर्यो भातीत्यादिश्रुतिविरोधाच्च भगवद्ग्रहणं युक्तमिति । तदसत्, दृश्यत्वस्यापि श्रुतिस्मृतिसिद्धत्वात् । तथाहि । कश्चिद्धीरः

प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्। ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः। भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन! * ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप!। शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः * त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुजमित्यादि। एवं सत्युभयाविरोधायादृश्यत्वरूपिका श्रुतिरिन्द्रियादिसामर्थ्येन दृश्यत्वं निषेधति। दृश्यत्वरूपिका भगवदनुग्रहेणैव भगवतो दृश्यत्वं वदतीत्यवधारणीयम्। यतो भगवतोक्तम्। मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगादिति। अत्रात्मयोगपदात् प्रसन्नः सन् स्वसामर्थ्यं दत्वा दर्शयतीति ज्ञायते। ब्रह्माणं प्रत्यपि भगवद्वाक्यम्। मनीषितानुभावोऽयं मम लोकावलोकनम्। अत एव सूत्रकारोऽप्याह दृश्यत्वपूर्वपक्षे। अपि संराधने प्रत्यक्षानुमानाभ्यामिति। अपीति पूर्वपक्षगर्हायां, मूर्खः पूर्वपक्षीति। यतः सम्यगाराधने पश्यन्ति। कथमेवम्?। प्रत्यक्षानुमानाभ्याम्। अनेकबाहूदरवक्त्रनेत्रं पश्यामीति प्रत्यक्षम्। ध्रुवादीनामनुमापकत्वम्। ताभ्यामित्यर्थः। श्रुतिस्मृतिभ्यामिति वा। एवं सति मां सर्वे पश्यन्त्विति साधारणेच्छया प्रादुर्भावो, न सर्वेषां दर्शनसामर्थ्यमवतारदशायाम्। अन्यदा तु, नाहं वेदैरिति, भक्त्या त्वनन्ययेति वाक्याच्च भक्त्यैवेति निर्णयः। भक्तानां त्ववतारदशायामपि भक्त्यैव, न साधारणेच्छया। तद्भक्त्यैव तदर्थमेव प्रादुर्भावात्। साधारणेच्छापि यतस्तदर्थैव। लोकमध्य एव यतस्तेषां सुखजननम्। अन्यथा लोके स्वप्राकट्यं निष्प्रयोजनकं स्यात्। सर्वेषां भगवद्दर्शनेऽपि यन्मोहानपगमस्तत्र तदिच्छैव प्रतिबन्धिका। तस्य सत्यसङ्कल्पत्वात्। एवमेव भगवतस्स्वरूपाज्ञानमपि। अलौकिकतेजोऽप्रदर्शनं लौकिकानुकरणं च ली-

लार्थमेव । अन्यथा लीलैव न सम्भवति । सर्वेषां च तदेव मोक्षः स्यात् । तथासति सृष्टिमर्यादोच्छेदः स्यात् । एवमेव प्रकाश्यत्वमपि ज्ञेयम् । यदादित्यगतं तेजो जगद्भासयतेऽखिलम् * यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति वाक्यात् स्वतेजसा स्वस्य प्रकाश्यत्वमिति नातिविरोधि । सर्वव्यवहारविषयत्वं च भगवत्कृतमेव, नतु जीवेन स्वतः कर्तुं शक्यम् । अत एव सूत्रकारोऽप्याह । प्रकाशवच्चावैयर्थ्यादिति । अर्थस्तु पूर्वेणाकारे प्रतिपादितेऽपि, यतो वाचो निवर्तन्ते, तं त्वौपनिषदमित्यादिनिरूपितव्यवहारविषयत्वविरोधो न परिहृतः, शास्त्रवैफल्यं चेत्यत आह । इदम् । यथा सौरादिप्रकाशो व्यवहार्योऽव्यवहार्यश्च नहि स्वतः सम्पादयितुं स्थापयितुं वा शक्यते । आगते तु सूर्ये मेघाद्यभावे च सान्निध्यमात्रेण व्यवहारः कर्तुं शक्यते । तथा लौकिकवाङ्मनोभिर्न शक्यते व्यवहर्तुम् । ईश्वरसान्निध्ये तु द्वयमाह श्रुतिः । कुत एतत् ? । अवैयर्थ्याद् । अन्यथैकस्याः श्रुतेर्वैयर्थ्यापत्तेरिति । दर्शनव्यवहारस्य श्रुतिसिद्धत्वमुक्तमेव । तथाच दर्शनव्यवहारन्यायेनापरस्यापि व्यवहारस्य निर्णयः । तथाचोक्तं श्रीभागवते । पश्यन्ति ते म इत्युपक्रम्य साकं वाचं स्पृहणीयां वदन्तीति । यमेवैष वृणुते तेन लभ्य इत्यादिश्रुत्या च । ननु दर्शनं ज्ञानमेव, न तु चाक्षुषं श्रुत्या निरूप्यते, ब्रह्मणोऽरूपत्वादिति चेन्न । भक्त्या त्वनन्ययेति वाक्ये तु ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपेति ज्ञानदर्शनप्रवेशानां भिन्नतयैव निरूपणात् । रासादिरूपश्च व्यवहारः प्रमाणसिद्ध इति तत्र प्रसिद्धकामतद्भावरिरंसारमणादयोऽपि शुद्धब्रह्मधर्मा एवेति ज्ञेयम् । सर्वशक्तिरिति श्रुतौ, पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतौ च सहजानन्तशक्तित्वेन निरूपितत्वेन सर्वार्थोपपत्तेः । तेन कामसमय

एवाकामोऽपि । निजचरणनखरसुषमालेशजिताशेषसुरसुन्दरीणामखिलस्त्रीरत्नभूतानां व्रजवरवधूनामनवद्यहृद्यकनकाचलेषु विहरन्नप्यात्माराम एव । अत एवात्मारामोऽपि तत्रोक्तः । प्रियाविप्रयोगेणावसादभावं भजमानोऽपि, तत्र वेद्मीत्यादिवचनैरजानन्नपि व्यापक एव, परमानन्दरूप एव, सर्वज्ञ एव । ननु प्रतियोग्यभावयोरेकावच्छेदेन स्थितिर्न वक्तुं शक्या, तथैव विरुद्धधर्माणामप्यतो नैवं वक्तुं युक्तमिति चेद्, न वयं वदामः, किन्त्वनुवदामो, न वयमत्र पर्यनुयोगार्हाः । यदनुवादस्तां श्रुतिं चेत् पर्यनुयोक्तुमुद्यतोऽसि, महत्ते साहसं खद्योतस्येवोदयाचलशिखरैकदेशस्थितिमात्रेण सकलजगत्तमःकपाटविपाटनपटुत्वाशक्यतया तरणिं पर्यनुयोक्तुमुद्यतस्य । अथ लोके तथा दर्शनात् तदनुसारेणैव च तदर्थस्य वक्तुमुचितत्वाच्छ्रुतित्वेनोभयस्यापि तुल्यत्वात् सगुणनिर्गुणपरत्वं कल्प्यत इति चेद्, हन्तैवं लोकानुसारेण तदर्थनिर्णये निर्द्धर्मकपदार्थस्यापि लोकेऽदर्शनात् सत्तादीनामपि कालाद्याधारत्वसमवायादिधर्मवत्त्वात्त्वदभिमतं ब्रह्मापि न सिद्ध्येच्छ्रुतिबलेनापि तुल्यम् । एवं सति लोकाप्रतीतं निर्द्धर्मकं वक्तुं चेदङ्गीकुरुषे, तदा लोकाप्रतीतामपि प्रतियोग्यभावयोरप्येकावच्छेदेन स्थितिमङ्गीकुरु । एवं सति श्रुत्यर्थो न लोकरीत्या निर्णेतुं शक्य इति सिद्धम् । अत एव श्रुतिरप्याह नैषा तर्केण मतिरपनेयेति । अलौकिकास्तु ये भावा न तांस्तर्केण योजयेदिति स्मृतिश्चेति पूर्वमेवावोचाम । किञ्च, भगवति श्रीयशोदास्तनन्धये सर्वे विरुद्धधर्मा दृश्यन्ते मृत्स्नोलूखलादिप्रसङ्गेषु । नहि दृष्टेऽनुपपन्नं नाम, व्याघातात् मायादिपक्षाणां तत्रैव निरस्तत्वात् । अथो अमुष्येशानेन तद्धर्मत्वेनैव च निरूपणात् । अत एव सूत्रकारोऽप्याह दर्शनाच्चेति ॥ अपिच, मायया प्रदर्शयतीति वदन् वादी प्रष्टव्यः ।

किं मायाशब्देन भगवत्सामर्थ्यं ब्रवीषि ? । उत तद्भिन्नाऽसद्रूपा असत्कार्यकर्त्रीति ? । आद्ये त्वोमिति ब्रूमः । नच स्वसामर्थ्येनेवासत् प्रदर्शितवानिति वाच्यम् । यः पृथिव्यां तिष्ठन् पृथिवीमन्तर इत्यादिश्रुत्या ब्रह्मधर्मत्वेनैव निरूपणात् । तादृशं चेद् ब्रह्म न स्यात्तदेवं वक्तुमवसरः स्याद्, नत्वेवम् । उक्तयुक्तेः । असत्प्रदर्शनं चासुरेष्वेव । यतो मोहनं तेषामेव भगवता क्रियते । अत्र च तादृशानामभावान्न तथा प्रदर्शनमिति सारम् । न द्वितीयः । विकल्पासत्त्वात् । तथाहि, सा किं स्वतन्त्रैव कर्त्री ? उत ब्रह्माधीना ? । नाद्यः । जडत्वात् । चेतनत्वेन त्वयाऽनङ्गीकारात् । द्वितीयपक्षे तु करणत्वं स्याद् वाशीवत् । तथाच सहजानन्तशक्तिमत ईश्वरस्य स्वरूपदर्शने का वाऽशक्तिर्यतस्तामुररीकुर्यात् । स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतेः । किञ्च, उक्तयुक्तिश्रुतिभ्यः सद्रूपस्वरूपं तया दर्शयतीति वक्तुमशक्यम् । एतेनैव सगुणत्वमपि प्रत्याख्यातम् । तद्धि प्राकृतसत्त्वादिगुणाकाररूपम् । तच्च स्वतः शक्तस्यानुपपन्नमित्युक्तम् । एतेनैव च ब्रह्मगताऽविद्या ब्रह्मगतविशेषकल्पिकेत्यपि पूर्वविकल्पगतद्वितीयपक्षो निरस्तः । ब्रह्मणि जीवातिरिक्ते त्वया तथाऽङ्गीकाराच्च । अङ्गीकारे वा तस्या उपाधिभावे प्रयोजिकेश्वरेच्छैव वाच्या तथाच सर्वभवनसमर्थस्येश्वरस्य त्वदभिमतरीत्या तथा करणे हेत्वभावः । इच्छादीनामपि त्वन्मते तदुपाधिभावोत्तरकालीनत्वादसम्भवश्च । आविद्यकत्वे स्वाभाविकत्वहान्या श्रुतिविरोधश्चेति दिक् ॥

एवं लीलाया अनुकरणमात्रताखण्डने प्रसङ्गेन भगवतो रसरूपत्वं तद्वत्त्वं च समर्थितं तदेतन्नैयायिका न मन्यन्ते इति तान् प्रति वक्तुं तन्मतमाहुः ॥

यत्त्वित्यादि ॥ दूषयन्ति ॥ तत्त्वित्यादि ॥ ईश्वरस्येति ॥ स्वाभाविकशरीरराहित्येन जन्यशरीरमादिशन्तः ॥ तदुपपादयन्ति ॥ तथा-

हीत्यादि ॥ सावयत्वेनानुमितेति ।। अत्र क्षित्यादिकं कार्यं सावयवत्वात् घटवत् यन्नैवं तन्नैवं आकाशवदिति प्रयोगो द्रष्टव्यः । क्षित्यादिपक्षकेत्यादि ।। क्षित्यादिकं कर्तृपूर्वकं कार्यत्वात् घटवत् । व्यतिरेके आकाशादिवदिति प्रयोगोत्र । नन्वनेनानुमानेन साध्यतावच्छेदकशरीरनिविष्टस्य कर्तुरेव सिद्धेर्नेश्वरस्येति शङ्कायां तेनसंसाधयति ॥ कर्त्ता चेत्यादि ॥ द्व्यणुकादिनगरसागरान्तक्षित्यादिचतुष्टयकर्त्ता तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमान् कर्तृत्वात् यो यत्कर्त्ता तदुपादानगोचरापरोक्षज्ञानादिमान् घटकर्तृकुलालवत् यन्नैवं तन्नैवं घटाकाशकर्त्रस्मदादिवदित्यनुमाने दृष्टान्तभूतकर्ता लोक एतादृश एव दृष्ट इति तादृशपक्षकरणे तत्कर्तृत्वेनानुमानात्सिद्ध्यन् पक्षतावच्छेदकशरीरनिविष्टद्व्यणुकाद्युपादानभूतपरमाण्वादिगोचरापरोक्षज्ञानादिमान् सेत्स्यति ॥ ततः, तादृशज्ञानवान् नित्यः आत्मत्वाद् अस्मदाद्यात्मवत् ॥ सर्वज्ञः सर्वकर्तृत्वात् यो यत्कर्त्ता स तत्संबधिसर्वतदुपकरणादिविषयकज्ञानवान् घटादिकर्तृवत् । यन्नैवं तन्नैवं तदकर्त्रस्मदादिवदित्यनुमानाभ्यां नित्यः सर्वज्ञ एव युक्तो भवतीति धर्मत्रयविशिष्टेश्वरसिद्धिरित्यर्थः ॥ नन्वेवं कर्तृत्वसिद्धौ कथमकर्तृत्वापत्तिरित्यत आहुः ॥ तथाचेत्यादि ॥ लोकदृष्टान्तेन साधने, ईश्वरः शरीरी कर्तृत्वात् लौकिककर्तृत्ववत् यन्नैवं तन्नैवं परममुक्तवदित्यनुमानात्सशरीरस्य कर्तृत्वे सिद्धे सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म शरीरजन्यं चेतनकर्मत्वादस्मदादिशरीरजन्यक्रियावदित्यनुमानात्त्वया जीवादृष्टजन्यशरीरे भूतावेशवदावेशाङ्गीकारेणानुमतत्वाच्चेश्वरे शरीरत्वसिद्धिर्वादिप्रतिवादिनोः समत्वान्निष्प्रत्यूहा ॥ तच्छरीरस्य नित्यत्वे एव परं विवादः ॥ तत्र च तच्छरीरं नित्यं सर्गाद्यकालीनद्व्यणुकारम्भपूर्वकालीनद्रव्यत्वात् परमाण्वादिवत् यन्नैवं तन्नैवमस्मदादिशरीरवदित्यनुमानेन नित्यस्यैव शरीरस्य सिद्धेस्त्वदभिमतशरीरस्य तत्र भूतावेशन्यायकप्रवेशस्य चासिद्ध्या अशरीरस्याकर्तृत्वापत्तिरपि निराबाधेत्यर्थः ।

ननु कायादिलीलाया अनुकरणमात्ररूपत्वेन प्रियाविप्रयोगतज्जनितक्लेशादयः पूर्णे ज्ञानैकघने परमानन्दस्वरूपे न वस्तुगु-

चिता इति चेत्, सत्यम् । नोचिता एव स्युर्यदि विप्रयुक्तत्वादिना पूर्णत्वादिकं भज्येत । नत्वेवम् । तत्तूक्तं प्रादेशमात्रस्यैवाभिविमानित्वादिनिरूपणेन ॥ अनुकरणमात्रत्वं लीलाया असङ्गतम् । तथाहि । भगवत्स्वरूपं हि श्रुत्यैकसमधिगम्यम् । तत्र च, सर्वकामः सर्वरस इत्यनेन सर्वकामरूपत्वं तद्वत्त्वं च, सर्वरसरूपत्वं तद्वत्त्वेन सर्वरसभोक्तृत्वं च प्रतिपाद्यते तैत्तिरीयकेऽपि, रसो वै सः रस ५ ह्येवायं लब्ध्वाऽऽनन्दीभवतीति पठ्यते । रसेषु च शृङ्गाररसस्य मुख्यत्वात् तस्य च रत्याख्यस्थायिभावरूपत्वात् तद्रूपत्वं तद्वत्त्वं चावश्यं वाच्यम् । तत्र व्रजसुन्दरीभावावलम्बनविभावत्वेन तद्भावानुसारेणैव सर्वकरणैस्तद्रसरूपत्वम् । एतच्च, बर्हापीडेति, अक्षण्वतामिति, चूतप्रवालेति श्लोकविवरणे प्रपञ्चितं पितृचरणैरित्यत्र दिङ्मात्रं प्रदर्श्यते । भगवानपि तासु तादृशभाववानिति तद्वत्त्वं भगवतः स्वरूपत्वं च भगवति भावानामपि स्वरूपातिरिक्तानामभावात् । अन्यथा श्रुत्युक्तं रसभोक्तृत्वं रसस्वरूपत्वं च भज्येत । एतस्य रसस्यैतादृशत्वादेव तथा मन्तव्यम् । तथाच यावती तस्य रसस्य मर्यादा तावती सर्वापि भगवत्यस्तीति मन्तव्यम् । अन्यथा रसत्वव्याहतिरित्युक्तम् । नह्यनुकरणे स्वस्मिन् रस आपद्यते, तासां वा रसस्योत्पत्तिः । अन्योन्यमनाविर्भावे तद्रसत्वं तत्र नास्तीति यतस्तद्रसशास्त्रमर्यादा । अत एव गजदृष्टान्तः सर्वत्र, आत्तगजेन्द्रलीलः, यथा मदच्युद्द्विरदः करेणुभिः, श्रान्तो गजीभिरिभराडिव भिन्नसेतुरित्यादि । अतः शृङ्गाररसस्वरूपत्वेन प्रियाविप्रयोगतत्कार्यतत्सङ्गमतत्कार्याः सर्व एव सम्भवन्तीति न ब्रह्मत्वक्षतिः । वस्तुन एव तथात्वात् प्रत्युत ब्रह्मत्वसाधका एव । विरुद्धसर्वधर्माधारत्वात् । वस्तुतस्तु ब्रह्मगतधर्मेषु विरोध एव नास्ति, श्रुतिभक्तानुभवसिद्धत्वादित्युक्तम् ।

तदुक्तं श्रीभागवतेऽपि, नहि विरोध उभयं भगवत्यपरिगणितगुणगण ईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनवितर्कविचारप्रमाणाभासकुतर्ककलिलान्तःकरणदुरवग्रहवादिनां विवादानवसर इति सर्वमनवद्यम् ॥ अथ कृत्वा चिन्तयोच्यते । यदि ग्रहिलतया आत्मारामेत्यादय एव ब्रह्मणि, नान्ये धर्मा इति मनुषे तदापि वदामः। अस्तु त्वदुक्तम् । परं तु सा ब्रह्मधर्ममर्यादाऽत्र भक्तेष्वप्यतिशयितानुग्रहेण, तद्भक्त्यतिशयेन च स्वरूपमर्यादामप्यतिक्रम्य तदधीनत्वं प्राप्तः सन् यथैव तदभीष्टं भवति तथैव लीलां कुर्वन्नुक्तसर्वभावान् स्वयमेव भजत इति भगवतः पुष्टिरूपमिदमुच्यते । तदुक्तं भगवता दुर्वाससं प्रति । ' अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज ' इत्युपक्रम्य ' वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ' इत्यन्तेन । अत्र सत्पदद्वयेन स्वस्य तेषु तथा रूपत्वं, तेषां च प्रतिपत्तिर्न माययेति ज्ञाप्यते । तथा सति तु सत्त्वं न स्यात् । नचानीशत्वप्रसङ्गः । एतस्यैव महदैश्वर्यरूपत्वात् । नह्यन्यः स्वरूपमर्यादां त्यक्तुं समर्थः । अत एव भिन्नसेतुरिति विशेषणम् । अत एवाचिन्त्यमहिमत्वं श्रुतिरप्याह, यतो वाच इत्यादिना । अतो यथा यथा शङ्कसे, तथा तथाऽधिकब्रह्मत्वमेवायातीति चिरं जीव । यत्तु जीवादृष्टसंपादितशरीरं भूतावेशन्यायेनाविश्येश्वरः कार्यं कृत्वाऽऽवेशं त्यजति, नत्वीश्वरे स्वाभाविकं शरीरादिकमस्ति । ज्ञानेच्छाप्रयत्नातिरिक्तविशेषधर्माभावादिति । तत्तूपेक्ष्यम् । ईश्वरस्याकर्तृत्वापादकत्वात् । तथा हि । तन्मते हि सावयवत्वेनानुमितकार्यत्वाक्षित्यादिपक्षककर्तृपूर्वकत्वसाध्यककार्यत्वलिङ्गकानुमानेन जगत्कर्तृत्वेनैवेश्वरसिद्धिः। कर्ता चोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमानेव लोके दृष्ट इति द्व्यणुकादिनगरसागरान्तस्य च पक्षीकरणे च तत्कर्तृत्वेन

सिद्ध्यँस्तदुपादानगोचरापरोक्षज्ञानादिमान् नित्यः सर्वज्ञ एव च भवतीति तादृक्तत्सिद्धिः ॥ तथा, यथा लोके ज्ञानादिमत एव कर्तृत्वं दृष्टमितीश्वरेऽपि ज्ञानादिसिद्धिरेव शरीरिण एवं लोके कर्तृत्वं दृष्टमितीश्वरेपि शरीरित्वसिद्धिर्निष्प्रत्यूहा । कर्तृत्वस्य शरीरित्वव्याप्यत्वात् । नन्वेवं कार्यत्वेनानित्यत्वानुमाने घटादिषु रूपसाहचर्यं लिङ्गस्य दृष्टमिति तद्विशिष्टस्यैव तस्य व्याप्यत्वे रूपाभाववति वायौ तदसिद्धिः । तत्सिद्धौ वायौ रूपस्यापि सिद्धिः स्यात् । नत्वेवम् । प्रत्यक्षबाधात् । ननु न साहचर्यमात्रं प्रयोजकम् । व्याप्तिरेव प्रयोजिका । सा च कार्यत्वानित्यत्वयोरेवेति वायावपि तत्सिद्धिरतस्तत्सिद्धिश्चेत्, तर्हि प्रकृतेऽपि कर्तृत्वप्रयोजकं ज्ञानेच्छाप्रयत्नवत्त्वमेवेति शरीरित्वस्य तत्साहचर्यवत्त्वेऽपि न तत्प्रयोजकत्वमतो नेश्वरे तत्सिद्धिः । अन्यथा दृष्टान्तीयाशेषधर्मापत्तिः पक्षे स्यात् । तथाच घटदृष्टान्तेन जलेऽनित्यत्वसाधने पृथिवीत्वादिकमपि सिद्ध्येत् । किंच, चेष्टां विना यत्नमात्रेण कुलालादेर्घटादिकरणे सामर्थ्याभावाच्चेष्टाश्रयस्य शरीरस्य सहकारित्वमस्तुनाम । ईश्वरस्तु प्रयत्नमात्रेणैव सर्वकरणसमर्थ इति न तदपेक्षा । किंच शरीरस्य परिच्छिन्नत्वनियमेन युगपत् सकलदेशगतकार्यानुत्पत्तिप्रसङ्ग इति चेन्नैतत् साधीयः । ज्ञानादिमत्त्वस्येव शरीरित्वस्याप्यन्वयव्यतिरेकसिद्धत्वात् । तथाहि । यत्र कुलालादिषु कर्तृत्वं तत्र शरीरित्वम् । यत्रच मुक्तात्मस्वशरीरित्वं, न तत्र कर्तृताम् । अत ईश्वरस्यापि कर्तृत्वाच्छरीरित्वमवश्यमङ्गीकर्तव्यम् । लोके तथा दर्शनात् । अन्यथेच्छादिकमपि न सिद्ध्येदविशेषात् । अथ चेष्टां विनापि प्रयत्नमात्रेण कार्यकरणे समर्थत्वादीश्वरस्य तदाश्रयतत्सिद्धिरिति ब्रूषे तदेच्छाप्रयत्नौ विनापि ज्ञानमात्रेणैव तथाकरणसमर्थत्वादीश्वरस्य नेच्छादि-

मत्त्वमित्यपि सुवचम् । नच शरीरस्य परिच्छिन्नत्वेनोक्तदोषाप-त्तिरिति वाच्यम् । अन्यथाऽनुपपत्तिबलात् । सिद्ध्यच्छरीरं यावत्तानुपपत्तिपरिहारस्तावद्रूपमेव सेत्स्यति । शरीरपरिच्छेदानि-त्यत्वानियमस्त्वनुपपन्नः । पक्षधर्मताबलादपरिच्छिन्ननित्यस्यैव सि-द्धेः । वस्तुतस्तु परिच्छेदानित्यत्वाद्यनुपपत्त्युद्भावनस्य शरीर-सिद्ध्यसिद्धिव्याहतत्वेनासम्भव एव । अन्यथा ज्ञानस्याप्यनित्य-त्वनियमेनेश्वरज्ञानस्याप्यनित्यत्वप्रसङ्गः ।

एवं दूषिते स्वोक्ते तत्समर्थनाय नित्यशरीरं प्रत्याख्यातुं प्रयतते । नन्वेवमित्यादि ॥ अयमर्थः । ईश्वरे यच्छरीरं साध्यते तच्छरी-रमीश्वराद्भिन्नमभिन्नं वा ॥ नान्त्यः ॥ आत्माभिन्नस्यापि तस्या-सिद्धत्वात् ॥ अतो भिन्नं नित्यसंबद्धं चाङ्गीकार्यम् । तथासति य था कार्यत्वेन कर्तृत्वपूर्वकत्वसाधनं कुर्वतश्चेतनकार्यत्वं शरीरजन्य-त्वसाहचर्यस्य भूयोदर्शनेन शरीरजन्यत्वविशिष्टकार्यत्वस्य व्या-प्यत्वात्साध्यतावच्छेदकशरीरनिविष्टे कर्तरीश्वरे तादृशशरीरसि-द्धिस्तदसिद्धौ च कर्तृत्वासिद्धिः । एवं वायुरनित्यः कार्यत्वाद्घट-वदित्यनुमानेपि लिङ्गस्य तथा स्यात् ॥ तथाच विशिष्टस्य व्याप्य-त्वे अनिष्टापत्तिः ॥ केवलस्य व्याप्यत्वे च शरीरस्यासिद्धिरित्युभ-यथापि तव मतमसंगतमित्यर्थः । तत्र समाधत्ते ॥ नत्वेवमित्यादि॥ तथाच सर्वत्र विशिष्टस्य व्याप्यत्वं न केवलस्यापि न ॥ किंतु य-त्र यथा प्रमाणसिद्धं तत्र तथाङ्गीकार्यम् ॥ तथा सति न कोपि दोष-इत्यर्थः ॥ एतमपि विभज्य व्याप्यत्वपक्षमनूद्य पुनः स्वेष्टं साधय-ति ॥ नन्वित्यादि ॥ तर्हीत्यादिच ॥ ननु प्रमाणान्तरेणाबाधितत्वा-त्कथं न प्रयोजकत्वमत आह ॥ अन्यथेत्यादि । प्रयोजनकत्वं कु-तो ऽवगतं प्रत्यक्षादनुमानाद्वा ॥ नाद्यः । ईश्वरस्याप्रत्यक्षत्वात्, द्वि-तीये तु दृष्टान्त एव दृष्टत्वात्तद्धर्मत्वमेव नतु पक्षधर्मत्वं, तथा सति जलपक्षकानुमाने पुनरिष्टापत्तिरित्यर्थः ॥ ननु जलपक्षकानुमा-ने पृथिवीत्वादिकं नानित्यत्वप्रयोजकं परमाणुष्वपि सत्वात् ॥ प्र-कृतानुमाने तु ज्ञानेच्छाप्रयत्नानामेव कर्तृत्वप्रयोजकत्वाङ्गीकारे चेष्टां विना कुलालादेः कर्तृत्वप्रसङ्ग इति क्रिया आवश्यकी, सा च श-रीरनिष्ठेति तदाधारस्य शरीरस्य प्रयोजकत्वमवर्जनीयमित्यत आ-

ष्ट ॥ किञ्च चेष्टामित्यादि ॥ ननुप्रयत्नमात्रेण सर्वकरणसामर्थ्यमत्यन्तापरिदृष्टं कल्पनीयम् । नित्यत्वं तु परमाणुप्रभृतिषु दृष्टमिति परममहत्यपि शरीरं संभवतीति नित्यशरीराङ्गीकरणमेव ज्याय इत्यत आह ॥ किञ्च शरीरस्येत्यादि ॥ ईश्वरशरीरं परिच्छिन्नं शरीरत्वादस्मदादिशरीरवदित्यनुमानेन परिच्छेदापत्त्या एवमेव नित्यत्वापत्त्या च तथेत्यर्थः । तस्मादशरीर एवेश्वरः कर्त्तेति प्राप्ते दूषयन्ति ॥ नैतदित्यादि ॥ अत इति ॥ भूयः साहचर्यात् । तथाच लोकरीत्या विचारकस्य तव तद्दावश्यकमित्यर्थः । ननु लोके तथादर्शनेऽपि पक्षे दृष्टान्तीयाशेषधर्मापत्त्या साहचर्यप्राप्तस्याप्रयोजकत्वात्तन्न युक्तमित्यत आहुः ॥ अन्यथेत्यादि ॥ व्याप्तिबलसिद्धस्यानङ्गीकारे । अयमर्थः । साहचर्यमात्रेत्यत्र मात्रपदं किं यावत्तत्परमुत भूयोदृष्टतत्परम् । अन्त्यं त्वोमिति ब्रूमः । लोहलेख्या पृथिवीत्वादित्यादौ भूयः साहचर्यस्याप्यप्रयोजकत्वदर्शनात् पूर्वोक्तदोषाच्च । आद्ये तु व्याप्तेरप्यप्रयोजकत्वापत्त्यानुमानस्यैवोच्छेदाद् इच्छादेरप्यसिद्धेस्त्वन्मतस्याप्यसिद्धिरित्यर्थः । ननु न मन्मतासिद्धिः । शरीरकर्तृत्वादित्यनुमानस्य अशरीरो महासमर्थत्वादित्यनेन सत्प्रतिपक्षत्वात् । तस्य च चेष्टां विनेत्यादिना प्रागेव सूचितत्वात् । नचात्यन्ताऽपरिदृष्टकल्पनं दोषः । आस्तिकवादिनामीश्वरस्यावश्यकत्वेनान्यथानुपपत्तिसिद्धत्वादितिशङ्कायामाहुः ॥ अथेत्यादि ॥ तथाच तादृक्सामर्थ्याङ्गीकारेऽपि तद्दोषतादवस्थ्यमित्यर्थः । ननु शरीराङ्गीकारेऽपि तादवस्थ्यम् । चेष्टाश्रयत्वेनाङ्गीक्रियमाणे तस्मिन् व्यापकत्वस्य महाकार्यकर्तृत्वेनाणुत्वस्य च वक्तुमशक्यतया मध्यमपरिमाणकस्यैव तस्य सिद्धावनित्यत्वापत्तियुगपत्सकलकार्यानुत्पत्तिप्रसङ्गस्य च दुर्वारत्वादित्यत आहुः ॥ नचेत्यादि ॥ यादृशेन यदात्मकेन यावत्परिमाणकेन युगपत्सकलकार्यानुत्पत्तिपरिहारस्तावद्रूपं तादृशं तदात्मकं तावत्परिमाणं तत्पूर्ववर्ति नित्यं, तदुत्पादनाऽनुकूलक्रियाशालि च सेत्स्यति । तथाचान्यथानुपपत्तिबलात्सर्वकरणसामर्थ्यं यथा त्वयाङ्गीक्रियते तथात्राप्यनुसन्धेयम् । युक्तेस्तुल्यत्वादित्यर्थः । ननु मन्मते सामर्थ्यस्य तथाङ्गीकारेऽपि न कस्यापि नियमस्य भङ्गस्तव तु शरीरपरिच्छेदान्नित्यत्वादिनियमस्य भङ्ग इत्यत आहुः ॥ शरीरेत्यादि ॥ पक्षधर्मताबलादिति ॥ अणुकादिनगरसागरान्तं तत्कर्ता

वा यथायथं पक्षस्तद्धर्मस्तावत्त्वं तत्कर्तृत्वं च तस्य तावद्व्यासज्ज्यवृत्तित्वं तावदुत्पादनानुकूलक्रियाशालित्वं च । तदेतत्तदैव संगच्छते यदा तच्छरीरं तावत्कार्यदेशव्यापि तावत्पूर्ववर्त्ति च भवति, नान्यथेति । व्यासज्ज्यवृत्तित्वं तावदुत्पादनक्षमक्रियावत्त्वयोः स्वरूपसामर्थ्योत्तथेति सनियमस्तवानित्यशरीरवादिनोऽपि मतेऽनुपपन्न इत्यर्थः । नन्वेवमन्यधर्मेणान्यधर्मसाधने घटः अनित्यः कुलालजन्यत्वाद् घटान्तरवदित्यादौ पक्षधर्मभूतो घटत्वादिर्नित्यव्यापकत्वादिबलात् कुलालादिशरीरस्यापि तथात्वसिद्धिरित्यप्रयोजकमिदं साधनम् । तथा व्यधिकरणधर्मसाधने तद्बलस्य प्रयोजकता चेत् सुतरां समानाधिकरणेऽपि स्यात् । तथा सति घटादीनामपि तथात्वप्रसङ्गः । यदि द्यणुकायोजनं सामर्थ्यबलेनाशरीरः कुर्यात्पश्चात्किमिति प्रविशेत् । प्रविशन् वा असमर्थः कथं न स्यादित्यादितर्केण पक्षनित्यत्वापत्त्या ईश्वरस्याप्यसिद्धिरिति महानेवानय इत्यत आहुः ॥ वस्तुत इत्यादि ॥ अशरीरकर्तृवादिमते असिद्धिव्याहतं सशरीरकर्तृवादिमतेऽन्यथानुपपत्तिबलात् सिद्ध्यत् सर्वानुपपत्तिपरिहारपूर्वकं सच्चिदानन्दात्मकमीश्वराऽभिन्नमेव सिद्ध्यति सिद्धिव्याहतमतस्तथेत्यर्थः । ननु तर्हि नियमस्य का गतिरिति चेत्तत्राहुः ॥ अन्यथेत्यादि ॥ तथाच तव मते नियमभङ्ग इति वृथैवायं पर्यनुयोगस्तुल्यपरिहारत्वादित्यर्थः ॥

एवमेकं मतं दूषयित्वा पुनर्मतान्तरं दूषयितुमुपक्षिपन्ति ॥

यत्त्वीश्वरस्य कर्तृत्वेन शरीरत्वसाधने ईश्वरासिद्धावाश्रयासिद्धिः । तत्सिद्धौ च धर्मिग्राहकप्रमाणेनाऽशरीरस्यैव सिद्धत्वेन तद्बाध इति । तत्त्वविचारितरमणीयम् । तथाहि । अत्र धर्मिग्राहकप्रमाणं किमिति भवान् पृच्छयते । कार्यलिङ्गकमनुमानमिति चेद् ब्रवीति भवाँस्तदानेन कर्ता परं सिध्यति नान्यत् । ननु सत्यमेतत्, परन्तु कर्ता स्वयं कर्तृत्वेन सिद्ध्यन् स्वकर्तृत्वनिर्वाहकमादायैव सेत्स्यतीति वदामः । अहो किं तन्निर्वाहकं, ज्ञानेच्छाप्रयत्ना एव । कुत एतत् । यतो लोके कार्यकर्तृत्वं तद्वतामेव दृष्टं, न तद्रहितानाम् । तर्हि शरीरस्यापि तत्समानयोगक्षेमत्वाज्ज्ञाने-

च्छाप्रयत्नशरीरवानेव सेत्स्यति । अन्यथा तु ज्ञानादिकमपि न सेत्स्यति, लोके दर्शनस्य समानत्वादिति बुध्यस्व । ननु शरीरस्य महत्त्वेनोद्भूतरूपत्वेन च चाक्षुषत्वं कथं न स्यात् ? । लौकिकप्रत्यक्षाविषयत्वादिति ब्रूमः । श्रूयते हि देवानामपीन्द्रादीनामप्रत्यक्षत्वं विग्रहवतां, किं पुनरखिलदेवदेवस्याप्रत्यक्षत्वे शङ्का नाम । किञ्च, शङ्कानां तत्सिद्ध्युत्तरकालीनत्वात् तत्सिद्ध्यनन्तरमपराहतत्वेनैव नोदयसम्भव इति सङ्क्षेपः । एतेन कार्यस्य शरीरादिमत्कर्तृपूर्वकत्वनियमः प्रत्यग्रजायमानाङ्कुरादाविव शरीरिणः कर्तुरनुपलम्भान्निरस्त इति निरस्तम् । उक्तयुक्तिभिस्तत्रापि शरीरिकर्तृकत्वस्यैव सिद्धेः । अतो ज्ञानदुर्बलव्यामोहमात्रपरमेतन्मतं, न तु सच्छास्त्रीयमिति विद्वद्भिरुपेक्ष्यम् । एतदपि तन्मतानुसारेणैवोक्तम् । अस्माकं तु प्रति सत्कर्णजिह्वाग्रजागरूकोक्तश्रुतिस्मृतिपुराणवाक्यतत्त्वसूत्रभेरीघोषोद्घुष्टतया सर्वतःपाणिपादान्तत्वेनाचिन्त्यानन्तशक्तिमत्त्वेनैव भगवान् सिद्ध इति नानुमानमशक्यशङ्कापेक्षापीत्यलं प्रसक्तानुप्रसक्त्या ॥

यत्त्वित्यादि ॥ ईश्वरासिद्ध्याश्रयासिद्धिरिति जीवतुल्यतापत्त्या ईश्वरासिद्ध्याश्रयासिद्धिरीश्वरे पक्षे पक्षतावच्छेदकासिद्धिः ॥ तद्बाध इति ॥ शरीरित्वबाधः पक्षे साध्यशून्यत्वम् । तथाचैवं दोषद्वयापत्तेस्तत्साधनमसङ्गतमित्यर्थः । एतद् दूषयन्ति ॥ तत्त्वित्यादि ॥ अन्यथेत्यादि ॥ निर्वाहकं विहाय केवलस्य कर्तुः सिद्धौ । अत इदमपि मतमसङ्गतमित्यर्थः । शरीरसिद्धौ बाधकान्तरमाह ॥ नन्वित्यादि ॥ ईश्वरशरीरं चाक्षुषं महत्त्वे सत्युद्भूतरूपत्वात् अस्मदादिशरीरवदित्यनुमानेन चाक्षुषत्वसिद्धौ चाक्षुषं कथं न स्यादित्यर्थः । अत्र समादधते ॥ लौकिकेत्यादि ॥ तथाच अचाक्षुषं लौकिकप्रत्यक्षाऽविषयत्वाद् इन्द्रादिशरीरवदित्यनुमानात् । पूर्वानुमानं लौकिकप्रत्यक्षविषयरूपोपाधिग्रस्तमिति न तेन तत्सिद्धिरित्यर्थः ।

एवं नैयायिकमतं निरस्य तेनैव मीमांसकमतं निरस्यन्ति ।

एतेनेत्यादि ॥ न्यायबलात् कर्तृसाधनेन कार्यस्येत्यादिनोक्तो नैयायिकनियमः शरीरिणः कर्तुरनुपलम्भात् घटदृष्टान्तवत् प्रत्यग्रजायमानाङ्कुरदृष्टान्तेन कार्यत्वस्य हेतोर्विपक्षगामितया नैकान्तिकत्वावगमादपि निरस्त इति मीमांसकमतं निरस्तम् । तत्र हेतुः ॥ उक्तयुक्तिभिरित्यादि ॥ अङ्कुरादौ साध्यसन्देहस्यानन्यथाहितत्वेनाङ्कुरादेः पक्षसमतया विपक्षत्वाभावेन कार्यस्य सद्धेतुत्वेऽङ्कुरादावपि कर्तृतानिर्वाहकत्वपक्षधर्मताबलसिद्ध्यसिद्धिव्याघातानवसरपराहतत्वरूपाभिः साधकबाधकयुक्तिभिः शरीरकर्तृकत्वे कर्त्रनुपलम्भस्याऽप्यप्रयोजकत्वात्तेनापि नियमस्याबाधात्तथेत्यर्थः ॥ एवं न्यायेन साधयित्वा तस्याऽनुपयोगित्वायाहुः ॥ एतदपीत्यादि ॥ अयमर्थः । सांख्यास्तावत् प्रकृतेः कर्तृत्वमङ्गीकृत्य ईश्वरं न मन्यन्ते । तथाहि । प्रत्यक्षेणानवगम्यमानस्येश्वरस्य कार्यत्वादिलिङ्गकानुमानेन कर्तृतया साधने तादृशप्रकृतिसिद्ध्याऽर्थान्तरत्वेन तदसिद्धिः ।तस्य कर्तृतानिर्वाहकमादायैव सिद्ध्यङ्गीकारे तु तुल्ययोगक्षेमत्वाच्छरीरस्यापि सिद्धिः । सशरीरेश्वराङ्गीकारे तु शरीरवद्रागस्याप्यन्वयव्यतिरेकसिद्धत्वाद्रागीश्वरस्य सिद्ध्या तस्य जीवतुल्यतापत्तिर्नित्यमुक्तत्वहानिश्च । नच प्रकृतेर्जडत्वात्कर्तृत्वानुपपत्तौ तदधिष्ठातृत्वेन विवक्षितरूपस्यैवेश्वरस्य सिद्धिरिति वाच्यम् । अधिष्ठातृत्वस्यैव विचार्यत्वात् । तथाहि । किं नामाधिष्ठातृत्वम् । प्रकृतिनियामकत्वं वा तत्संनिहितत्वं वा तस्यां प्रतिबिम्बितत्वं वा । नाद्यः । चेष्टां विना ज्ञानादिमात्रेण तथात्वाङ्गीकारे जीवानामपि तथात्वापत्तेस्तथा सत्यनेकेश्वरापत्तेश्च। न द्वितीयः । तदाप्युक्तदोषापत्तेः । तत्संनिधानस्य सर्वेषु तौल्यात् । न तृतीयः । प्रतिबिम्बिते शरीरे मणौ च चलति शरीरमणिचलनप्रतीतिवत् प्रकृतिकर्तृत्वेनैव तस्य स्वस्मिन् कर्तृत्वाभिमानत्वात् । स्वातन्त्र्यासिद्ध्या पारिभाषिकत्वापत्तौ विवक्षितरूपेश्वरासिद्धेः । किञ्च ज्ञानादिमात्रेणात्मनो जडनियामकत्वाङ्गीकारे मृतशरीरेऽप्याहारादिक्रियापत्तिः । तदभावात्तस्याः प्राणबुद्ध्यादिकार्यत्वेन मृतशरीरे च तेषाम् अभावेन तदभावाज्जीवच्छरीरेऽपि तेषामेव नियामकत्वसिद्ध्याऽऽत्मनि तदभावात् । अतः पुरुषच्छायापातेन चेतनत्वापन्नस्य बुद्ध्यादेरन्तःकरणस्यैवाधिष्ठातृत्वं, न तु तटस्थस्यात्मनः । अग्निसम्बन्धेन लोहस्य दाहकत्ववत् । अतो न चैवमपीश्वरसिद्धिः । किञ्च तस्य

स्वातन्त्र्येण कर्तृत्वेऽकृताभ्यागमादिप्रसक्तिः। कर्मसहकारित्वेऽनीश्वरत्वापत्तिः । तथा स्वार्थे जगत्करणेऽनाप्तकामत्वापत्तिः । परार्थे करणे वैषम्यनैर्घृण्यादिप्रसक्तिः । अतः प्रकृतिरेव कर्त्री, प्रधानाज्जगज्जायते इति श्रुतेः। नच, स हि सर्ववित्सर्वकर्तेति श्रुतेरीश्वरस्य कर्तृत्वं शङ्क्यम् । एतस्य मुक्तात्मोपासासिद्धात्मान्यतरप्रशंसापरत्वादित्याहुः ।

तथा रामानुजाचार्याश्च। क्षित्यादिषु सावयत्वेन कार्यत्वमपि नानुमातुं शक्यम्। अकार्यम् अशक्यक्रियत्वात् । अशक्योपादानविज्ञानत्वात् । महाभूतशब्दवाच्यत्वाच्च आकाशवदिति भट्टभास्करोक्तैः प्रत्यनुमानैस्तस्य सत्प्रतिपक्षत्वात्। यदि चाकाशे निरवयत्वस्यानुकूलतर्कस्य सत्त्वेन क्षित्यादिवायुपर्यन्तेषु च तदभावेनोक्तहेतूनामप्रयोजकत्वं विभाव्यते तदापि कार्यत्वेन हेतुना बुद्धिमत्कर्तृपूर्वकत्वमात्रसिद्ध्या तादृशक्षेत्रज्ञानामेव कर्तृत्वेन सिद्धिरिति हेतोरर्थान्तरसाधकत्वान्नेश्वरसिद्धिः । न च क्षित्यादिवायुपर्यन्तस्य पक्षीकरणेन तदुपादानगोचरापरोक्षज्ञानादिमत्त्वस्य क्षेत्रज्ञेष्वशक्यवचनतया पक्षधर्मताबलात्तत्सिद्धिः। विवादाध्यासितं क्षित्यादिकं स्वोपादानगोचरापरोक्षज्ञानादिमदनेककर्तृपूर्वकं कार्यत्वात् । विचित्रसन्निवेशसार्वभौमसदनवदिति दृष्टान्तेनानेककर्तृसिद्ध्या पक्षताया दुर्बलत्वात् । महीमहार्णवादीनां कार्याणामनेकत्वात्तेषां सर्वेषामेकदैवैकेन निर्मितत्वे प्रमाणभूतस्य हेतोरभावात। पृथग्भूतेषु कार्येषु कालभेदकर्तृभेदयोः प्रत्यक्षसिद्धत्वेन प्रत्युतबाधाच्च । नच जीवानां तादृशनिर्माणशक्त्यदर्शनेन तन्निवृत्तौ कार्यबलेनैव तत्सिद्धिरिति वाच्यम्। पूर्वमशक्तानामपि पश्चात् पुण्यविशेषोपचयेन शक्तिदर्शनात्पुण्यविशेषोपचयेनातिशयितादृष्टसम्भावनया च तादृशविलक्षणकार्यकर्तृत्वस्यापि संभवात्। इदमेवोक्तं कपिलाचार्यैः। मुक्तात्मनः प्रशंसावाक्यमुपासासिद्धस्य वेति सूत्रे । इदं योगिनोऽप्युपलक्षकम् । किञ्च। युगपत्सर्वोत्पत्तिस्थिती न प्रमाणपदवीं व्रजतः। लोके क्रमेणैव तयोर्दर्शनाद्युगपत्तत्कल्पकस्य हेतोरशक्यवचनत्वात्। क्रमेण तत्कल्पने विरोधाभावाच्च । अतः, क्षित्यादिकं बुद्धिमदेककर्तृकं कार्यत्वाद् घटवदित्यत्र, तन्नैककर्तृकं कार्यत्वात् घटपटस्तम्भादिसमूहवदिति दृष्टान्तेन हेतोः साधारणत्वम्। तथा भूधरादिनिष्ठं कार्यत्वं न बुद्धिमदेक-

कर्तृकत्वसाधकं समूहनिष्ठत्वात् । घटपटस्तम्भादिसमूहनिष्ठकार्यत्ववदित्यनुमानान्तरादपि तथा । किञ्चेदं क्षित्यादिगतं कार्यत्वं युगपदुत्पद्यमानसर्वगतं वा क्रमिकोत्पाद्यमानसर्वगतं वा । आद्ये आश्रयासिद्धत्वम् । द्वितीये तु विरुद्धत्वम् । तस्मान्न कार्यत्वलिङ्गकाऽनुमानेनेश्वरसिद्धिः । नापि जगदेकचेतनाधीनम् । अचेतनारब्धत्वात् । नीरोगस्वशरीरवदित्यनुमानात् सिद्धिः । तथाहि । किमिदमेकचेतनाधीनत्वम् । एकचेतनायत्तोत्पत्तिस्थितिकत्वमिति चेन्न । नीरोगस्यापि शरीरस्य पितृपुत्राद्यनेकचेतनादृष्टजन्यत्वे तदुत्पत्तिस्थित्योस्तदधीनत्वेनैकचेतनाधीनत्वाभावाद् दृष्टान्तसाध्यवैकल्येन हेतरसाधारणत्वापत्तेः । किञ्च । शरीरस्थितिरपि किं स्वावयवेषु समवेतता उत प्राणनम् । आद्ये अवयवाधीनत्वाद्यचेतनापेक्षा घटादिवत् । द्वितीये क्षित्यादीनां शरीरत्वाभावेन पक्षे असंभव इति पक्षसपक्षानुगतस्थित्यनुपलम्भः । नाप्यनेकचेतनाधीनप्रवृत्तिकत्वम् । पक्षान्तर्भूतेषु गुरुतररथशिलामहीरुहादिष्वनेकचेतनाऽधीनप्रवृत्तिकत्वदर्शनेन व्यभिचारात् । नापि चेतनमात्राधीनत्वम् । सिद्धसाधनत्वादर्थान्तरापत्तेश्च । किञ्च । ईश्वरः कर्त्ता न भवति । प्रयोजनशून्यत्वाद् अशरीरत्वाच्च । मुक्तात्मवदिति बाधकानुमानादपि नेश्वरकर्तृत्वसिद्धिः । किञ्चात्यन्तापरिदृष्टेश्वराख्यपुरुषस्य तस्मिन् सामर्थ्यविशेषस्य च कल्पनेऽत्यन्तगौरवात् क्लृप्तानां जीवानामेव तपोयोगयागादिलब्धसामर्थ्यानामेव कर्तृत्वेन कल्पनं लघीय इत्यचेतनारब्धत्वलिङ्गकानुमानेनापि नेश्वरसिद्धिरित्याहुः ॥

यानि तु,कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः * वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्यय इत्युदनाचार्योक्तानुमानानि तानि तु व्याख्यातृभिरेवं व्याख्यातानि । तथाहि । अत्र कार्यं तु प्रसिद्धमेव । आयोजनं तु सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म । धृतिर्धारणं गुरुत्ववतो ब्रह्माण्डादेः पतनाभावः । आदिपदाद्ब्रह्माण्डादेर्नाशः । पदं घटादिसंप्रदायव्यवहारः, घटादिपदप्रयोगो वा । प्रत्ययो वेदजन्यं धर्मादिज्ञानम् । श्रुतिर्वेदः । वाक्यं पदसमूहः संख्याविशेषः सर्गादौ परमाणुनिष्ठद्वित्वादिसंख्याजन्यं परिमाणमित्यादि ।

प्रयोगास्तु– क्षित्यादिकं कर्तृजन्यं,कार्यत्वाद् घटवत् ।अन्ये तु जन्यत्वादित्यपि प्रयुञ्जते । तथा क्षितिः । उपादानगोचरापरोक्षज्ञानोपायेच्छा

तादृशकृतिजन्या, ज्ञानेच्छाजन्या, कृतिजन्या वा । जन्यत्वात् । घटादिवदित्यपि । पूर्वोक्तं कर्म चेतनप्रयत्नपूर्वकं कर्मत्वात् । अस्मदादिशरीरजन्यक्रियावत् । उक्ता धृतिः चेतनप्रयत्नपूर्विका धृतित्वात् । वियति विहङ्गमधृतिवत् । ब्रह्माण्डादि प्रयत्नवद्विनाश्यं विनाशित्वात् पाट्यमानपटवत् । उक्तव्यवहारः स्वतन्त्रप्रयोज्यः, व्यवहारत्वात् । आधुनिकलिप्यादिव्यवहारवत् । पूर्वोक्तं ज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत् । वेदः पौरुषेयो वेदत्वात् । यन्नैवं तन्नैवमाकाशवत् । वेदः पौरुषेयो वाक्यत्वात् । भारतादिवत् द्व्यणुकपरिमाणं संख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात् तुल्यपरिमाणकपालद्वयारब्धघटपरिमाणवदिति इदं चैवं व्युत्पादितं मैथिलभवदेवमिश्रैः । अत्र प्रथमे प्रयोगे कर्तृजन्यत्वं तु स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिदृष्टाद्वारकजन्यत्वम् । अत्रादृष्टाद्वारकेति विशेषणान्न जीवात्मनिरूपितदृष्टाद्वारकजन्यत्वेन सिद्धसाधनमर्थान्तरं वा । जीवस्य साध्यस्याभावेन स्वपदार्थाननुगमात् कथं व्याप्तिग्रह इति वाच्यम् । स्वपदार्थाननुगमस्यादोषत्वात् । अन्यथेच्छादिज्ञानाद्यनुमानं स्यात् । स्वविशेष्यकज्ञानत्वादिनैव तत्र कार्यकारणभावात् । अत्र च सकर्तृकत्वादिसाध्यकानुमाने कर्तृत्वेनैव कारणताज्ञानजन्यादिसाधकं च ज्ञानत्वादिना । एवं कार्यताऽपि कार्यत्वेन जन्यत्वेन च । नच शरीरगौरवेणाप्रयोजकत्वं शङ्क्यम्, अवच्छेदककोटौ घटत्वादीनां प्रवेशे आनन्त्यगौरवात् । ध्वंसस्य जन्यत्वेन तस्य च जन्याभावत्वेनावच्छेदकतया प्रवेशे शरीरगौरवाच्च । एवं तु विवक्षितविवेके जन्याभावत्वैकदेशस्य जन्यत्वस्यैव प्रवेश इति शरीरलाघवात् सामान्यलाघवादेकत्वलाघवात् कल्पनालाघवादुपस्थितिलाघवाच्च जन्यत्वेनैव कार्यता, न घटत्वादिना । कार्यत्वं च स्वसमवायिजन्यताख्येन परम्परासंबन्धेन कृतित्वमेवेति न तत्रापि गौरवम् । नच विशिष्यान्वयव्यतिरेकाभ्यां घटत्वकुलालत्वादिना विशिष्यकार्यकारणभावस्यावश्यकत्वात् सर्वमेतद्विरुद्धमिति वाच्यम् । कार्यमात्रवृत्तीनां जातीनां कार्यतावच्छेदकत्वमिति सिद्धान्तसमुद्घोषात् । नचाङ्कुरादौ हेतोर्विपक्षगामित्वेनानैकान्तिकत्वं शङ्क्यम् । तत्र साध्यसंदेहस्यानन्याहितत्वेन तस्य पक्षसमत्वात् । नच शरीरजन्यत्वस्योपाधेर्विद्यमानत्वाच्छरीराजन्यत्वस्य प्रतिसा-

धनस्य सत्त्वाच्च साध्यसंदेहस्यान्याहितत्वेनानैकान्तिकत्वं सिद्धमिति शङ्क्यम् । कर्त्रादिजन्यतायामपि गुरुभूतस्य शरीरजन्यत्वस्यानवच्छेदकत्वाल्लघुभूतस्य जन्यत्वमात्रस्यैवावच्छेदकत्वेन तस्य च साधनव्यापकत्वेनानुपाधित्वे हेतोरदुष्टत्वात् । एवञ्च कर्त्रादिजन्यतायामिव शरीरजन्यतायामपि जन्यत्वस्यैवावच्छेदकत्वादीश्वरे नित्यज्ञानादिकमिव नित्यशरीरवत्त्वस्याप्यङ्गीकारेण प्रतिसाधनदोषस्याप्यभावात् । अनुमानं च, क्षित्यादिकं शरीरजन्यं जन्यत्वाद् घटवत् । ईश्वरः शरीरी कर्तृत्वात् कुलालवद् इति । अनुकूलतर्कश्चात्र कर्तृत्वजन्यत्वाभ्यामिव शरीरत्वजन्यत्वाभ्यामपि पूर्वोक्तयुक्तितुल्ययुक्तिकः कार्यकारणभाव एव । श्रुतिश्च, यतो वा इमानि भूतानि जायन्त इत्यादि । सहस्रशीर्षापुरुष इत्यादि । आकाशशरीरं ब्रह्मेत्यादि च । श्रुतीनां चानुकूलतर्कविधया स्वतन्त्रतया च ब्रह्मणि प्रामाण्यमिति नवीनमतम् ॥ साम्प्रदायिकमते शरीरस्य कुलालाऽऽदिशरीरत्वेनैव कारणत्वं, न तु शरीरत्वेनेतीश्वरस्य नित्यमेव शरीरं लोकानुग्रहेण व्यवहारप्रवर्त्तनार्थम् ।

अतोऽस्मदाद्यदृष्टजनिते रामकृष्णादिनामके शरीरे भूतावेशन्यायेनावेशः, कार्यकरणानन्तरं च त्याग इति।अभिनवमते तु महेश्वरस्य विश्वमेव शरीरम्। तच्च नित्यानित्यपुञ्जघटितमित्यनित्यांशविरामेऽपि नित्यांशमादाय नित्यमेव। आकाशात्मकं च नित्यमेव । रामकृष्णादिनामकं त्वाविर्भावतिरोभावशालि भक्तानुग्रहेण कदाचित्कचिदाविर्भवति तिरोभवति च। अत एव तत्त्ववादिभिर्मूर्त्तमपि नित्यं विभु चेत्यङ्गीक्रियते। सर्वत्र सर्वदा तथाभूतभक्तभावनया भक्तैः साक्षात्क्रियमाणत्वात् । तादृशसाक्षात्काराणां प्रमात्वे सम्भवति भ्रमत्वकल्पनस्याऽन्याय्यत्वात् । तदुक्तमौत्सर्गिकधियां प्रमात्वमिति । विश्वात्मकं तु योगिप्रत्यक्षगम्यमपि विश्वरूपदर्शनादिषु श्रूयते एव सहस्रशः। एवं श्रुत्यादिभिः शरीरेऽङ्गीकृते तदनुसारिसकर्तृकत्वानुमानं निर्दुष्टमेव। एवमेकेनेश्वरेण सकलक्षित्यादिकार्यसम्भवे सति प्रमाणाभावाद्गौरवाच्च नानेकेश्वरसिद्धिः । किञ्चानेकेश्वराङ्गीकारे तेषामैकमत्यं वैमत्यं वा स्यात् । तत्राद्ये स्वातन्त्र्याभावादैश्वर्यहानिः । द्वितीये तु कार्यासिद्धिरिति कार्यदर्शनादेकमेवाद्वितीयं ब्रह्मेत्यादिश्रुतिभ्यस्तादृशैः पुराणैश्चैकस्यैव सिद्धिरिति न पूर्वोक्तं किमपि दूषणम् । एव-

मेवेश्वरसिद्धौ कर्मत्वादिलिङ्गकान्यप्यनुमानानि तमेकमेव साधयन्तीति न कोऽपि क्वापि दोष इति। तदपि न विचारचारु। रामानुजाचार्योक्तसार्वभौमसदनदृष्टान्तस्य महीमहार्णवेत्याद्युक्तदूषणानामनुद्धारेण सिद्धसाधनादिदोषाणां हेतोराभासतायाश्च निवृत्त्यभावात्। एवं शरीरत्वसाधकानुमानेऽपि कापिलोक्तानां रागादिदोषाणामनपगमाज्जीवतुल्यत्वापत्त्यनुद्धार एव। एवमेव जन्यत्वलिङ्गकज्ञानजन्यत्वादिसाध्यकानुमानेऽपि द्रष्टव्यम्। अतः श्रुतिसाहाय्यं विना कथमपि न निर्वाहः। एवं कर्मत्वलिङ्गकानुमानमप्याश्रयासिद्धम्। अतः सद्धेतत्क्षुरित्यादिश्रुतिषु तन्मायाफलरूपेणेत्यादिभगवद्वाक्येऽन्यत्र च विभागादेव सृष्टिकथनेन पक्षतावच्छेदकस्य पक्षे अभावात्। एवं धृतिपक्षकानुमानेऽपि धृतेर्ब्रह्माण्डादिपतनात्यन्ताभावरूपत्वं वा तत्प्रागभावरूपत्वं वा वक्तव्यम्। तयोरुभयोरप्यनादित्वेन चेतनप्रयत्नपूर्वकत्वस्याभावाद्बाधितत्वम्। अतो धृतिशब्दार्थो विष्टम्भात्मकः संयोगविशेषो वक्तव्यः। तदापि चेतनप्रयत्नपूर्वकत्वे साध्ये तादृशानेकजीवप्रयत्नेन सिद्धसाधनमर्थान्तरं वा। एकचेतनप्रयत्नपूर्वकत्वे साध्ये तु गुरुतररथशिलादिदृष्टान्तेन हेतोः साधारणत्वं दुरपोहम्। एवं ब्रह्माण्डादिपक्षकानुमानेऽपि सिद्धसाधनादिकः। एकप्रयत्नवद्विनाश्यत्वसाधने तु खन्यमानमहाभवनदृष्टान्तेन हेतोः साधारणत्वं बोद्धव्यम्। एवं व्यवहारपक्षकेऽनुमानेऽपि लिप्यादिव्यवहारसांकेतिकप्रयोगदृष्टान्तेनोक्तदोषादिकं द्रष्टव्यम्। तथा धर्मादिज्ञानपक्षकानुमानेऽपि वेदापौरुषेयवादिनं प्रति सिद्धसाधनादिदोषदुष्टत्वम्। एवं वेदत्वलिङ्गकानुमाने हेतोः साधारणत्वम्। तथा वाक्यत्वलिङ्गकानुमानेऽप्याकाशवाणीदृष्टान्तेन हेतोः साधारणत्वम्। एवं त्र्यणुकपूर्यमाणपक्षकानुमानेऽपि तादृशसंख्याज्ञानस्य योगिनामपि सम्भवात्तैरर्थान्तरमिति सर्वाण्येवाभासरूपाणि। एवं नवीनमते यदीश्वरस्य शरीरमङ्गीकृतं तदपि युक्तिमूलत्वे रागादिमत्त्वप्रयोजनवत्त्वाद्यापत्त्यपरिहाराद् दुष्टमेव। श्रुतिमूलकत्वे तु श्रुतिषु सच्चिदानन्दात्मकतदभिन्नशरीराङ्गीकारात्कर्तृत्वस्यापि तत्रोक्तत्वात्तासां श्रुतित्वेनैव प्रामाण्यं, न तदनुगामित्वेनेति। यदप्यभिनवमते ईश्वरस्य विश्वात्मकं शरीरमङ्गीकृतं तच्च नित्यानित्यपुञ्जघटितत्वेऽपि नित्यांशमादाय नित्यमाकाशादिरूपं च नित्यमेवेत्युक्तम्। तदपि फल्गु

कर्तृत्वनिर्वाहकत्वेनाङ्गीक्रियमाणस्य विश्वपूर्वभावित्वस्यावश्यकत्वेन विश्वात्मकत्वानुपपत्तेः । नित्यांशमादाय तस्य पूर्वभावित्वाङ्गीकारे तस्य परमाण्वादिरूपत्वेन कर्तृतानिर्वाहकत्वविरहप्रसङ्गात् । नच नित्यानित्यपुञ्जात्मकमेव तदित्यपि युक्तम् । यस्य पृथिवी शरीरमित्यादिश्रुतिगतप्रत्येकपर्याप्तिकत्वविरोधप्रसङ्गात् । सर्वतःपाणिपादं तदित्यादिश्रुतिविरोधापत्तेश्च । प्रकृतमनुसरामः । अतो, नैयायिकमतानुसरणं बौद्धादिदूषकत्वेन शिष्टादरमात्रादित्यर्थः । शास्त्रयोनित्वसूत्रानुसारेणाहुः ॥ अस्माकमित्यादि ॥ अस्माकं व्यासानुसारिणाम् ॥ प्रतिसत्कर्णमिति ॥ संश्वासौ कर्णश्च सत्कर्णः सत्कर्णं सत्कर्णं लक्ष्यीकृत्येति प्रतिसत्कर्णम् ॥ भेरीघोषोद्घुष्टतयेति ॥ भेर्यो महादुन्दुभयः । ताड्यमानासु भेरीष्विति भारते प्रयोगात् । भेरीणां घोषेणोद्घुष्टो भेरीघोषोद्घुष्टस्तस्य भावस्तत्ता तया । एतस्य सिद्ध इत्यनेनान्वयः ॥

एवं नैयायिकमते निराकृते धर्माणां भेदाभेदं साधयितुं प्रवृत्तो मायावादी आगन्तुकवादी वा शङ्कते ।

स्यादेतत्, ब्रह्मधर्माः किं ब्रह्मणः सकाशाद् भिन्ना अभिन्ना वा । न तावदाद्यः । तेषामपि नित्यत्वेनाङ्गीकाराद् । एकमेवाद्वितीयम्, असङ्गो ह्ययं पुरुष इति श्रुतिविरोधात् । न द्वितीयः । धर्मत्वव्याहतेः । तथाचैकविज्ञानेन सर्वविज्ञानोपपत्त्यर्थं मपञ्चवद् ब्रह्मकार्या एव धर्मा इति मन्तव्यम् । तथा सति ब्रह्म सर्वकल्पनारहितमेव सेत्स्यतीति चेदत्रोच्यते । यथा सूर्यस्य तेजोरूपस्य प्रकाशोऽपि तद्रूप एव तद्धर्मरूपः । तेजस्त्वेनैव मूलाविच्छेदेन प्रतीयमानत्वान्नातद्रूपः । तस्माद्भिन्नत्वेन तदीयत्वेनापि प्रतीयमानत्वात् तद्धर्मरूपोऽपि । तस्मात् प्रतीत्यनुरोधेन तादृशमेव तद्वस्तूत्पत्तिशिष्टमपीत्यङ्गीक्रियते । तथा ब्रह्मधर्मा अप्यभेदबोधकश्रुत्यनुरोधेन तद्रूपा एव परास्य शक्तिरित्यादिषु षष्ठ्या भेदेनापि प्रतिपादनात् तद्भिन्ना अपि । तथाचोभयविधश्रुतिबलेनैव तादृशमेवैतद्वस्त्विति मन्तव्यम् । अलौकिकानुवादपूर्वकनिषेधपक्षस्य पूर्वमेवापास्तत्वात् ।

नच सूर्यजन्यमेव तेजोऽन्तरं प्रकाश इति वाच्यम् । यदादित्यगतं तेजं इति वाक्याद्भगवत्तेजस्त्वेनाजन्यत्वाद्भेदकल्पनायां प्रमाणाभावाद् गौरवाच्च । प्रलये सूर्यनाशेऽपि तेजसो भगवद्दत्तत्वेन पुनर्भगवत्येव स्थितिः । तेजःसहितस्य तस्यैव वा भगवति लयः । सूत्रकारोऽपि धर्मस्वरूपनिरूपण आहैवमेव । प्रकाशाश्रयवद्वा तेजस्त्वादिति । वाशब्दः पूर्वपक्षनिरासे । प्रकाशस्तदाश्रयश्च सूर्यादिस्तयोर्यथा भेदस्तद्वद्धर्मब्रह्मणोरपीत्यर्थः । प्रकाशस्य स्वाश्रयतेजोभिन्नत्वशङ्काव्युदासाय हेतु । तथा सति स्वाश्रयाऽभिन्नतेजस्त्वादित्यर्थो भवति । अथवा तेजोऽतिरिक्ते वस्तुनि नैवं दृश्यत इत्यत आह हेतुम् । ब्रह्मण्येव तेजःशब्दवाच्यत्वादिति । यदादित्यगतमिति वाक्ये तेजसः स्वधर्मत्वेन निरूपणाद् ब्रह्मापि तेजोरूपमिति भावः । तस्मात् तादृशधर्मविशिष्टमेव तद्वस्तु श्रुत्यैकमेवेति प्रतिपाद्यते । तथाचैवकारेण भगवद्धर्मातिरिक्तमेव वस्तु व्यवच्छिद्यते, न तु तेऽपि । तेषां स्वरूपान्तःपातित्वात् । न हि मध्यंदिने नभोमण्डले सूर्य एवास्तीति वाक्ये तत्प्रभासत्तापि निषिध्यते । अत एव द्वितीयस्कन्धे ब्रह्मस्वरूपनिरूपणे राज्ञा पृष्टः श्रीशुकस्तन्निरूपयन्नित्याह, न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिता इत्युपक्रम्य, युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन् रममाणमीश्वरम् । तथाच भगवद्धर्मा भगवत्येव नित्या एव । येषु च भगवान् स्वैश्वर्यादिधर्मान् ददाति, तेषु यावत्कालं भगवदिच्छा तावदेव तिष्ठन्तीति फलितं दशमस्कन्धे चाक्रूरदृष्टस्वरूपेण, श्रिया पुष्ट्या गिरा कान्त्या कीर्त्या तुष्ट्येलयोर्जया * विद्ययाऽविद्यया शक्त्या मायया च निषेवितमिति वाक्यैकवाक्यतायाम् । मूर्तिमद्भिरुपासिताः, सत्यज्ञानानन्तानन्दमात्रैकरसमूर्तय इति वाक्यैकवाक्यतायां च सर्वेषां धर्माणां स-

च्चिदानन्दरूपत्वं सिद्ध्यति । लीलाया अप्येवंरूपत्वादेव नित्यता मन्तव्या ॥

ननु गिरिकाननयमुनापुलिनपशुपक्षिमनुजादिसंबन्धिनी हि लीला । सा च तेषामनित्यत्वे कथं नित्या भवेत् । ननु !! साध्वी ते वाणी यत्तन्नित्यताशुश्रूषामपि तत्राभिव्यनक्ति । तन्नित्यता च प्रमाणादेवावसीयते । तथाहि । जयति जननिवासो देवकीजन्म-वादो यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मम् ॥ स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन व्रजपुरवनितानां वर्द्धयन् कामदेवमिति वाक्ये भिन्नकालानामपि द्वारकागोकुलमथुराधिकरणकलीलानां कर्तु-र्भगवत उत्कर्षेण स्थितेः स्वकथनसमयेऽपि वर्तमानत्वं जयतीति वर्तमानप्रयोगेण निरूपयन्नेव श्रीशुकस्तत्र तत्र लीलानामपि त-थात्वं बोधयितुमेककालीनत्ववाचकशतृप्रत्ययान्तपदे प्रयुक्तवान् अस्यन्निति, वर्द्धयन्निति च । तथाच कथनसमयेऽतीतत्वेन प्रतीतानामपि लीलानां तदा वर्तमानत्वं प्रतीयते । तच्च नित्यतायां-मेव घटते, नान्यथा । किंच कर्तुरेवेदानीं सत्त्वं चेदभिप्रेतं स्या-न्न लीलानामपि, तदा ता न निरूपयेदेव । परिचायकत्वेन तन्नि-रूपणे वा तत्कर्ता जयतीत्येव वदेत् । एवञ्च सति गत्यन्तरस-द्भावेऽपि यच्छत्रन्तस्यैव निरूपणं तेन लीलानामेव वर्तमानत्वं मु-ख्यतयाऽभिप्रेतमित्यध्यवसीयते । नच विशेषणत्वेनामुख्यमिति वाच्यम् । दण्डी प्रैषानन्वाहेत्यत्र, लोहितोष्णीषा ऋत्विजः प्र-चरन्तीत्यत्र च यथा प्रैषानुवादस्य तत्प्रचारस्य पूर्वसिद्धत्वेन न विधानम् । किन्तु विशेषणस्यैव दण्डित्वस्य लोहितोष्णीषत्वस्य च । अपूर्वत्वात् । तथा भगवतो वर्तमानत्वे संदेहाभावात् तत्ल्ली-लाकरणस्यैव वर्तमानत्वस्यात्रापि निरूपणात् । यद्यपि, वर्तमान-सामीप्ये वर्तमानवद्वेत्यनुशासनाद्वर्तमानसामीप्यादेवात्राप्येवं प्रयो-

ग इति वक्तुं शक्यम् । तथापि वक्ष्यमाणश्रुतिपुराणवाक्यैरसंदिग्धं निस्नतया निरूपणात्तत्रापि तदेकवाक्यत्वार्थं वर्तमानार्थ एव प्रयोग इति निश्चीयते । किञ्च तत्सामीप्येऽपि तथा प्रयोगस्य साधुत्वं तत्र ज्ञाप्यते । प्रयोगश्च सामीप्यगुणयोगाद् गौण एव, न तु मुख्यः । स तु मुख्यार्थबाध एव कल्पयितुं युक्तः । तद्बाधप्रकारश्चाग्रे वक्ष्यते । अपि च दशमस्कन्ध एव नामकरणप्रस्तावे सर्वज्ञेन गर्गाचार्येणापि निरूपितं, बहूनि सन्ति नामानि रूपाणि च सुतस्य ते * गुणकर्मानुरूपाणि तान्यहं वेद नो जना इति । अत्र हि नाम्नां रूपाणां च बहूनामेव सन्तीति प्रयोगेण वर्तमानत्वं बोध्यते । तत्रापि गुणवर्तमानत्वं बोध्यते । तत्रापि गुणानामौदार्यादीनामपि, कर्मणां कालीयदमनादीनाम् अनुरूपाणां तेषां तथात्वं बोध्यते । अनुरूपत्वं तु तत्समययोग्याकारक्रियादिमत्त्वम् । यथा गोवर्द्धनोद्धरणकर्मण्युत्थितत्वमुद्बाहुत्वं, तद्धारणक्रियावत्त्वं, सकलगोकुलजनाप्यायकत्वादिकत्वं च । तथाचैतादृशानां नाम्नां वर्तमानत्वं तदैव, यदि तत्प्रयोजकस्वरूपक्रियादीनां वर्तमानत्वम् । अन्यथा कदाचित् तत्क्रियानिवृत्तौ तत्प्रयुक्तं तन्नामापि तदा न स्यात् । पाचकपाठकवत् ।

स्यादित्यादि ॥ तत्र प्रतिवदन्ति ॥ अत्रोच्यत इत्यादि ॥ तस्मादिति ॥ उक्तरूपप्रत्यक्षप्रमाणसिद्धत्वात् ॥ ननु प्रलये सूर्यलयेन तेजसोऽपि लयात्तस्यातिरिक्तत्वमेवानायत्याङ्गीकार्यं तत्र भगवदीयत्वकथनं तु भाक्तमिति चेत्तत्राहुः ॥ प्रलय इत्यादि ॥ यावदधिकारमवस्थितिराधिकारिकाणामिति न्यायेन पक्षान्तरमाहु ॥ तेज इत्यादि ॥ भेदाभेदपक्षस्य न्यायसिद्धत्वमाहुः ॥
सूत्रेत्यादि ॥ तेन ब्रह्मधर्माः स्वाश्रयात्मकाः, तेजस्त्वात्, प्रकाशाश्रयसूर्यादिप्रकाशवदितिप्रयोगो बोध्यः । ननु, भगवद्धर्मेषु तेजस्त्वस्याप्रसिद्धत्वात्स्वरूपासिद्धत्वमाशङ्क्य व्याख्यानान्तरमाहुः ॥ अथवेत्यादि ॥ परो दिवो ज्योतिर्दीप्यते ज्योतिरुपसंपद्यते इत्यादौ तेजोमयं

विश्वमनन्तमाद्यं तेजोराशिं सर्वतो दीप्तिमन्तमित्यादौ ब्रह्मणि तेजस्त्वस्य सिद्धत्वादित्यर्थः । भाष्योक्तसंग्राहायाहुः ॥ तेजःशब्देति ॥ ब्रह्मणस्तेजस्त्वमुपपादयन्ति ॥ यदादित्येति ॥ अत एवेति ॥ ब्रह्मणि स्वात्मकधर्मसद्भावादेव ॥ इतीति वक्ष्यमाणम् ॥ भगैः स्वैरिति ॥ स्वाऽभिन्नैर्भगशब्दवाच्यैर्धर्मैः ॥ फलितमिति ॥ तथाच सूर्येऽपि तेजसस्तावदेवस्थितिरिति तस्य तेजसो भगवदीयत्वं निर्बाधमिति न तत्रोपचार इत्यर्थः ॥ वाक्यान्तरेणापि भेदाभेदं समर्थयन्ति ॥ दशमेत्यादि ॥ अत्र पूर्ववाक्ये श्रियेत्यादतृतीयया भेदो निर्दिष्टः । द्वितीयवाक्ये त्वाणिमाद्यैरिति बहुवचनेन बहुत्वं, मूर्तिपदेनाकारस्योल्लेखात्करादीनामभिन्नत्वं चोच्यते । तेन तथात्वं सिद्ध्यतीत्यर्थः । एवं धर्माणां तदात्मकत्वे निर्णीते देहस्यापि स्वरूपात्मकत्वात्तद्धर्मरूपाया लीलाया अपि नित्यत्वं निर्णेतुमतिदिशन्ति ॥ लीलाया इत्यादि ॥ एवं रूपत्वादिति ॥ सच्चिदानन्दरूपत्वाद्भगवदेकनिष्ठत्वाच्चेत्यर्थः ॥ अत्र भगवल्लीला नित्या भगवदेकनिष्ठत्वात्तज्ज्ञानवदितिरूपमनुमानं फलति । ननु श्रवणादिविषयनिर्द्धारोऽत्र ग्रन्थकरणप्रयोजनम् । तत्तु धर्मविशिष्टब्रह्मस्वरूपविचारादेव सिद्धमिति लीलानित्यत्वमपि धर्मविचारेण सिद्धमिति तन्नित्यतानिरूपणप्रतिज्ञा नात्यावश्यकीत्याकाङ्क्षायां पूर्वपक्षमुखेन तदावश्यकत्वं सूचयन्ति ॥ ननु गिरीत्यादि ॥ अयमर्थः । लीला नामानायासेन क्रियमाणं कर्म । तच्चोत्क्षेपणादिभेदेन विसर्गरत्यत्यभिजल्पशिल्पभेदेन वा तत्र पञ्चविधत्वेनोच्यमानमपि प्रतियोगिसाक्षेपतन्निरपेक्षभेदेन द्विविधम् । तत्र द्वितीयं तु भगवदेकतन्त्रत्वात्तदेजतीत्यादिश्रुतिसिद्धत्वादीश्वराप्राकृतत्वस्य पूर्वं व्यवस्थापनाच्च न पर्यनुयोगार्हमतः, प्रथममेव पर्यनुयुङ्क्ते ॥ कथं नित्या भवेदिति ॥ तथाचानित्या, प्रतियोग्यन्तरसापेक्षत्वात्तत्संयोगवदित्येवं साधनस्य विद्यमानत्वान्नित्यता दुर्घटेति । अस्य प्रश्नस्याक्षेपरूपत्वेन दूष्यत्वेऽपि फलानुभावादिनित्यसाधनाभावे संबन्ध्यनित्यतायां सोऽश्नुत इति श्रुत्युक्तपरमफलस्य न नित्यत्वसिद्धिरिति तां साधयितुं तद्धेतुत्वात्तां पूर्वपक्षोक्तिमभिनन्द्य शास्त्रस्यास्य श्रौतत्वाल्लौकिकयुक्तिविरोधोऽकिञ्चित्कर इति शब्देन तयोर्नित्यतासाधनप्रतिज्ञां सूचयन्ति ॥ नन्वित्यादि, प्रमाणादेवावसीयत इत्यन्तम् ॥ अत्रेदं बोध्यम् । लीलातत्संबन्धिनोर्नित्यतायां हि बाधकं भवद् यथासंभवं

कर्त्तुरनित्यत्वं वा भवेत् १ स्वरूपतः सम्बन्धानित्यत्वं वा २ प्रमाणाभावो वा ३ प्रमाणतात्पर्याभावो वा ४ तस्य तात्पर्यान्तरं वा ५ गौणः प्रयोगो वा ६ उत्पत्तिमत्त्वं वा ७ नाशप्रतियोगित्वं वा ८ क्रमिकत्वं वा ९ अनुभवो वा १० तन्नित्यताभावने उपासकेऽपराधप्रसक्तिर्वा ११ तैष्वप्रसादो वा १२ इदानीमिदमित्याकारको लीलास्थानामवतारकालीनानां वा कादाचित्कत्वेनानुभवो वा १३ प्रमाणदौर्बल्यं वा १४ अधिष्ठानध्वंसप्रयुक्ता लीलासम्बन्ध्यनित्यता वा १५ साधारणजन्यदृश्यत्वं वा १६ लौकिकत्वं वा १७ भगवद्भिन्नत्वं वा १८ भूतार्थप्रयोगो वा १९ तथानुभवो वा २० भविष्यदर्थकप्रयोगो वा २१ भविष्यत्त्वानुभवो वा २२ जन्यभावत्वेन नश्वरत्वेन व्याप्तिर्वा २३ कर्मस्वभावमर्यादा वा २४ प्रत्यक्षबाधो वा २५ लौकिकेष्वपि भक्तानां लीलासम्बन्धित्वेन बुद्धिर्वा २६ प्रमाणयोरितरेतरविरोधो वा २७ लीलास्थानां नाशानुभवादिर्वेति २८ एवमेतेष्वष्टाविंशतिषु कर्तुरनित्यत्वं, स्वरूपतः संबन्धानित्यत्वं, प्रमाणाभावं चेति त्रयं निरस्यन्ति तथाहीत्यादि ॥ स्वकथनसमय इति । अवतारतिरोभावावच्छिन्ने शुकोक्तिसमये ॥ प्रतीयते इति ॥ शब्दात् प्रतीयते ॥ नान्यथेति ॥ कर्तृस्वरूपानित्यत्वे, स्वधर्मानित्यत्वे, व्रजसुरवनितानामनित्यत्वे च । तथा च वर्तमानार्थकक्रियात्रयप्रयोगान्यथोपपत्त्यैव तत्कर्मरूपसंबन्धिनित्यत्वं सिद्धमित्यर्थः । नच धर्मानित्यत्वे तन्निरासस्य निरासार्थकाऽवतारस्य च वैयर्थ्यादिकं शङ्क्यम् । आविर्भावतिरोभावाभ्यां तस्यापि निरसनीयत्वात् । ननु कर्तृनित्यतयैवमत्र प्रयोगो, न तु लीलानित्यत्वे तस्य तात्पर्यमित्यत आहुः ॥ किञ्चेत्यादि ॥ ननु, तादृशप्रयोगस्य न लीलानित्यत्वे तात्पर्यं किन्तु कर्तृपरिचायकत्वे इत्याशङ्कायामाहुः ॥ परिचायकत्वेनेत्यादि ॥ एवञ्चेति ॥ तथानुक्तेत्यर्थः ॥ सतीति ॥ इदं सद्भाव इत्यनन्तरं संबध्यते ननु यदि लीलानित्यत्वमभिप्रेतं स्यात्तदा शब्दत्रयं भगवद्विशेषणत्वेनामुख्यतया न वदेदतो, नैवमिति शङ्कायामाहुः ॥ नचेत्यादि ॥ तथाच, सविशेषणे हीतिन्यायेन लीलानित्यत्व एव तात्पर्याद्गौणत्वं न दोषायेत्यर्थः । ननु प्रयोगस्य वर्तमानार्थकत्वे लीलानित्यत्वादिचिन्ता, सामीप्यार्थकत्वेऽस्यार्थस्यैवाऽभाव इति व्यर्थोऽयमाडम्बर इति शङ्कायां तदुक्तमुपगम्याहुः ॥ यद्यपीत्यादि ॥ तथाच प्रयोगस्यार्थद्वयसाधारण्यादनिर्णायकत्वेऽपि प्रमाणान्तरोपष्टम्भादेवं निर्णय इत्यर्थः । नन्वेवं सति प्रमाणान्तरेण

सर्वत्र तथा कल्पयितुं शक्यत्वादनुशासनवैयर्थ्यापात इत्यत आहुः ॥ किञ्चेत्यादि ॥ तत्रेति ॥ अनुशासने । सूत्रे हि वर्त्तमानातिदेशपूर्वकं प्रत्ययविधानाद् द्वयं बोध्यते । सामीप्ये तथा प्रयोगस्य साधुत्वं मुख्याऽपेक्षया गौणत्वं च । तथाच प्रयोगसाधुत्वमात्रेण सूत्रसार्थक्येऽपि गौणत्वस्यापरिहारान्मुख्यासंभव एव तदर्थकप्रयोगादरणमुचितं, न तु तत्संभवेऽपीति सूत्राशयान्न तद्वैयर्थ्यमित्यर्थः । एवं कर्त्रनित्यत्वलीलासंबन्धिस्वरूपाऽनित्यत्वप्रमाणाऽभावप्रमाणतात्पर्याऽभावप्रमाणतात्पर्यान्तराख्यपञ्चदोषपरिहारेऽपि गौणप्रयोगात्मकषष्ठदोषपरिहारस्य प्रमाणान्तरसापेक्षत्वेन शैथिल्यात्तत्परिहारायोत्पत्तिमत्त्वनाशप्रतियोगित्वक्रमिकत्वम् अनुभवलीलानित्यत्वभावजन्यापराधप्रसक्त्युपासकाप्रसादकाराधकत्वानुभवरूपसप्तदोषपरिहाराय लीलाप्रयुक्तानां नाम्नां तत्कर्तृणां रूपाणां च प्रमान्तरे वर्तमानत्वबोधनात्तेन लीलानित्यत्वमुपपादयन्तः पूर्वं गौणप्रयोगं परिहरन्ति ॥ अपि चेत्यादि ॥ तथाचात्र रूपाणां नाम्नां च सामीप्यभावेन प्रयोगे गौणत्वस्य वक्तुमशक्यत्वाल्लीलानित्यत्वं निर्बाधमित्यर्थः ॥

ननु पूर्वश्लोके जयतीति प्रयोगाद्भगवत्स्वरूपस्येवात्र सन्तीति प्रयोगबलादस्तु रूपाणां नाम्नां च यथाकथञ्चिद्वर्तमानत्वं तावता लीलानां कथं नित्यत्वसिद्धिरित्यत आहुः ॥ तत्रापीत्यादि ॥ तथाच तत्र यथा शत्रन्तप्रयोगस्य गौणत्वमाशङ्कितं तथात्र गुणकर्मानुरूपाणीति विशेषणे गौणप्रयोगत्वस्याशक्यवचनतया तद्बलात्तत्सिद्धिरित्यर्थः । तां व्युत्पादयितुमनुरूपत्वं विवरिष्यन्तो नाम्नां योगरूढत्वेन तादृशरूपवाचत्वमेवानुरूपत्वमिति तदनुक्त्वा तत्प्रयोजकरूपानुरूपत्वस्य स्वरूपमाहुः ॥ अनुरूपत्वं त्विति ॥ तत्समययोग्यतेति ॥ गुणकर्मसमये योग्यतेत्यर्थः । आदिपदेन गुणः । अत्र योग्यताया बाधाऽभावरूपत्वेन भगवता च स्वल्पेनापि रूपेण शकटभङ्गादिक्रियाणां करणात्स्वरूपयोग्यतायाः सदा सत्त्वेऽपि सर्वदा तन्मात्रेण रूपेण क्रियाणां करणात्तत्समये तेन तेन रूपेण तत्तत्करणाच्च तत्समयेति योग्यताविशेषणम् । आकारेत्यादिकं तु योग्यताया एव विवरणमिति बोध्यम् । एतस्योदाहरणमाहुः ॥ तथेत्यादि ॥ गुणानुरूपत्वोदाहरणं तु यथा ब्रह्मण्यत्वगुणे ब्राह्मणपूजनादिषु प्रह्वत्वं स्तुतिक्रियाशालित्वर्जुत्वादिकम् । नाम्नामनुरूपत्वं तूक्तमेव । तदेतदभिसन्धायाहुः ॥

तथाचेत्यादि ॥ एतादृशानामिति ॥ तादृशस्वरूपवाचकानाम् । अय-मर्थः । औत्पत्तिकादिसूत्रेषु शब्दार्थसबन्धानां नित्यताया उपपादितत्वेप्यर्थविषये आकृतौ संबन्धस्य लक्षणादोषग्रस्तत्वेन तदनङ्गीकृत्य व्यासपादैः शब्द इति चेदिति सूत्रे वैदिक्यां नित्यायां व्यक्तावेव संबन्धोऽङ्गीकृत इति प्रकृते तादृशधर्मविशिष्टस्वरूपसत्त्व एव तद्वाचकनामसत्त्वं सिद्ध्यति । तादृशस्याऽसत्त्वे तु अप्रयुक्तशब्दसत्तायां मानाभावेन तन्नामापि न स्यात् । रूपस्यानित्यत्वे तु नाम्नामप्यऽनित्यत्वापत्त्या सन्तीति प्रयोगो बाधित स्यात् । गर्गकथनसमये तत्प्रत्ययाभावस्य सार्वजनीनत्वात् । तथाच जैमिनिमते यथाऽऽकृतिसत्त्वं तथा व्यासमते गवादिव्यक्तिसत्त्वमिति सा यथा तत्तद्रूपादिविशिष्टैव सतीत्यतो विशेषणीभूताकारादिसत्ता प्राप्यते तथाऽत्र मुख्यतया सन्तीति प्रयोगेणोक्तविशेषणविशिष्टस्वरूपसत्तायां विशेषणत्वेन लीलाया अपि वर्तमानत्वं प्राप्यत इत्यर्थः । ननु उक्तसूत्रे,अतः प्रभवादित्यनेन वेदशब्देभ्योजगदुत्पत्तिमात्रं कथ्यतेऽतः कथं नित्यसृष्टिसिद्धिस्तदभावे च कथं व्यक्तौ संबन्धसिद्धिरितिचेन्न । प्रभवशब्दस्य ज्ञानविषयत्वमात्रपरत्वात् सुखेन तत्सिद्धेः । नचात्र तादृशतत्सृष्टौ मानाभावः शङ्क्यः । अनुकृत्यधिकरणे सर्वस्य भगवदनुकारितायाः सिद्धत्वेन पुरुषसूक्ते तद्विवरणभूते द्वितीयस्कन्धीयाध्याये च यज्ञसम्भाराणां पशुवनस्पतिप्रभृतीनां ब्रह्मणा दृष्टत्वेन तेषामेवात्र प्रमाणत्वात् । नच समाननामरूपत्वसूत्रात् प्रवाह एव शक्तिरिति व्यासाऽभिप्राय शङ्क्यः । तस्य पक्षान्तरत्वात् । आवृत्तावप्यविरोध इति सूत्रस्यापिशब्देन तस्य पक्षस्य गौणत्वानिश्चयात् । अतः, सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयदिति श्रुत्युक्तसृष्ट्यन्तरविषयत्वात् प्रवाहशक्तिपक्षस्य न पूर्वोक्तबाधकत्वमिति तदनुरूपादिसत्ताप्रयुक्तं लीलानित्यत्वमविवादम् ॥

औपचारिकप्रयोगेण नामादिसत्तामुपपादयन्नुक्तविशेषणेन लीलानित्यत्वासिद्धिं शङ्कते ।

ननु यथा लोके पाकानुकूलक्रियाराहित्यदशायामपि पाचकमाकारयेत्यादिप्रयोगे यदा कदाचित्तद्वत्त्वेनातदानीमपि तथोपचारस्तथात्रापि कदाचिद् गुणकर्मयोगात् प्रवृत्तस्य नाम्नो गुण-

कर्मराहित्यदशायामप्युपचारात् प्रयोगसंभवेन सन्तीत्यस्योपपत्ते-र्न तन्नित्यत्वमायातीति चेन्मैवम् । औपचारिके प्रयोगे नामत्वा-ऽभावात् । तस्य मुख्ययैव वृत्त्या बोधकत्वात् । लोके नरसिंहा-दिनामानि तु डित्थकपित्थादिनामवद् रूढ्यैव तद्वाचकानि, न तू-पचारतः । केवले नरेऽप्यशूरेऽपि च तथा प्रयोगात् । अत एव लौकिकपुरुषे प्रयुक्तानि श्रीकृष्णेत्यादीनि नामानि न भगवन्ना-मानि । तेषां सदानन्दरूपत्वाद्यर्थवाचकत्वेन लौकिकपुरुषे च तद-ऽभावेन तदनर्थको लौकिक एव तत्स्वरूपः शब्दविशेषः स इति मन्तव्यम् । भगवन्नामानि त्वखण्डशब्दब्रह्मरूपाणि । यथा भग-वत्स्वरूपे शरीरत्वभानं ग्राहकदोषात् तथा नामस्वपि लौकिक-शब्दत्वेन भानं तद्दोषादेवेत्यादि प्रपञ्चितं पितृचरणैः श्रीभागवत-विवरणे । तेन स्वरूपवन्नाम्नामपि सर्वेषां नित्यता मन्तव्या ॥

नन्वित्यादि ॥ तथोपचारत इति । गौण्या आपादनमुपचारः । सा च छत्रिणो यान्तीत्यादौ यथा कादाचित्केन लिङ्गेन तथाऽत्र का-दाचित्केन लिङ्गेन प्रयोगे ज्ञेया॥ नन्वनित्यत्वमिति ॥ न लीलानित्यत्व-म् । अत्र समादधते॥ मैवमित्यादि ॥ औपचारिके कादाचित्कक्रिय-या प्रयुज्यमाने पाचकादिपदे नामत्वाभावान्नाम्नो मुख्यवृत्त्यैव बो-धकत्वादत्र च नामपदाश्च पाचकादिपददृष्टान्तेन प्रत्यवस्थानमुचि-तमित्यर्थः । ननु नाम्नामपि मुख्यवृत्त्या वाचकत्वं न नियतम् । लोके नरसिंहादिनाम्नां शूरादिषूपचारादपि प्रयोगदर्शनादिति शङ्कया-माहुः ॥ लोके इत्यादि ॥ रूढ्येति ॥ सङ्केतात्मिकया । तत्र गमकं केव-लेत्यादि॥सिंहाकारावयवशून्ये, सादृश्यशून्ये च तथा प्रयोगात् तथाच यत्र तेषामौपचारिकत्वं न तत्र तेषां नामत्वं,तत्र तेषां नौपचारिकत्वमतो न नियमभङ्ग इत्यर्थः । ननु भवतु नाम्नां मुख्यवृत्त्या वाचकत्वं तथापि तेषां लौकिकपुरुषे प्रयोगाच्च केवलमलौकिकत्वम् । तथाच लौकिकप-दार्थज्ञातृषु नष्टेषु तन्नामापि नश्यति । यथा, तेषां तु पुत्रपौत्राणां गोत्राण्यपि न शृण्महे * इत्यादि । एवं सति प्रलय इव अन्यदापि नामविषयकसंस्कारनाशे नाम्नामपि नाश इति कथं तेषां नित्य-

त्वमित्याशङ्कायां भगवन्नामसु लोकसाम्यमात्रं न तु लौकिकत्वमपीति नात्र नाशशङ्केत्याशयेनाहुः ॥ अत एवेत्यादि, मन्तव्येत्यन्तम् ॥ अत एवेति ॥ लौकिकनाम्नां डित्थादिपदात् कल्पितत्वादेव । तर्हि किं तेषां स्वरूपमत आहुः ॥ तेषामित्यादि ॥ तेषामिति ॥ भगवन्नाम्नां तथा चाऽर्थभेदेन पदभेदात्तथा मन्तव्यमित्यर्थः । ननु नानार्थस्थलेऽर्थभेदेऽप्यानुपूर्व्यैक्येन पदैक्यदर्शनान्न शब्दभेदो युक्त इत्यत आहुः ॥ भगवन्नामानीत्यादि ॥ तेनेति ॥ अखण्डशब्दब्रह्मात्मकत्वेन । तथाच नित्येनार्थेन सह नित्यसम्बन्धात्सिद्धे स्वरूपभेदे वर्णानुपूर्व्या अप्रयोजकत्वात्प्रत्यभिज्ञाया न पदैक्यसाधकत्वमिति लौकिकानां भिन्नत्वात्तन्नाशेऽपि यथा, वाचा विरूपनित्ययेत्यादिश्रुतिबलाद्वेदस्य यथावस्थितस्यैव नित्यत्वं तथा नाम्नामपीति न भगवन्नामसु दोषसंक्रम इति भावः । नच नानार्थन्यायः शङ्क्यः । तत्र कस्याप्यर्थस्य गङ्गापदात्तीरस्येवार्थान्तरप्रतीतिपूर्वकप्रतीतिकत्वादर्शनात् सर्वासामाकृतीनां तु मुख्यतया एकत्रैकस्यैव तिरोभावेन सत्त्वाभावादाकृत्यधिकरणन्यायेनाक्षेपलभ्यत्वाऽसम्भवात् । सर्वप्रवाहतौल्येन समाननामरूपसूत्रस्यापि तूष्णीकत्वाच्चार्थप्रयोगसाधारण्यात् । प्रकृते त्वाकृतिप्रवाहयोरभावेन तस्य न्यायस्यात्राभावादिति दिक् ॥

एवं ध्वंसाप्रतियोगित्वेन नित्यत्वे साधितेऽपि नित्यत्वस्य लक्षणान्तरमाश्रित्योत्पत्तिमत्त्वेन तेष्वनित्यत्वं शङ्कते ॥

ननु गुणकर्माणीति वचनाद्गुणकर्मकरणानन्तरं भाविनाम्नां कथं ब्रह्मत्वं, तस्य त्रैकालिकाबाधविषयत्वादिति चेन्न । स्वरूपवत्कर्मणामपि प्रादुर्भावेन तदनुरूपनाम्नामपि प्रादुर्भाव एव परं, न तूत्पत्तिः । अन्यथा निजमखविहतिकुपितदशशतभगकृताशनिसाराऽऽसारावसन्नानिजव्रजजनावनाय वामकरकमलनखराग्रनिहितशिखरिवरगोवर्द्धनाचले श्रीगोकुलनाथे विहताऽखर्वगर्वशक्रसुरभिप्रभृतिविरचितमहाभिषेकसमयसमनुभूतश्रीगोविन्दनामाग्रे भावि, पूतनासुपयःपानाऽनन्तरं स्वप्राणेभ्योऽप्यतिवल्लभे बीजन्यासं कुर्वत्यो व्रजवरवध्वः 'क्रीडन्तं पातु गोविन्द' इति, गुणगाने च

'गोविन्दवेणुमनुमत्तमयूरनृत्यमिति' कथं वदेयुः । तेन यत्कर्मविशिष्टस्य रूपस्य यन्नाम, तत्कर्मविशिष्टतद्रूपस्य तन्नित्यत्वमेव । लोके परं तेषां तेषां भक्तानां तत्तद्रसानुभवार्थं क्रमेणाऽऽविर्भावः कस्याप्यंशस्य, कस्यचिदाच्छादनमित्येवं मन्तव्यम् । तेन भगवान् गोवर्द्धनमुद्धरन् सदा वर्तत इति गोवर्द्धनोद्धरणधीर इति क्रियानामभ्यां सहितो गोवर्द्धनोद्धरणरूपः सदा वर्तते । अत एवाद्यापि भक्तानां तथानुभवः क्वचित् । तथा प्रतिकृतौ भजनं, तथा स्मरणं च । अन्यथा त्वतथाभूतस्य तथा भावनापराधः स्यान्न तु प्रसादहेतुर्भजनम् । योऽन्यथा सन्तमात्मानमिति वाक्यात् । दृश्यते च तथा भजने प्रसादः । एवं सति रूपे नामावश्यकत्वेन तत्कर्मानुरूपनामापि नित्यमेवेति नोपचारशङ्कागन्धलेशोऽपि । किञ्च नामवद्रूपस्यापि गुणकर्मानुरूपत्वेनोक्तत्वेन तत्र यथा नौपचारिकसत्त्वशङ्का तथा नाम्न्यपीति बुद्ध्यस्व । गुणकर्मणामपि नित्यत्वप्रतिपादनायैव गुणकर्मानुरूपाणीत्यप्युक्तमिति ज्ञायते । अन्यथा, कुरु द्विजातिसंस्कारमिति प्रार्थितत्वेन नामकरणाख्यसंस्कारमात्रस्यैव कर्तव्यत्वे सति नाम्नां रूपाणां च तत्रापि गुणकर्मानुरूपाणां वर्तमानत्वं न निरूपयेत् । प्रयोजनाभावात् । एवं सत्यपि यत्तन्निरूपणं, तेनैवं ज्ञापयति, मदुक्तान्यपि नामधेयानि, न मया कृतानि, किन्तु पूर्वसिद्धान्येव मयाऽनूद्यन्ते परम् । ते सुतस्य बहूनि नामानि रूपाणि सन्तीति समभिव्याहारवशान्नन्दसुतत्वमप्यनादीति ज्ञाप्यते । तेन नन्दस्याऽपीदानीं मम पुत्रो जात इति ज्ञानमप्यनादीति ज्ञेयम् । गर्गस्याऽपि नामकरणलीलामध्यपातित्वेन तदागमनवचनादीनामपि नित्यत्वेऽनादित्वमेव । पूर्वसिद्धाया एव लीलाया भगवदिच्छया क्रमेणाविर्भाव इति पूर्वमेवोक्तत्वात् सर्वं सुस्थम् । श्रुतिरपि गुणकर्मानुरूपाणां

प्रत्येकं नित्यत्वाभिप्रायेणैवाह, 'तदेजति तन्नैजति, तद् दूरे तदन्तिके' इत्यादि । अन्यथैकस्यैवैकस्मिन्नेककाले क्रियावत्त्वतद्राहित्ये विरुद्धे कथं बोधयेत् । तेन येन रूपेणैजति तस्य रूपस्य तस्यैजनस्य च नित्यत्वेन तत्तथा । यच्च रूपं स्थिरं तस्य रूपस्य तस्य स्थैर्यस्यानेजनस्य च नित्यत्वेन नैजत्यपि । नच सक्रियाक्रिययोः स्वरूपयोर्भेदः शङ्कनीयः । यत एतत्परिहारायैव पुनः पुनर्ब्रह्मवाचकतच्छब्दसंबन्धार्हत्वमपि । तथाचानेकनित्यक्रियाकमनेकनित्यनामकं ब्रह्मेति फलितम् ।

नन्वित्यादि ॥ हेतुमुखेन नित्यत्वलक्षणमाहुः ॥ तस्येत्यादि ॥ नित्यत्वस्यैतल्लक्षणकत्वादित्यर्थः ॥ समादधते ॥ नेत्यादि ॥ प्रादुर्भावगमकं तर्कमाहुः ॥ अन्यथेत्यादि ॥ अत्रापादकं यदि नामानि नित्यानि न स्युरित्याकारकं बोध्यम् । सिद्धमाहुः । तेनेति ॥ रूपनामाविर्भावात्पूर्वमेव तदर्थकनामकथनेन ॥ मन्तव्यमिति ॥ श्रुतार्थापत्त्या मन्तव्यम् । तथाचाविर्भावतिरोभावगतावुत्पत्तिनाशौ आविर्भूते तिरोभूते चोपचर्येते ॥ जैमिनिनये व्यञ्जकध्वन्यादिगतौ शब्दे यथा । नचाविर्भावस्योत्पत्त्यङ्गीकारेऽसतः सत्तापत्त्या सिद्धान्तहानिरिति वाच्यम् । सिद्धान्ते कारणाद्बहिर्भावस्य कारणे लयस्य चोत्पत्तिनाशपदार्थत्वेन दोषात् । तथा सतीदं सिद्ध्यति । लीलायाः साक्षात्तत्सम्बन्धिपदार्थानां च प्राकट्याप्राकट्ये, प्राकट्याप्राकट्ययोस्तूत्पत्तिनाशौ, तेन प्राकट्याप्राकट्ययोरनित्यत्वं, तेन च लीलासु तत्सम्बन्धिषु च क्रमिकत्वभानमतो न लीलातत्सम्बन्धिनोः स्वरूपनित्यत्वं बाधत इति लौकिकबोधनानुकूलः पन्थाः ॥ सैद्धान्तस्तु– यथा पृथिव्यामेव तत्तद्देशे तत्तत्काले तत्तद्गन्धरूपेणाविर्भवति, न जलादौ तथा तत्काले तत्तद्देशे च तत्तद्रसभोगार्थं तत्तथाविर्भावयिष्यामि तिरोभावयिष्यामि इति पूर्वोक्तरीतिकेच्छयैव लीलादिकं क्रमिकतां धत्ते । तथा बुद्धिगोचरं वा भवतीति न काप्यनुपपत्तिरिति दिक् ॥

एवमुत्पत्तिमत्त्वं नाशप्रतियोगित्वं तदुभयाभावेन क्रमिकत्वस्य लीलास्थानामवतारकालीनानामन्येषां चेदानीमिदमित्याकारकका-

दाचित्कानुभवस्य चादूषकत्वात्तयोर्दोषत्वं चेति चतुर्णां परिहारेण सिद्धमुदाहरति ॥ तेन भगवानित्यादि ॥ कालान्तरेऽननुभवं परिहर्त्तुमनुभवं प्रदर्शयन्ति ॥ अत एवेति ॥ लीलाविशिष्टस्य वर्त्तमानत्वादेव ॥ अत्र साधारणजनानुभवस्याधिकाराभावप्रयुक्तत्वेनाबाधकत्वाय भक्तानामनित्यत्वेन साधनं निर्दिष्टम् । किञ्च । यथा योगिनोऽतीतानागतं सूक्ष्मरूपेण पश्यन्ति तथा न, किन्तु परिदृश्यमानयथावस्थितरूपेण पश्यन्तीति बोधनाय तथानुभव इत्युक्तम् । सार्वत्रिकत्वबोधनाय क्वचिदतिदेश उक्तः । तेन स्वरूपतो नित्यत्वमनुभवेन समर्थितम् । तस्यानुभवस्येतरेषामपि संवादाय तेषामधिकाराय च साधनं बोधयन्ति ॥ तथेत्यादि ॥ अत्रापि भक्तानामित्यनुषज्यते ॥ नच पुनरुक्तिः शङ्क्या । अत्र प्रारम्भावस्थाया अभिप्रेतत्वात् । एवमननुभवः परिहृतः । नन्वनुभवस्यानुभवप्रदर्शनेनैव परिहाराल्लीलानित्यत्वोपपादने भजनस्मरणयोः कुत्रोपयोग इत्याकाङ्क्षायां लीलानित्यत्वभावनया उपासक अपराधप्रसक्तेस्तथोपासने तेषु प्रसादाभावस्य च परिहारेणानुभवस्य च प्रामाण्यसाधन उपयोग इति वक्तुं तर्कमाहु. ॥ अन्यथेत्यादि ॥ अत्रापादकं यदि लीलाविशिष्टं रूपं नित्यं न स्यादित्येवं बोध्यम् । एवं रूपनित्यत्वसाधनेन सिद्धमाहुः ॥ एवं सतीत्यादि ॥ रूपाणां नित्यत्वे सति शब्दार्थसम्बन्धस्य नित्यतया रूपे नामावश्यकत्वेन तत्कर्मानुरूपनामापि नित्ययोगप्रयुक्तं नामापि नित्यमेवेति हेतोस्तत्प्रयोगे कर्मकादाचित्कत्वकृता गौणी न सम्भावयितुमपि शक्येत्यर्थः । ननूक्तवाक्ये, रूपाणि चेति चकारेण सन्तीत्यस्य पृथक्प्रयोगो बोध्यते । तथा सति नामानि सन्ति रूपाणि सन्तीति वाक्यद्वयं सम्भवति । तत्र नामवाक्यप्राथम्येऽपि रूपे नामसम्बन्धादर्थबलेन रूपवाक्यस्य प्राथम्यमायाति । अग्निहोत्रं जुहोति यवागूं पचति इत्यादिवत् । तथाच सिद्धे रूपसत्त्वे नामवाक्यं सामीप्यगुणयोगादपि सम्भवतीति नामनित्यत्वमौपचारिकमेवेति शङ्कायामाहुः ॥ किञ्चेत्यादि ॥ न ह्येकत्र केवलयोर्नामरूपयोः सत्तोच्यतेऽपि तूक्तविशेषणविशिष्टयोः । तथा सति विशेषणबलाद्यादृशी रूपसत्ता सिद्धा तादृशी नाम्नोऽपि तत एव सिद्ध्यतीति बुद्ध्यस्व । तथाचार्थविचारेऽत्र गौणी न सम्भवदुक्तिकेत्यर्थः । ननु सर्वमिदं विशेषणोक्तं गुणसत्तायां वाक्यस्य तात्पर्ये सिद्ध्यति, न तु रूपसत्तामात्रे

एव तत्तात्पर्यं इति चेत्तत्राहुः ॥ गुणेत्यादि, सुस्थम् इत्यन्तम् ॥ तथाच सर्वस्य नित्यतायामेव वाक्यतात्पर्यम् । अन्यथा वाक्यवैयर्थ्यापत्तेः । अतः श्रुतार्थापत्तिबलादुक्तोपपत्तेश्च सर्वमविवादमित्यर्थः । एवमत्रापि तात्पर्याभावतात्पर्यान्तरदोषौ परिहृतौ । एवं त्रयोदशसु दोषेषु परिहृतेष्वपि स्मार्तसंवेदं प्रमेयं, न श्रौतम् तथा सत्यस्थूलादिवाक्यैर्नामरूपत्वेनात्यन्तिकतद्बाधोऽपि सम्भवतीति शङ्कायां चतुर्दशं परिहर्तुमुक्तस्मृतेरुपबृंहकत्वेन सन्देहवारणार्थत्वाच्च दौर्बल्यमित्याशयेन पूर्वोक्तं श्रुतिभिरुपष्टम्भन्ति । तद्बाधप्रकारश्चाग्रे वक्ष्यत इति पूर्वोक्तां प्रतिज्ञां च पूरयन्ति ॥ श्रुतिरपीत्यादि ॥ तत्तथेति ॥ तद्रूपं गुणकर्मविशिष्टमेव नित्यम् । तथाचास्थूलादिवाक्ये जडजीवधर्माणामेव निषेधान्न नित्यब्रह्मधर्मात्मकक्रियाया निषेधः । श्रुत्यन्तरे, स्वाभाविकी ज्ञानबलक्रिया चेति क्रियायाः स्वाभाविकत्वेनैव प्रतिपादनात् । एतेनैव समाननामरूपसूत्रे प्रवाहेऽपि पदसंबन्ध स्वीकारात् प्रकृतेऽपि रूपप्रवाह शक्तिरस्त्वितिशङ्कापि निरस्ता बोध्या । उक्तवाक्ये स्वरूपनित्यत्वबोधनायैव रूपाणीति निर्देशात् । उक्तश्रुत्या तदुपष्टम्भाच्च । तेन क्रियाप्यनागन्तुकी प्रतिपादितेति सदानन्दरूपे लीलारूपा क्रियापि नित्यसिद्धा निष्प्रत्यूहेत्यतोऽपि न चोद्यावसर इति दिक् ॥

एवं लीलानित्यत्वसाधकप्रमाणमुपष्टभ्य लीलासंबन्धिनित्यत्वसाधकप्रमाणमुपष्टम्भन्ति ।

किञ्च । ऋग्वेदेऽपि पठ्यते । ता वां वास्तून्युष्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः ॥ अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरीति । ता तानि वां युवयोः कृष्णरामगोपीमाधवयोर्वा वास्तूनि स्थानानि गमध्यै गान्तुमुउष्मसि कामयामहे । तानि कानीत्याकाङ्क्षायां गूढाभिसन्धिमुद्घाटयति, यत्र गोकुले भूरिशृङ्गा दीर्घशृङ्गा गावो वसन्तीति शेषः । अथवाऽऽरण्यग्राम्यपशूपलक्षणार्थम् । भूरिशृङ्गा रुरुप्रभृतयो मृगा गावश्चेत्यर्थः । अयासः शुभाः । अत्राह अत्र स्थाने भूमौ तल्लोकवेदप्रसिद्धम् उरुगायस्योरुकीर्तेर्भगवतो वृष्णः कामान् वर्षतीति वृषा तस्य गो-

पिकासु कामवर्षकस्य तद् गोकुलं परमं पदं स्थानं वैकुण्ठं, तस्मा-दप्यधिकं परमं पदं प्रकृतिकालाद्यतीतत्वेनापि वैकुण्ठाद्यपेक्षयाति-प्रियत्वेनापि परमं तादृशं पदमवभाति प्रकाशते भूरि बहुतरम्। तथाच यदेतादृशं तयोः स्थानं तत्स्थानसंबन्धीनि वास्तूनि प्रसा-दत्वेन प्राप्तुं कामयामहे, नान्यानीति वाक्यार्थः संपद्यते। भूरि-शब्दस्य बाहुल्यार्थत्वेनानेकविधनिकुञ्जगह्वरप्रदेशयमुनापुलिनगो-वर्द्धनसान्वादिषु निरन्तरं भगवतः स्थिरा तावद्रूपं प्रकाशते इति तात्पर्यार्थः। भूधातोराप्त्यर्थत्वे व्यापकमिति वा। तथाच परमत्वेन भगवत्स्थानत्वेन भूरित्वेन च नित्यत्वमेव गोकुलस्यायाति॥

किञ्च ऋग्वेद इत्यादि॥ येषु कृपा तेषां स्थलान्तरेऽपि तद्दर्श-यतीति तदनुरोधेन पक्षान्तरमाहुः॥ व्यापकमिति चेति॥ नचैवं सति ब्रह्माण्डान्तर्वर्तित्वबोधकस्यात्राहेति श्रुत्यंशस्य व्याकोप इति वाच्य-म्। वैश्वानराधिकरणन्यायादेव सिद्धेः। उभयोरपि श्रौतत्वात्। व्यापकात्मवादिमते शरीरस्येव भूप्रदेशस्य तद्वृत्तिलाभाद्वा दोषा-ऽभावात्। नचर्ग्वेदस्यापरविद्यात्वादस्थूलादिवाक्यस्य परविद्यान्तर्ग-तत्वादृग्वेदस्थवाक्यबाध इति वाच्यम्। परविद्यया साधनशेषभूतलौ-किककामनिरूपणांशस्यैव बाधनात्। गृहिणोपसंहारन्यायेन तथा निश्चयात्। धार्मिकान् विदधदित्यादिना पूर्वकाण्डस्थप्रमेयानुवाद-पूर्वकमपुनरावृत्तिरूपफलसंबन्धबोधनाद्। अकामश्रुतेश्च। ऋग्वेदा-न्तर्गतत्वमात्रेण बाधाङ्गीकारे मन्त्रसञ्चारप्रयुक्तस्यौपनिषदमन्त्रबाध-स्य प्रसङ्गाच्च। अतोऽक्षराधिगमकत्वप्रयुक्तस्यैव बाधकबाध्यभाव-स्यादरणीयत्वात् सर्वे वेदा यत्पदमामनन्तीति श्रुत्या पूर्वकाण्डेऽप्यक्ष-राधिगमकत्वस्याप्रत्यूहत्वादुक्तश्रुतौ च पदस्यैव निरूपणेन बाधा-ऽप्रसक्तेश्च। नच सगुणनिर्गुणनिरूपकत्वेन बाध्यबाधकभावः। तयो-र्भेदस्य पूर्वोक्तदिशा निरस्तत्वात्। यया तदक्षरमधिगम्यत इति परविद्यालक्षणमुक्त्वा किं तदक्षरमित्याकाङ्क्षायां यत्तदद्रेश्यमग्राह्य-मित्युपक्रम्य यथोर्णनाभिः सृजते गृह्णते चेति, तपसा चीयते ब्रह्मेति यः सर्वज्ञ इतिमन्त्रत्रयेण कार्यलक्षणमुक्त्वा तदेतत्सत्यमित्युपसंहाराच्च

नच उष्मसीति कामनांशस्य बाधः संभाव्यः । आत्मकामश्रुतितुल्ययोगक्षेमत्वात् । अथाकामयमान इत्युपक्रम्य योऽकामो निष्काम:, आत्मकामः आप्तकाम इति श्रावणात् । वस्तुतस्तु शङ्केयमपार्थैव । श्रुतौ बाधानुक्तेः । निरुक्तव्याकरणयोरप्यत्रार्थज्ञानार्थमुपयोगाच्च । परापरभावस्तु प्रधानगुणभावमादाय । स त्वेवमप्यक्षीण इति प्रभुचरणैरपीयमुपेक्षितेति दिक् ॥

नन्वयं मन्त्रो निरुक्ते सूर्यपरत्वेन व्याख्यातस्तत्कथं श्रीगोकुलपरत्वेन व्याख्यायत इति चेति । उच्यते । प्रकरणानुरोधात् । वेदैश्च सर्वैरहमेव वेद्यः, सर्वे वेदा यत्पदमामनन्तीति स्मृतिश्रुतिभ्यां च । अदो यद्दारु प्लवत इत्येतल्लक्ष्मीप्रकाशकमन्त्रस्य पुरुषोत्तमक्षेत्रमाहात्म्ये व्यासपादैर्वेदभाष्ये विद्यारण्येनच श्रीजगन्नाथपरतया व्याख्यानादेवास्याः सरणेर्दर्शितत्वाच्च तद्विरोधस्यादूषणत्वात् । वस्तुतस्तु रश्मयो गाव उच्यन्त इति प्रतिज्ञाय, ता वां वास्तूनीति श्रुतिर्व्याख्याता न तु सूर्यनिरूपणं प्रतिज्ञाय । व्याख्याने च शिरसो निर्गतमित्यपि शृङ्गपदनिरुक्तिः । तेनार्थान्तरोक्तावपि न तद्विरोध इति दिक् ॥

अनेकप्रमाणानुगृहीतत्वाय श्रुत्यन्तरसंमतिमप्याहुः ।

किञ्च तैत्तिरीयकेऽपि पठ्यते । ते ते धामान्युष्मसि गमध्यै गावो यत्र भूरिशृङ्गा अयासः * अत्राह तदुरुगायस्य विष्णोः परमं पदमवभाति भूरेरिति । ते तत्र तानि धामानि स्थानानि गमध्यै प्राप्तुम् उष्मसि कामयामहे इति । शेषं पूर्ववत् । भूरेर्बहुरूपस्य रासोत्सवादिषु तथा प्राकट्यात् । अत्र स्वयं नित्यो वेदः, 'अवभातीति' वदन् स्वभानविषयस्य गोकुलस्यापि नित्यत्वमेवाह । अन्येषामवभानपक्षेऽपि वर्तमानप्रयोगेण विषयस्यापि वर्तमानत्वमेवायाति । एतदनन्तरमेव च पठ्यते । विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे, इन्द्रस्य युज्यः सखा । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः, दिवीव चक्षुराततमिति मन्त्रद्वयम् । तथाच पूर्वस्मिन् मन्त्रे यत्र भूरिशृङ्गा अयासस्तदुरुगायस्य परमं पदम् इत्युक्त्वा तदनन्तरं तत्र कृतानि कर्माण्यपि विष्णोः कर्माणि पश्य-

तेति मन्त्रेण निरूप्य पुनः पूर्वोक्तं लीलास्थानं तद्विष्णोः परमं पदमिति पदेनानूद्य तस्य नित्यत्वनिरूपणायाह । सदा पश्यन्ति सूरय इति । सूरयो विद्वांसः । तत्त्वं च शब्दब्रह्मपरब्रह्मरूपविज्ञत्वम् । परब्रह्मज्ञानं च भक्त्यैवेति निर्णयः । भक्त्या मामभिजानातीति वाक्याद्, भक्त्याहमेकया ग्राह्य इति वाक्याच्च । तेन सूरिपदेन भक्ता उच्यन्ते । नन्वत्राह तदुरुगायस्येति–सूरयः सदा पश्यन्तीतिवाक्यैकवाक्यतायां भूमौ तत्परमं पदं भक्ता एव पश्यन्तीत्यर्थः संपद्यते । तथाच काननकालिन्दीगिरिवराद्यात्मकत्वेनोद्भूतरूपवन्महच्च तत्परमं पदं कथं भक्तैकदृश्यं, न साधारणजनचक्षुर्विषय इत्याशङ्क्य तन्निरासाय दृष्टान्तमाह । दिवीव चक्षुराततमिति । दिवि स्वर्गे यथा आसमन्तात् ततं व्याप्तं, यन्न दुःखेनेति वाक्यात् सुखैकसाधनतद्रूपपदार्थं तत्रस्थानामेव चक्षुः पश्यति, नान्येषां, तथेत्यर्थः । तेन तल्लीलामध्यपातिनामेव तद् दृश्यमिति साधारणजनाविषयत्वेऽपि न दोष इति भावः ॥

क्रिञ्चेत्यादि ॥ एताभ्यां मन्त्राभ्यां लीलासंबन्धिनां नित्यतां पूर्वश्लोकशत्रन्तप्रयोगस्य मुख्यार्थविषयत्वाय व्यक्तीकृता । अतः परं गोकुलकृतानां लीलानां नित्यत्वाय श्रुत्यन्तरमाहुः ॥ एतदनन्तरमेवेति ॥ अस्मिन् प्रकरणे सूक्ते चेत्यर्थः ॥ तद्रूपं तत्पदार्थमिति सुखरूपं तत्रत्यं वस्तु गृहादिकम् । अत्र दिवि स्वर्गे इत्यादिना गोकुलस्य साधारणजनादृश्यत्वे चक्षुरसामर्थ्यं हेतुरित्युक्तम् । तेनालौकिकार्थदर्शने तद्भूतरूपवत्त्वादिकं न प्रयोजकं, किन्तु साधनविशेष एव प्रयोजक इति बोधितम् । अत्र श्रुतावुत्तरार्द्धे दृष्टान्तवाक्यम् । तथाच महद्भूतरूपमपि यत्र तत्र भ्रमः । अतिनिकटवर्त्यपि नान्ये पश्यन्ति । किन्तु तत्रत्या एव पश्यन्ति । तथा गोकुलमपि साधारणजनचक्षुरगोचरं भक्तानां तु गोचरमित्यर्थः । तत्र पूर्वार्द्धोक्तक्रियाया वचनविपरिणामेन योजनेति दिव्यपदाध्याहारो वा, चक्षुःपदे वृत्तिसंकोचो वा भवतीति चारुच्या पक्षान्तरमाहुः ।

अथवा पूर्वोक्तशङ्कायामेवोच्यते । पूर्वमित एव स्वर्गस्थपदार्थदर्शनाभावेऽपि योगचारणया दूरग्रहणाख्यसिद्धिसंपत्तौ योगिनश्चक्षुराततं सर्वतो व्याप्तं सर्वग्रहणसमर्थं सदित एव स्वर्गे पदार्थान् पश्यति यथा, तथैतस्यापि पूर्वमदृश्यत्वेऽपि तादृशभगवदनुग्रहेण तादृग्भक्तिलाभे सति तदधिकारः संपन्न इति तदर्थं तथा भगवान् प्रकटो भवति, तदा दृश्यो भवतीत्यर्थः । तेनाधुनिकानामपि पूर्वोक्ताधिकारसंपत्तौ तद्दर्शनं भवतीति सिद्धम् । अथवा दृष्टान्तत्रयमत्र । तथाहि । पूर्वोक्तपरमपदस्य लोकरूपत्वेनेतरलोकन्यायेन दुःखस्यापि तत्र संभवाद् भगवल्लीलायाश्चानन्दरूपत्वात् कथमेतस्यानन्दैकरूपत्वमत उक्तं, दिवीवेति । यथान्यलोके दुःखसंभिन्नसुखरूपत्वेऽपि, स्वर्गे दुःखासंभिन्नसुखरूपत्वम् । तथा गोकुले आनन्दैकरूपत्वमित्यर्थः । नन्वित्यादिनोक्ताशङ्कायामाह । चक्षुरिवेति । यथा चक्षुरेव रूपं गृह्णाति, न श्रोत्रादिकम् । इन्द्रियत्वाविशेषेऽपि तस्यैव तत्र सामर्थ्यात् । वस्तुन एव तथात्वात् । तथात्रापीत्यर्थः । यथा दोषासहकृतमेव चक्षुर्वस्तुतत्त्वं गृह्णाति, भ्रमिकामलादिदोषसहकृतं तु महीभ्रमिं शङ्खपीतिमादिकम् । तथा अविद्यादोषरहिताः सूरय एव गोकुलादिरूपं पश्यन्ति, नान्य इत्यपि चक्षुर्दृष्टान्तस्याभिप्रेतमिति ज्ञेयम् । एतेन तत्र वृक्षस्थलादीनां क्षणनान्यथाभावदर्शनादिपूपपत्तिरुक्ता भवति । यद्वा चक्षुरिति द्वितीयैकवचनान्तं पदम् । यथा चक्षुरिन्द्रियं स्वयमतीन्द्रियमेव गोलके स्थितं सर्वं प्रत्याययति, गोलकेऽपि चक्षुःशब्दवाच्यतां च विधत्ते, योगिप्रत्यक्षविषयश्च भवति । तथा गोकुलादिकमप्यलौकिकं स्वयमतीन्द्रियमेव साधारणजनदृश्ये स्वयोग्ये स्थाने स्थितं सत् तत्स्थानं प्रकाशयति, स्वव्यपदेशं च प्रापयति, तत्रैव च स्थितं भवति, पूर्वोक्तसूरित्वे दृश्यं च भवति ।

तथाचैतादृशं परमं पदं सूरय एव सदा पश्यन्तीति सम्बन्धः ।

अथवेत्यादि ॥ आततपदं प्रथमान्तमत्र ज्ञेयं, शेषं पूर्ववदेव तथाच यं सप्तरात्रं प्रपठन् पुमान् पश्यति खेचरानिति, य एतं शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति श्रुतिस्मृतिभ्यां स्वतोऽदर्शने स्वतः शाखाद्यप्ररोहेऽपि मन्त्रेण चक्षुषि पयसि चातिशयाधाने तेनैव दर्शनप्ररोहयोः कथनात् प्रकृतेऽपि साधारणानामपि भक्त्यातिशयाधाने तद्दर्शनं भवतीति स्मारितम् । तेन तत्सत्ताया दृश्यादर्शननिरस्तत्वं य आहुस्तेऽपि प्रत्युक्ता ॥ तथा भगवान् प्रकटो भवतीति ॥ आवरणं भङ्क्त्वा प्रकटीभवति । तथाच भगवानिवैतदपि भगवत्सामर्थ्यैकदृश्यमित्युक्तम् । तेन तदनभिज्ञजनसकलशङ्कानामनवसरपराहतत्वमुक्तं भवति । अस्मिन् पक्षे दृष्टान्तवाक्ये कर्मवाचकपदाभावात्पदार्थपदाध्याहारोऽप्यापततीत्यरुच्या संयोगपृथक्त्वन्यायानुगृहीतं पक्षान्तरमाहुः ॥ अथवा दृष्टान्तत्रयमत्रेति ॥ एकस्मिन् वाक्ये दृष्टान्तत्रयमनुवाक्यद्वयस्य दृष्टान्तदार्ष्टान्तिकभाव इत्यर्थः । अत्र दिवीवेत्येको दृष्टान्तः कर्मणि, चक्षुरिवेत्यपरः कर्त्तरि, आततं चक्षुरिवेत्यन्यः । अत्र पूर्वार्द्धे पश्यन्तीत्युक्तं, तत्र कथं पश्यन्तीति प्रकाराकाङ्क्षायां प्रथमे दृष्टान्ते, दिवीव पश्यन्तीति कथनेन व्याख्यातरीत्येतरसाधारणत्वं परिहृतं, द्वितीयेन चक्षुरिवेत्यनेन कुतस्त एव पश्यन्तीति पूर्वोक्ताकाङ्क्षायां ग्राह्यग्राहकयोर्योग्यता विवेचिता । तथा द्वाभ्यां दृष्टान्ताभ्यां तेषामेव योग्यं त एव च योग्या इति तेनाप्रत्यक्षकृतो विरुद्धप्रत्यक्षकृतश्च बाधः परिहृतः । अस्मिन् पक्षे इवपदेन यथापदस्मारणं, तेन च तथापदस्येति क्लेशः । एवकाराध्याहारः, प्रतीक्षाभङ्गश्चेत्यरुच्या पक्षान्तरमाहुः ॥ यद्वेति ॥ अत्र, यद्वेत्यादिना च सर्वैरनुभूयमानस्य तद्भुक्तिलाभस्थानत्वम् । यथा व्यापकात्मवादिनां शरीरस्य स्थानित्वमिति प्रकटीकृतम् ।

तृतीयमवतारयन्ति ।

ननु साधारणजनदृश्यस्याधिष्ठानत्वपक्षे तस्यैव करणदोषादन्यथाभानपक्षेऽपि तत्र स्थितानां दुःखकामक्रोधादिकमनुपपन्नम् । तस्य परमानन्दत्वरूपत्वाद् गुणातीतत्वाच्च । नच करणदोषेणैव द्रष्टुस्तत्स्थितलोकदुःखादिदर्शनमिति वाच्यम् । कर-

णदोषस्यापि तत्र वक्तुमनुचितत्वात् । तत्रैवान्योन्यं तथादर्शनादित्यत उक्तम् । आततं चक्षुरिवेति । यथा देवदत्तचक्षुरिन्द्रियं विष्णुमित्रशरीरे आसमन्ताद्व्याप्तमपि तैजसं सदप्यनुद्भूतरूपस्पर्शत्वेन नान्धन्तमसि प्रकाशयति तापयति वा । तथा भगवदिच्छयैवाऽप्रकटानुभावत्वेन तस्य पक्षद्वयेऽप्याधुनिकतज्जनदोषदर्शनमुपपद्यत इत्यर्थः । तादृशी भगवदिच्छा तु सर्वमुक्त्यभावाय आसुरजीवानां व्यामोहाय च । यथा योगिनामेव प्रत्यक्षं तत् तथा भक्तानामेवैतदपीति पूर्वमेवावोचाम । अथ विष्णोः कर्माणीति मन्त्रो व्याख्यायते । अत्र पूर्वस्मिन् मन्त्रे गोकुलस्यैव निरूपणात् तत्र कृतान्येव कर्माणि पूतनास्तुपयःपानरिङ्गणादीनि कर्मपदेनोच्यन्ते इत्यवगम्यते । अत एवाह, यतो व्रतानीति । यतः कर्मभ्यो हेतुभूतेभ्यो व्रतानि कात्यायन्यर्चनादीनि साक्षिध्याद् विष्णुरेव स्पृष्टवान् । तत्फलत्वेन तत्कर्त्रीष्वाविर्भूय तासु सर्वां लीलां कृतवानित्यर्थः । स्पश बाधनस्पर्शनयोरिति धातोर्लिटि रूपमिदम् । अयं चोभयार्थकप्रयोगः । तेन व्रतानि लोकमर्यादाव्रतानि पातिव्रत्यादीनि च बबाध इत्यर्थः । वेदमर्यादात्याजकानां कर्मणां सदोषत्वशङ्कापरिहारायाव्ययप्रयोगः । तेन तेषामविकृतत्वमुक्तं भवति । स्वव्रतान्यप्यात्मारामत्वपूर्णकामत्वादीनि नियमरूपाणि बबाधे । अस्मिन्नर्थे नञ्प्रश्लेषे अव्रतानि स्पृष्टवानित्यर्थो युज्यते । तानि कर्माणीति गोपीभिः सह रमणरूपाणि पश्यतेत्युपदेशः । यद्यपि कर्मदर्शनस्य फलत्वेन न स्वकृतिसाध्यत्वं, तथापि मोक्षरसाधिकरसानां स्वतः पुरुषार्थरूपाणामतिहृद्यानां स्मरणतस्तत्पारवश्यमौत्सुक्यं च श्रुतेः प्रकटयत्येवं कथनम् । तेन तत्साधनोपदेशः पर्यवस्यति । एतेन कर्मणां नित्यत्वं ज्ञेयम् । अन्यथैतदुपदेशासम्भवात् । इन्द्रस्य युज्यो योज्योऽनुकूलः सखा ।

अयमर्थः । भगवतेन्द्रयागभङ्गे कृते बहुबलाद् वृष्ट्यादिभिरिन्द्रेण द्रोहे कृतेऽपि तद्धेतुभूतदोषरूपमदमेव दूरीकृतवान् । सर्वसमर्थोऽपि न त्विन्द्रं, तदधिकारं वा । तथाच तद्दोषहरणेन तदनुकूलस्तदनन्तरम् इन्द्राभिषेकगोविन्दनामधारणादिभिस्तत्समानधर्मैस्तस्य सखा । एतेनापन्नेऽपि प्रत्युतापकारकर्तर्यपि स्वयमुद्यम्य तद्दोषनिवर्तकस्तद्धर्माङ्गीकर्ता च नान्योऽस्तीति परमकृपालुत्वं दर्शितम् । तेन भजनौपयिकरूपमुक्तं भवति । यद्वा यतः कर्मभ्य इन्द्रस्य व्रतानि यागादीनि पस्पशे बबाधे तानि पश्यतेत्यन्वयः । तानि कर्माणि केवलात्मसात्करणरूपाणि । एतच्च यथा तथा दशमस्कन्धविवरणे प्रपञ्चितं पितृचरणैरिति नात्रोच्यते । तेन स्वतः साधनराहित्येऽपि विपरीततत्करणेऽपि तन्निवार्य स्वत एवात्मसात्करणलक्षणधर्मोऽसाधारणो ज्ञापितो भवति । तेनैव भजनीयत्वमुक्तं भवति । अन्ये हि स्वभक्तसाधनसम्पत्तौ फलं ददति, न त्वन्यथापीति भावः । युज्यो योज्यो, गोपिकानां तडिद्रूपत्वेन भगवतश्च नीलमेघश्यामत्वेन तासां योगार्हः सखा समानशीलव्यसनवानित्यर्थः । युजेर्बाहुलकात् क्यप् । कित्त्वाद्गुणाभावः ॥

नन्वित्यादि ॥ एतस्य दृष्टान्तस्य व्याख्याने, तथा भगवदिच्छयेत्यादिना, क्षुधार्त्ता इदमब्रुवन्, त्रातुमर्हसि देवान्नः कुपिताद्भक्तवत्सलेत्यादिवाक्योक्तेऽर्थे उपपत्तिरुक्ता । यदानुभावं न प्रकटयति लीलार्थं तदा तादृग्दुःखमाक्रोशादिकं लीलास्थानां गोचरीभवति । यदा पुनः क्रमेण सह चानुभावं प्रकटयति तदा तेषां दुःखादिकं न भासत इति । भगवदिच्छायां बीजमाहुः ॥ तादृशीत्यादि ॥ तादृशीति ॥ तदुक्तं ब्रह्माण्डे । तथाप्यासुरमोहार्थं परेषां च क्वचित् क्वचित् * दुःखाज्ञानश्रमादींश्च दर्शयेच्छुद्धसद्गुणः ॥ क्व व्रणादि क्वचाऽज्ञानं स्वतन्त्राचिन्त्यसद्गुणे * दौर्लभ्याच्चैव मोक्षस्य दर्शयेत्तानजो हरिरिति ॥ यद्यप्येतानि वाक्यानि स्वरूपविषयकाणि, तथापि यदक्षरे परमे प्रजा इतिश्रुतेर्नित्यलीलास्थानां भगवद्रूपत्वात्तत्परत्वेनो-

पन्यासेऽप्यदोषात् । एतादृशत्वस्य साधारणजनागोचरत्वे पूर्वदृष्टान्तव्याख्यानोक्तां युक्तिं स्मारयन्ति ॥ तदिति ॥ चक्षुः । एवं मन्त्रनिधानित्यत्वस्थापकं प्रमाणं दृढीकृत्य, तदेजतीत्यादिश्रुत्युक्तक्रियाणां लीलात्मकत्वं स्फुटीकर्त्तुं मन्त्रान्तरव्याख्यानं प्रतिजानते ॥ अथेत्यादि ॥ अथेति ॥ सम्बन्धिनित्यत्वस्थापनानन्तरम् । एतेन क्रमत्यागबीजं सूचितम् । अत्रानेकश्रुतिव्याख्यानमनेकप्रमाणानुगृहीतत्वाय, दूषणान्तरनिरासाय चेति ज्ञातव्यम् ॥ कर्मभ्य इति ॥ स्वलीलाकर्मभ्यः ॥ स्वव्रतानीत्यादि ॥ एतेन भगवतः स्वपरस्वरूपमर्यादात्यागेऽपि समर्थत्वाच्छन्दोऽपीदमित्थतया तल्लीलां वक्तुं न शक्नोतीति ज्ञापितम् ॥ इत्युपदेश इति ॥ इदमामन्त्रणं दर्शनसाधनोपदेशरूपमित्यर्थः । तदुपपादयन्ति ॥ यद्यपीत्यादि ॥ नच मन्त्रगतत्वान्नास्य विधायकत्वमिति शङ्क्यम् । वसन्ताय कपिञ्जलानालभेतेत्यादीनां मन्त्राणामपि तथात्वदर्शनात् । नच, तच्चोदकेषु मन्त्राख्येति सूत्रसिद्धस्य प्रयोगकरणभूतः शब्दो मन्त्र इति लक्षणस्य भङ्गप्रसङ्ग इति शङ्क्यम् । अधिकं तत्रानुप्रविष्टं, न तु तद्धानिरिति न्यायेनाऽभङ्गात् । नच प्रकृते प्रयोगकरणत्वाभावान्न मन्त्रत्वमिति वाच्यम् । इतरत्र सिद्धत्वाल्लक्षणस्यौत्सर्गिकत्वाच्च । अन्यथा प्रत्यगाशीर्मन्त्रेषु व्यभिचारानपायात् । प्रत्यगाशिषो मन्त्रान् जपत्यकरणानिति कल्पात् । अतो न चोद्यावसर इति दिक् ॥

एतेनेति ॥ दर्शनमन्त्रेण ॥ अन्यथेति ॥ अनित्यत्वे दर्शनसमयवर्त्तित्वाऽभावेन । ननु, पश्यस इति भूतार्थप्रयोगादनित्यत्वं शङ्क्यम् । एतस्य सिद्धार्थानुवादपरत्वेन नाशबोधकत्वाऽभावात् । इदमनुपदमेव श्रुतिव्याख्यान एव स्फुटीभविष्यति ॥

साधनोपदेशत्वसमर्थनाय मन्त्रान्तरमुपाक्षिपन्ति ।

एतन्मन्त्रद्वयानन्तरमेव ऋग्वेदे पठ्यते । तद्विप्रासो विपण्यवो जागृवांसः समिन्धते, विष्णोर्यत्परमं पदमिति । एतदर्थस्तु—विष्णोर्यत् पूर्वोक्तं परमं पदमस्ति तत्पदं विप्रासो मेधाविनः, पुनः कीदृशाः, विपण्यवो विशेषेण स्तोतारः । पुनः कीदृशाः जागृवांसः शब्दार्थयोः प्रमादराहित्येन जागरूकाः समिन्धते सम्यग्दीपयन्ति प्रकाशय-

न्ति। मेधावित्वेन यथोक्तभगवल्लीलास्वरूपाद्यनुसन्धानसहिताः शब्दार्थयोः प्रमादराहित्येन वाच्यवाचकयोर्भगवद्रूपनाम्नोर्नित्यत्वे कुतर्काद्यनुपहतमतयो निरन्तरकीर्तनरूपस्तोत्रादिसाधनैः प्रकटयन्तीत्यर्थः। तादृशसाधनसम्पत्त्या तद्दर्शनसामर्थ्ये सति पश्यन्तीति तथा। अत एव श्रीभागवतेऽप्युक्तम्, शृण्वन्ति गायन्ति गृणन्त्यऽभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः * त एव पश्यन्त्यचिरेणेत्यादि। तथाच स्थितस्यैव परमपदस्य समिन्धनमुक्तमिति नित्यत्वमेव काननपशुपक्षिमनुजादीनां तत्सम्बन्धिलीलानामपि। अपरं च, छान्दोग्ये पठ्यते। अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं, तद्वा व विजिज्ञासितव्यमित्येतस्याग्रे, किन्तत्र विद्यते यदन्वेष्टव्यं यद् वा व विजिज्ञासितव्यमिति प्रश्ने, यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते इत्यादिना अग्निवायुसूर्यचन्द्रविद्युन्नक्षत्राण्युक्त्वा, यच्चेहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितमित्युक्त्वा ब्रह्मपुरे जीर्णे ध्वस्ते वा तदाश्रितं किमवशिष्यते इति प्रश्ने, नास्य जरयैतज्जीर्यति, न वधेनास्य हन्यते, एतत् सत्यं ब्रह्मपुरमस्मिन् कामाः समाहिताः, एष आत्माऽपहतपाप्मेत्यादि। अत्र ब्रह्मपुरशब्देन ब्रह्मणो भगवतः पुरं लीलास्थानं श्रीगोकुलमथुराद्युच्यते। शरीरार्थकत्वे, एतत्सत्यं ब्रह्मपुरमित्यग्रिमवाक्यं विरुद्ध्येत। अस्य नित्यत्वकथनार्थमेव तज्जरादिहेतुकतदाश्रितनाशं पूर्वपक्षत्वेनोक्त्वा, वस्तुतस्तु तत्र जरावधादिसम्भावनैव नास्ति, यत एतत्सत्यं ब्रह्मपुरम्। तथापि, तुष्यतु दुर्जन इति न्यायेन, नास्य जरयेत्याद्युक्तं तर्कितं तदिति ज्ञेयम्। अत एव भक्तानां सर्वे कामास्तस्मिन् सम्यगाहिता इत्युक्तम्। एतच्चानन्दमयाधिकरणे, सो-

ऽश्नुते सर्वान् कामान् सह ब्रह्मणेति श्रुतिव्याख्याने प्रपञ्चितम् ।

एतदित्यादि ॥ पूर्वश्रुत्यैकवाक्यत्वस्य स्फुटीकरणायाहुः ॥ ताइशेत्यादि ॥ आग्रहपरिहाराय स्मृतिसंमतत्वमस्यार्थस्याहुः ॥ अत एवेत्यादि ॥ यस्मादस्यां श्रुतौ कीर्त्तनादीनां दर्शनसाधनत्वमुच्यते तस्मादेव श्रीभागवते श्रवणादीनि तथात्वेन संगृह्यन्त इत्यर्थः । सिद्धमाहुः ॥ तथाचेत्यादि ॥ एवं प्रमाणदौर्बल्यरूपश्चतुर्दशो दोषः परिहृतः । ननु, ता वां वास्तूनि इति मन्त्रे, अत्राहेत्यनेनं भूमिष्ठत्वं गोकुलस्योक्तम् । भूमिस्तु दैत्यै रसायामवान्तरप्रलये नीयते, मज्जति च, महाप्रलये च लीयत इत्यधिष्ठानध्वंसादिप्रयुक्तमनित्यत्वमापततीति तत्परिहारायाहुः ॥ अपरं चेत्यादि ॥ अत्र ब्रह्मपुरे जीर्णे इत्यारभ्य, प्रश्न इत्यन्तवाक्यं श्रुत्यर्थबोधकं ज्ञेयम् । तदग्रिमस्य नास्य जरयेत्यादिग्रन्थस्य पूर्वोक्तेन–पश्यत इत्यनेनान्वयः । व्याकुर्वन्ति ॥ अत्रेत्यादि ॥ ननु ब्रह्मपुरशब्देन नित्यलीलास्थानोक्तौ पदेन जरा चाप्नोति प्रध्वंसते वा ततोऽतिशिष्यत इति श्रुतिस्थप्रश्नो विरुद्ध्येतेत्यत आहुः ॥ अस्येत्यादि ॥ नन्वत्र नित्यलीलास्थापनमेवोच्यत इत्यत्र किं गमकमित्याकाङ्क्षायामाहुः ॥ अत एवेत्यादि ॥ तथाच कामसमाधानमेव गमकमित्यर्थः । नन्विदमपि शरीरसाधारणमेवेति शङ्कायां पुनराहुः ॥ एतच्चेत्यादि ॥ उक्तश्रुतौ हि ब्रह्मणा सह सर्वकामाशनं श्राव्यते । तथा सति कामपदेन कामभोगोपकरणान्येव तत्राभिप्रेयन्ते । मनोरथपरत्वे त्वशनोक्तिर्विरुद्ध्येत । तदिदं तत्र प्रपञ्चितम् । तथात्रापि प्रतिष्ठितत्वकथनेन तान्येवाभिप्रेयन्त इत्यर्थः ॥

नन्वयमर्थो न्यायाविरुद्ध इत्याकाङ्क्षायां तत्परिहाराय श्रौतानि पदानि विवृण्वन्ति ।

किञ्च दहर उत्तरेभ्य इत्यधिकरणेन व्यासैर्दहरशब्दवाच्योऽर्थो भगवानिति निर्णीतः । भगवत्स्थानस्यापि भगवद्धर्मवत्त्वेन तत्स्थितियोग्यत्वमिति वक्तुं श्रीगोकुलस्थभक्तहृदयकमलस्यापि दहरत्वमुक्तम् । तत्र व्याप्य प्रकटीभूय सर्वव्यवहारहेतुत्वेन स्थित इत्याकाशत्वमुच्यते । साक्षात्पुरुषोत्तमलीलोपयोगिपदार्था आका-

शादयो ग्रुपभृतयोऽपि भगवदात्मका एवेति तदन्तःस्थिता एव, न तु कालाद्यधीनास्तदाश्रया वा । ये त्यक्तलोकधर्माश्च मदर्थे तान् बिभर्म्यहमिति भगवद्वाक्याच्च । यावान् वेति परिमाणसाम्यमुपलक्षणविधयोक्तमिति ज्ञेयम् । तेन लीलास्थपदार्थाः स्वरूपतस्त्वऽलौकिका एव, तथापि लौकिकस्वरूपा इवेति ज्ञाप्यते । लोकवत्तु लीलाकैवल्यमिति न्यायात् । एवं सति निष्प्रत्यूहं लीलानित्यत्वं श्रुतिवृन्दैरमन्दगीतममन्दाऽऽनन्दकन्दममन्दभाग्यराशिभिर्मनुजैर्हृदि भावनीयम् ॥ अपरं च बृहद्वामनपुराणे गीयते । उत्तरस्थाने खिले च भृग्वादीन् प्रति ब्रह्मणो वाक्यानि । षष्टिवर्षसहस्राणि मया तप्तं तपः पुरा * नन्दगोपव्रजस्त्रीणां पादरेणूपलब्धये ॥ तथापि न मया प्राप्तास्तासां वै पादरेणवः । श्रुत्वैतद् ब्रह्मणो वाक्यं भृगुः प्राहाथ सादरम् । वैष्णवानां पादरजो गृह्यते त्वद्विधैरपि । सन्ति ते बहवो लोके वैष्णवा नारदादयः । तेषां विहाय गोपीनां पादरेणुस्त्वयापि यत् । गृह्यते संशयो मेऽत्र को हेतुस्तद्वद प्रभो । ततो ब्रह्मा भृगुं प्राह चिन्तयित्वा पुरातनीम् । कथां सर्वश्रुतीनां यद् रहस्यं परमाद्भुतम् । ब्रह्मोवाच । न स्त्रियो व्रजसुन्दर्यः पुत्र ! ताः श्रुतयः किल । नाहं शिवश्च शेषश्च श्रीश्च ताभिः समाः क्वचित् । प्राकृते प्रलये प्राप्ते व्यक्तेऽव्यक्तं गते पुरा । शिष्टे ब्रह्मणि चिन्मात्रे कालमायातिगे क्षरे । ब्रह्मानन्दमयो लोको व्यापि वैकुण्ठसंज्ञकः । निर्गुणोऽनाद्यनन्तश्च वर्तते केवलेऽक्षरे । अक्षरं ब्रह्म परमं वेदानां स्थानमुत्तमम् । तल्लोकवासी तत्रस्थैः स्तुतो वेदैः परात्परः । चिरं स्तुत्या ततस्तुष्टः परोक्षं प्राह तान् गिरा । तुष्टोऽस्मि ब्रूत भोः प्राज्ञा वरं यन्मनसीप्सितम् । श्रुतय ऊचुः । नारायणादिरूपाणि ज्ञातान्यस्माभिरच्युत । सगुणं ब्रह्म सर्वेदं वस्तुबुद्धिर्न तेषु नः । ब्रह्मेति पठ्यतेऽस्माभिर्यद्रूपं

निर्गुणं परम् । वाङ्मनोगोचरातीतं ततो न ज्ञायते तु तत् । आनन्दमात्रमिति यद्वदन्तीह पुराविदः । तद्रूपं दर्शयाऽस्माकं यदि देयो वरो हि नः । श्रुत्वैतद्दर्शयामास स्वं लोकं प्रकृतेः परम् । केवलानुभवानन्दमात्रमक्षरमध्ययम् । यत्र वृन्दावनं नाम वनं कामदुघैर्द्रुमैः । मनोरमनिकुञ्जाढ्यं सर्वर्तुसुखसंयुतम् । यत्र गोवर्द्धनो नाम सुनिर्झरदरीयुतः । रत्नधातुमयः श्रीमान् सुपक्षिगणसंकुलः । यत्र निर्झरपानीया कालिन्दी सरितां वरा । रत्नबद्धोभयतटी हंसपद्माऽऽदिसंकुला । नानारासरसोन्मत्तं यत्र गोपीकदम्बकम् । तत्कदम्बकमध्यस्थः किशोराऽऽकृतिरच्युतः । दर्शयित्वेति च प्राह ब्रूत किं करवाणि वः । दृष्टो मदीयो लोकोऽयं यतो नास्ति परं वरम् । श्रुतय ऊचुः । कंदर्पकोटिलावण्ये त्वयि दृष्टे मनांसि नः । कामिनीभावमासाद्य स्मरक्षुब्धान्यसंशयम् । यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः । भजन्ति रमणं मत्वा चिकीर्षाऽजनि नस्तथा । श्रीभगवानुवाच । दुर्लभो दुर्घटश्चैव युष्माकं सुमनोरथः । मयाऽनुमोदितः सम्यक् सत्यो भवितुमर्हति । आगामिनि विरञ्चौ तु जाते सृष्ट्यर्थमुद्यमे । कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ । पृथिव्यां भारते क्षेत्रे माथुरे मम मण्डले । वृंदावने भविष्यामि प्रेयान् वो रासमण्डले । जारधर्मेण सुस्नेहं सुदृढं सर्वतोऽधिकम् । मयि संप्राप्य सर्वेऽपि कृतकृत्या भविष्यथ । ब्रह्मोवाच । श्रुत्वैतच्चिन्तयन्त्यस्ता रूपं भगवतश्चिरम् । उक्तं कालं समासाद्य गोप्यो भूत्वा हरिं गता इति ॥ अत्र हि श्रुतिभिः सर्ववेदान्तप्रत्ययं गुणातीतं वाङ्मनोगोचरातीतम् आनन्दैकरूपं यत्तत्र रूपं तत्प्रदर्शयेति प्रार्थितो भगवान् गोकुलं तत्र स्थितं स्वस्वरूपं लीलां तत्र क्रियमाणां च प्रदर्शितवानित्युच्यते । एतत् तदैव घटेत यदि सर्ववेदान्तप्रत्ययत्वादिवि-

शिष्टमेतद् भवेत् । एवं सति तन्नित्यता निष्प्रत्यूहा सिद्धा भवति । नच तत्स्थितस्वरूपमात्रस्यैव नित्यता, न लोकस्यापीति वाच्यम् । लोकप्रदर्शनवैयर्थ्यात् । अप्रार्थितत्वात् । तथाच स्वरूपदर्शनमात्रार्थं प्रार्थितो यद्वृन्दावनादिकमपि प्रदर्शितवाँस्तेन वृन्दावनाद्युक्तसामग्रीविशिष्टमेव सदा भगवद्रूपं, न केवलमिति ज्ञापयति । वस्तुन एव तथात्वान्न शङ्कालेशोऽप्यत्र । अत एव ब्रह्मधर्मस्वरूपविचारे, प्रकाशाश्रयवद्वा तेजस्त्वादिति सूत्रितं बादरायणेन । एतच्च यथा तथा पुरस्तादेवोक्तम् ॥

किञ्चेत्यादि ॥ ननु सूत्रेदहरपदवाच्यस्य भगवत्त्वनिर्णयेन प्रकृते किं सिद्धमित्यत आहुः ॥ भगवदित्यादि ॥ उच्यत इत्यादि ॥ भगवत उच्यते ॥ तदन्तःस्थिता इतिं ॥ भगवदन्त स्थिताः । यथान्तर्यामिणः । पृथिव्याद्यन्तःस्थितस्य पृथिव्यादयोऽन्तःस्थितास्तथैतेऽपीत्यर्थः । ननु तत्र श्रौतं तथात्वं, प्रकृते तत्कथमवगन्तुं शक्येतेत्याशङ्कायां भगवद्वाक्यार्थेनात्रोपष्टम्भन्ति ॥ य इत्यादि ॥ तथाचैते द्युप्रभृतयोऽपि त्यक्तबाह्यत्वलोकव्यवहार्यत्वलोकधर्मा इति तेऽपि तथेत्यर्थः ॥ तेनेति ॥ परिमाणसाम्यस्य लौकिकधर्मान्तरोपलक्षकत्वेनोपलक्षकत्वोक्तौ मानमाहुः ॥ लोकवदित्यादि ॥ तथाच लीलायां व्यासेन बोधितं लोकसाम्यं तत्सम्बन्धिष्वपि लीलानिर्वाहाय बोधयतीति नोपलक्षकत्वमप्रामाणिकमित्यर्थः । सिद्धमाहुः॥एवंसतीत्यादि॥लीलासम्बन्धिनां नित्यत्वे सत्यधिष्ठानध्वंसप्रयुक्तदोषाभावात्तथेत्यर्थः । तथाच यथा छान्दोग्यवाक्यस्य ब्रह्मपुरपदस्यशरीरपरत्वेऽपि वेश्मनि न ध्वंसादिकृतदोषप्रसक्तिस्तथात्र भूमिष्ठस्य भगवद्वास्तुरूपस्य गोकुलस्यापीति भावः । एवं पञ्चदशः परिहृतः । उक्तोपबृंहणाय पुराणवाक्यान्याहुः ॥ अपरञ्चेत्यादि ॥ नारायणपदं निरुक्तिभेदेन यद्यपि पुरुषत्रयवाचकं, तथापि नारायणादिरूपाणीत्यत्र नारायणपदम्, आपो नारा इति प्रोक्ता आपो वै नरसूनवः * अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति निरुक्त्या प्रथमपुरुषपरं, नाक्षरपरम् । सगुणत्वस्याग्रे उक्तत्वात् । उक्तहेतोर्जिज्ञासिततत्त्वकथनाच्च, न तृतीयपरम् । नारायणादीत्यादिपदं तदवतारसंग्राहकम् । एतन्नानावता-

राणां निधानं बीजमव्ययमितिवाक्येन तस्य नानावतारबीजत्वात् । सर्वेदमित्यत्र सर्वपदं लुप्तविभक्तिकं भिन्नमेव । अक्षरव्यावृत्त्यर्थमाहुः ॥ ब्रह्मेत्यादि श्लोकद्वयम् ॥ आगामिनि विरञ्चावित्यनेन प्राकृतिकप्रलयस्य न महाप्रलयत्वं नैयायिकादीनामिवेति बोधितम् । तेन प्रपञ्चप्रवाहस्यानादिता दर्शिता । एवमुपबृंहणवाक्यान्युक्त्वा श्लोकद्वयार्थकथनपूर्वकं तत्तात्पर्यमाहुः ॥ अत्रेत्यादि ॥ उपबृंहणत्वं स्फुटीकुर्वन्ति ॥ एतदित्यादि ॥ एतदिति ॥ स्वरूपदर्शने प्रार्थिते लोकपूर्वकं तद्दर्शनम् ॥ एतद्भवेदिति ॥ गोकुलं भवेत् ॥ एवं सतीत्यादि ॥ लोकविशिष्टस्य स्वरूपसत्त्वे सति लोकतानित्यता निष्प्रत्यूहा भवति । स्वरूपान्तःपातित्वान्निर्विघ्ना भवतीत्यर्थः । एतदेव व्युत्पादनपूर्वकं स्फुटीकुर्वन्ति ॥ नचेत्यादि ॥

ननु लोकस्यापि स्वरूपान्तःपातित्वे यथा वृक्षस्य फलप्रसूनपल्लवादिभिः स्वगतद्वैतं तद्वदत्र लोके स्वगतद्वैतापत्तिरिति वाच्यं चेत्तत्राहुः ॥ वस्तुन इत्यादि ॥ तस्मान्न भिन्ना एतास्तु आभिर्भिन्नो न वै प्रभुः * भूमावुत्तारितं सर्वं वैकुण्ठस्वर्गवासिनमितिगोपालतापनीयश्रुतेर्यदक्षरे परमे प्रजा इति तैत्तरीयश्रुतेः पूर्वोक्तच्छान्दोग्यश्रुतेश्च लोकस्तत्रत्याश्च भगवतः सकाशान्नात्यन्तं भिन्ना नाप्यत्यन्तमभिन्नाः, किन्तु भिन्नाभिन्ना इति वृक्षफलादिवत् स्वगतभेदाङ्गीकारेऽपि न क्षतिः । श्रुत्यादिविरोधाभावादित्यर्थः । एतेनैव द्वारकामथुरादीनां तत्स्थितानां च लीलास्थानां नित्यता प्रदर्शिता । सामान्यन्यायात् । नच मिथिलाकुरुक्षेत्रादिष्वपि लीलाकरणात्तेषां सुतलसंयमन्यादीनां नित्यताप्रसङ्गात् । मथुरादिषु नित्यसंनिधानवाक्यानां तदनुभवाच्चापि तथाऽवसीयतेऽतो न चोद्यावसरः । एवं पूर्वोक्तोपबृंहणप्रसङ्गात् तावन्मात्रार्थं तत्र गमनमात्रेण नित्यलीलास्थानत्वस्याऽशक्यवचनत्वात् । अन्यथा कार्यबोधकश्रुतिस्मृतिव्याकोपः । रमणविचारेणैव साधारणजनदृश्यत्वं लौकिकत्वं भगवद्भिन्नत्वं च परिहृतं ज्ञेयम् । उक्तवाक्यानामतिप्रसिद्धत्वाभावात् कुमतीनां शङ्कानापैतीति पूर्वोक्तमेवेति स्मारयन्ति ॥ अत एवेति ॥ धर्माणां ब्रह्मणः सकाशाद्भेदाभेदादेव । तथाच स्वगतभेदस्य व्यासचरणैरप्यनुमतत्वान्न पूर्वोक्तेऽर्थे शङ्कालेश इत्यर्थः । एवं षोडशसप्तदशाष्टादशाः परिहृताः ॥

अतः परं भूतार्थप्रयोगस्य तथानुभवस्य चादोषत्वं समर्थयन्ति ।

अत एवेयं लीला ऋगन्तरेणापि ऋग्वेदे निरूप्यते । तथाहि । जज्ञान एव व्यबाधत स्पृधः प्रापश्यद्वीरो अभिपौंस्यं रणम् । अवृश्चदद्रिमव सः स्यदसृजदस्तभ्नान्नाकं स्वपस्यया पृथुमिति । जज्ञान एव गोकुले जातमात्र एव स्पृधः पूतनातृणाऽऽवर्तादिवैरिणो व्यबाधत विविधप्रकारैर्विशेषेण वा हिंसितवान् । पश्चाद् वीरो विक्रान्तो मथुराद्वारकादिषु अभिपौंस्यमात्मपौरुषानुरूपं रणं दैत्यैः सह सङ्ग्रामं प्रापश्यदनुभूतवान् कृतवानित्यर्थः । भूमिष्ठदैत्यानां नाशकत्वमुक्त्वा देवेन्द्रमदभङ्गकारित्वमाह । अद्रिं गोवर्द्धनगिरिम् अवृश्चदुत्पाटितवान् । सः स्यद प्रस्रवदिन्द्रप्रेरितं जलमवासृजदविक्षिप्तवान् निवारितवान् । एतया स्वपस्यया गोकुलरिरक्षिषया पृथुं विस्तीर्णं नाकम् अस्तभ्नात् प्रतिबद्धवान् इन्द्रादिदेवानां मदस्तम्भं कृतवानित्यर्थः । किञ्च दशमस्कन्धे कात्यायन्यर्चनव्रतानन्तरं वरदानार्थमागतस्य भगवतो व्रजवरकुमारीषु वरदानवचनं गीयते, मयेमा रंस्यथ क्षपा इति । अत्रेमाः क्षपा इतीदंशब्देन ताभ्यः सर्वाः क्षपाः पुरः स्थिताः कृत्वा प्रदर्शितवानिति ज्ञायते । अन्यथा ताः क्षपा इत्येव वदेत् । वदति च प्रातःसमये, तेनैतद्रात्रिसाजात्येन तासामेतस्यामेवेमा इति प्रयोगो जात्यभिप्रायेणेति न वक्तुं शक्यम् । बहुवचनानुपपत्तेश्च । नचेदंशब्दस्य भगवद्बुद्धिस्थवाचकत्वेन सर्वोपपत्तिरिति वाच्यम् । कथनस्य परप्रतिपत्त्यर्थत्वेनैवंकथनेऽपि कुमारीणां तद्बोधासंभवेनैतत्कथनवैयर्थ्यापत्तेः । किञ्च, भगवतः सत्यसंकल्पत्वेन तत्त्वस्य चाबाधितविषयत्वेनात्र तासां रात्रीणां सपद्यभावे पूर्वोक्तसत्यसंकल्पत्वानुपपत्तिः । ननु 'एष्यामि ते गृहं सुभ्रूः, आयास्य इति दौत्यकैः, ज्ञातीन् वो द्रष्टुमेष्याम इत्यादिषु स्थलेष्वग्रे भावि-

भगवदागमनं कथं तदैव वर्तत इति वक्तुं शक्यम्। तथात्वे वा कथनवैयर्थ्यापत्तिरनुभवविरोधश्चेति चेन्नैवम्। सर्वस्या अपि लीलाया नित्यत्वेन पूर्वसिद्धाया एवंक्रमेणाविर्भावः परमिति पूर्वमेवोक्तत्वात् तस्यागमनस्याधुना चात्राप्रकटितत्वादेतत्काले प्रकटितलीलामध्यपातिनां तदननुभवाद् भगवतश्च सर्वज्ञत्वेन तल्लीलाया अप्यनुभवविषयत्वात् सर्वोपपत्तेः॥

अत एवेत्यादि॥ अत एवेति॥ लीलासंम्बन्धिनां भगवदात्मकत्वेन नित्यत्वादेव। नच विबाधने नाशात्स्पृधां कथं नित्यत्वमिति शङ्क्यम्. असुरानीकवीर्य इति वाक्येन भगवद्वीर्यात्मकतया नित्यत्वम्। शरीरस्य कारणे लयेऽप्यक्षतेः। श्रुतौ स इत्यस्य लोकवदेव प्रसिद्ध इत्यप्यर्थः संग्राह्यः॥ गोकुलस्थितिकरणकर्मेच्छयेति॥ गोकुलस्थितिकरणार्थं कर्मेच्छा लीलेच्छा तयेत्यर्थः। एवञ्च लीलाया भगवदात्मकत्वेन नित्यत्वे, व्यबाधतेत्यादीनां भूतार्थप्रयोगाणां, सदेव सोम्येदमग्र आसीदेको ह वै नारायण आसीदित्यादिवत् पूर्वकालवृत्तित्वमेवार्थो, न तु कथनावसरे तदवृत्तित्वमपीति तादृशेच्छाधीनतया तिरोभावशक्त्यैव भूतत्वानुभवोऽपि समर्थितो भवतीति द्वावपि दोषावेतेनैव परिहृतौ बोध्यौ। एवमुक्तविशेषविशेषौ परिहृत्यैकविशेषाविशेषयोर्भविष्यदर्थप्रयोगतथानुभवयोरदूषकत्वं समर्थयितुं रमणसम्बन्धिनीनां रात्रीणां नित्यत्वं समर्थयन्ति॥ किञ्चेत्यादि॥ तथाच रात्रिर्हि सूर्यादर्शनवशेन भवति, प्रात समयेचसूर्ये दृश्यमाने लौकिकीनां तासामभावाल्लीलास्थितिस्थसूर्यादर्शनवशेन जायमाना इति भिन्ना एव एकप्रदर्शितत्वादुक्तयुक्तिभ्यश्च नित्या एवेति तासां नित्यत्वमविवादमिति भावः। ननु, रंस्यथेति प्रयोगाद्रमणलीलाया भावित्वेन तदानीमभावात् कथं नित्यत्वमितिशङ्कां हृदिकृत्य आशङ्कते॥ नन्वित्यादि॥ तत्र समादधते॥ नैवमित्यादि॥ भगवदनुभवविचारेण नित्यत्वं, भक्तानुभवविचारेण वाक्यकथनवैयर्थ्याभाव इति तादृशप्रयोगानुभवयोर्न दूषणत्वमिति भावः।

पूर्वसिद्धाया एव लीलायाः क्रमेणाविर्भाव इति तत्राशङ्कते।

नन्वधुना प्रकटितलीलामध्यपातिनामेवाग्रे प्रकटनीयलीलासं-

अनिश्चितत्वमवश्यं वाच्यं, तथैवानुभवात् तेषां, मह्यं पूर्वमुक्तमासीदे-ष्यामीति तेनागत इति। अन्यथा त्वन्यत्र कथनमन्यत्र गमनमिति सत्यवाक्त्वानुपपत्तिश्च। उक्तेषु भगवदाज्ञया स्थित्यनुपपत्तिश्चेति कथं नित्याया एव लीलायाः क्रमेणाविर्भावः परमिति संगच्छत इति चेद्। अत्रेदं प्रतिभाति। लीलानित्यत्वं न केवलं लौकिक-यौक्तिकं, किन्तु 'जयति जननिवास' इत्याद्युक्तस्मृतिश्रुतिप्रमा-णगम्यम्। तथाचाबाधितप्रामाण्यैरुक्तप्रमाणैः सिद्धं चेन्नानुपपत्तिः काचित् तत्र वस्तुनीत्यभ्युपेयम्। प्रमाणतस्तथैव सिद्धत्वात्। किन्तु स्वबुद्धिपरिकल्पिता तत्रानुपपत्तिः। सा चैवं परिहरणीया। रसो वै स इति श्रुत्या, सर्वरस इति श्रुत्या च भगवतः सर्वरस-रूपत्वं निर्विवादम्। तथाच यत्र यदा वदत्येष्यामीति, तेषां भ-क्तानां तत्कालीनभगवदागमनविषयकपरमार्तिलक्षणरसपोषाय भ-गवता तथोक्ते मद्गृहे सर्वथा समागमिष्यति प्रियस्तत्र चैवमेव म-न्मनोरथपूर्तिर्भविष्यतीति निश्चयेनाऽमन्दानन्दरूपा रसभावविशे-षाश्चातिविलक्षणास्तदा भक्तेषूत्पद्यन्ते। भगवतश्च तद्भावदर्शनज-नितसमयानुरूपो भावविशेषः परमानन्दरूपोऽनुभवविषयो भवति। तथाच पूर्वोक्तश्रुत्या स्वरूपात्मकमेवेमं रसं सदैवानुभवतीति सि-द्धम्। पूर्वोक्तभक्तगृहगमनेन पूर्वमवधिमतिक्रम्यानतिक्रम्य वा स-मागते प्रियतमे ये रसात्मका भावविशेषास्ताँस्तथाभूतः सन्नुक्त-न्यायेनात्मरूपानेवानुभवति। अत्र पूर्वोक्तानामेतेषां च भेदो न शङ्कनीयः। यतः पूर्वं मह्यमेवमुक्तमासीदित्यनुसन्धान एव तथा रसोत्पत्तिर्नान्यथा। तथाच तस्य तस्य रसस्य तादृक्तादृग्रूपत्वाद् रसस्य भगवद्रूपत्वाद् यत्र यो रसो यादृशो यावद्विधः स्वशास्त्र-सिद्धस्तत्र तादृशस्तावद्विधः स रसो भगवानेवेति फलितम्। भगवांश्चैक एव। तथाच तत्रत्या सर्वा सामग्री तद्रसरूपैवेति सर्वम्

विज्ञापनम् ।

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य कृते ।॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां कृते १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख०६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ६ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्डानि ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्डानि ३)	६	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०

तत्त्वदीपनम । पञ्चपादिकाविवरणस्य व्याख्यानम्) खं० ८ ८ ०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३ ३ ०
टुप्टीका खण्डानि ४ ४ ०
पातञ्जलदर्शनम् । श्रीरामानन्दयतिकृतमणिप्रभाऽख्यवृत्ति स० १ ०
व्याकरण मिताक्षरा । श्रीमदन्नभट्टप्रणीता खण्डानि १० १० ०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३ ३ ०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रम
पराक्रमसहितः खण्डे २ २ ०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख० १० ०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिरचिता खण्डे २ २ ०
दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः खण्डानि ३ ३ ०
श्रीमदणुभाष्यम् । श्रीश्रीवल्लभाचार्यविरचितम् ।
गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्य
व्याख्या समेतम् खण्डानि १५ १५ ०
तत्त्वशेखरः । श्रीभगवल्लोकाचार्यप्रणीतः । तथा-तत्त्वत्रयचुलुक
संग्रहः । कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः । १ ०
श्रीभाष्यवार्तिकम् । श्रीमद्रामानुजाचार्यविशिष्टाद्वैतसिद्धान्तप्र-
तिपादनपरम् । यतीन्द्रमतदीपिका च । श्रीगोविन्दाचार्यसूनु-
श्रीनिवासाचार्यकृता । सकलाचार्यमतसंग्रहश्च । खण्डे २ २ ०
गूढार्थदीपिका । श्रीमद्भागवतदशमस्कन्धस्थरासपञ्चाध्यायी-
व्याख्या खण्डे २ २ ०
आश्वलायनसूत्रप्रयोगदीपिका । श्रीविद्वद्वरमंचनाचार्यभट्ट-
विरचिता खण्डे २ । २ ०
काव्यालंकारसूत्राणि । पण्डितवरवामनविरचितवृत्तिसमेतानि
कामधेनुसमाख्यव्याख्यासहितानि खण्डे २ । २ ०
श्रुत्यन्तसुरद्रुमः । श्रीपुरुषोत्तमप्रसादविरचितः खण्डानि ३ ३ ०
चतुर्विंशतिमतसंग्रहः । श्रीभट्टोजिदीक्षितसंकलितः खण्डे २ २ ०
श्रीविद्वन्मण्डनम् श्रीविट्ठलनाथदीक्षित विरचितम् । गोस्वामि श्री-
पुरुषोत्तमजीमहाराजविरचित सुवर्णसूत्राख्यव्याख्यासहितम् २ ०

व्रजभूषण दास और कम्पनी
बनारससंस्कृत सीरीज़कार्यालय
बनारस सिटी ।

Sr.

P. phenmanderm

अनवद्यम् । तथाच क्षपाणां तदा प्रदर्शनं तन्नित्यत्व एव घटते । अग्रिमरमणलीलाया अपि नित्यत्वे कथमेतद्व्रतफलत्वेन वरदानमुपपद्यत इति शङ्काप्येतेनैव निरस्ता वेदितव्या । भगवतः सर्वरसरूपत्वेनैव सर्वोपपत्तिरित्युक्तत्वात् । इयमेवोपपत्तिः, श्रीनन्दयशोदयोस्तादृशलीलानन्दानुभवे का हेतुरिति—नन्दः किमकरोद् ब्रह्मन् श्रेय एवं महोदयम् * यशोदा च महाभागा पपौ यस्यास्तनं हरिरित्यादिना राज्ञा प्रश्ने कृते, 'द्रोणो वसूनां प्रवरो धरया सह भार्यया * करिष्यमाण आदेशं ब्रह्मणस्तमुवाच ह । जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ । भक्तिः स्यात् परमा लोके ययाऽञ्जो दुर्गतिं तरेत् ॥ अस्त्वित्युक्तः स एवेह व्रजे द्रोणो महायशाः । जज्ञे नन्द इति ख्यातो यशोदा सा धराऽभवत् । ततो भक्तिर्भगवति पुत्रीभूते जनार्दने । दम्पत्योर्नितरामासीद् गोपगोपीषु भारत' इत्यादिना श्रीशुकेनोत्तरितेऽपि ज्ञेया । एवमेव श्रीदेवकीवसुदेवयोरन्येष्वप्येतादृशेष्वित्यलं विस्तरेण ॥

इति श्रुतिशतैरतिस्फुटतरैरपास्तभ्रमै-
र्विचारभरचातुरीसचिवसत्पुराणैरपि ।
स्फुरद्विहृतिनित्यता सुनिरणायि गोपीपते-
र्मयाऽतिनिजयत्नतः फलतु तेन सैवेह मे ॥

नन्वधुनेत्यादि ॥ अन्यथेति ॥ प्रकटितप्रकटनीयलीलयोरन्योन्यभक्तसम्बन्धित्वे चकारादनुभवविरोधोऽपि संगृह्यते इति अबाधितेन भविष्यत्त्वानुभवेन बाधितत्वात् । ईदृश्यामाशङ्कायां तादृशाऽनुभवलीलानित्यत्वयो रसस्वरूपविचारेण समर्थयन्ति ॥ अभेदमित्यादि ॥ निर्विवादमिति ॥ स मानसी न आत्मा जनानामिति श्रुत्यन्तरात्, को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यादित्युपसंहारे आनन्दरूपताश्रवणाच्च ।
रसो वै स इतिश्रुतावपि विभावादिभिरुत्कृष्यमाणानन्दात्मकरसत्वं

तद्भेदवैशिष्ट्यं वाऽवश्यमङ्गीकार्यमतो विवादराहितम् । तावता कथमनुपपत्तिपरिहार इत्यत आहुः ॥ तथाचेत्यादि ॥ रसपोषायेति ॥ एवं सर्वभेदविशिष्टरसात्मकत्वे भविष्यदागमनविषयकवाक्यजनितो य इदानीन्तनार्तिरूपो रसस्तत्पोषाय ॥ पूर्वोक्तभक्तेति ॥ एष्यामीति वाचाऽऽश्वासितेत्यर्थ ॥ तस्येति॥भविष्यत्त्वोक्त्यवधित्यागतदत्यागैरभिव्यङ्गस्य॥ तादृशरूपत्वादिति ॥ तेनैव प्रकारानुभवयोग्यस्वरूपकत्वात् ॥ फलितमिति ॥ रसो वै स इत्यादिश्रुतिद्वयविचारे निष्कृष्यमाणे सिद्धम् । अन्यथा, सर्वरस इत्यत्र सर्वपदव्याकोपापत्तेः । प्रायपाठेन सर्वपदस्य नानारूपतायामेव पर्यवसानादिति ॥ सर्वमप्येवमिति ॥ भविष्यत्त्वस्यापि स्वरूपान्तःपातित्वेन नित्यत्वाविरोधाद्भगवदिच्छया भविष्यत्त्वानुभवस्यापिनित्यत्वाबाधकत्वेनानित्यत्वरूपदोषरहितमित्यर्थः । सिद्धमाहु ॥ तथाचेत्यादि ॥ नन्वग्रिमरमणस्य नित्यत्वे एतद्व्रतफलत्वेन वरदानं कथमुपपद्यते इतिचेत्तत्राहुः ॥ अग्रिमेत्यादि ॥ एतेनेति ॥ भविष्यत्त्वनित्यत्वयोरविरोधेन । अविरोधे बीजमाहुः ॥ भगवत इत्यादि ॥ तथाच स्वरूपविचारेणैव विरोधपरिहार इत्यर्थः । एतामेवोपपत्तिं लीलान्तरेऽप्यतिदिशन्ति ॥ इयमित्यादि, विस्तरेणेत्यन्तम् ॥ उपपत्तिरिति ॥ नित्यत्वभविष्यत्त्वादीनां स्वरूपान्तःपातित्वेन अविरोधरूपा सेत्यर्थः ॥ इतीति ॥ इत्याशयेन । एवं द्वाविंशतीनां दोषाणां पुनः शङ्कानुदयविभावनेन लीलानित्यतावादं समाप्य तस्या आशास्यत्वमाहुः ॥ इतीत्यादि ॥

ननु लीलानित्यत्वे तदन्तःपातिनां तदनुभवोऽस्तु, तेषामपि स्वरूपान्तःपातित्वात् । न त्वाधुनिकानां, तदन्तःपातित्वेनानित्यत्वात् । तथा सति तस्याः कथमाशास्यत्वमित्याशङ्कायां विचारान्तरमारभते ।

अथेदं विचार्यते । जन्मान्तरसहस्रेषु तपोध्यानेति वाक्यादनेकजन्मसंचितसुकृतराशेरतिशयितभगवदनुग्रहभाजनस्य महत्तमचरणरजोऽभिषिक्तस्य कस्य चित् पुरुषविशेषस्य पूर्वोक्तन्यायेन नित्यलीलामध्यपातिभक्तभावसजातीयभावोत्पत्तौ तद्भावानुसारेणैव तदभिलाषेण भजने क्रियमाणे तल्लीलामध्यपातित्वमस्य भवति, नवेति ? किमत्र युक्तम् । नेति । कुतः ? यत एव तस्यापि

तादृशलीलारसानुभवकामनया भगवद्भजनस्य कृतत्वेनैतस्मिन्नपि तादृशीं लीलां हरिः करिष्यतीति भवता वाच्यम् । तथाचैतस्मिन् क्रियमाणाया लीलाया जन्यत्वेन न नित्यत्वं वक्तुं शक्यम् । तेनैतदर्थमेव क्वचित्प्रकटीभूयास्मै तादृक्सुखं दत्वा स्वस्मिन्नेव प्रवेशयति तमिति, न नित्यलीलायां तस्य प्रवेश इति चेदत्र ब्रूमः । यथा गौतमीयानां मते सर्वज्ञत्वेनेश्वरस्य सर्वविषयकज्ञानस्यावश्यं वाच्यत्वेन विषयाणां जन्यत्वेऽपि, न तद्विषयकतज्ज्ञानस्य जन्यत्वम् । धर्मिग्राहकप्रमाणेन नित्यत्वेनैव च सिद्धेः । तथा पूर्वोक्तप्रमाणैर्लीलाया अपि नित्यत्वेनैव सिद्धायास्तस्या एव तादृग्भक्तविषयत्वमात्रस्यैवाऽत्र वाच्यत्वात् तद्विषयिकायास्तस्या अजन्यत्वात् त्वद्धेत्वसिद्धिः । नच तादृग्भक्तस्यैतद्विषयत्वे मानाभाव इति वाच्यम् । तस्य पूर्वमेवोक्तत्वात् । तथापि बृहद्वामनीयकथासंदर्भे स्वस्तुतिसन्तुष्टभगवत्प्रदर्शितस्वरूपावलोकनसञ्जातमनोरथे श्रुतिभिः, कन्दर्पकोटिलावण्येत्यादिना निरूपिते, दुर्लभो दुर्घटश्चैवेत्यादिना भगवद्वरदानं निरूप्य पश्चाद् ब्रह्मवाक्यं निरूप्यते— उक्तकालं समासाद्य गोप्यो भूत्वा हरिं गता इति । एतदग्रे च पठ्यते । स्त्रियो वा पुरुषा वापि भक्तिभावेन केशवम् * हृदि कृत्वा हरिं यान्ति श्रुतीनां नात्र संशय इति । यद्यपि नगरादपि बहिःस्थितस्यात्यधमस्य कस्यचिन्महाराजान्तःपुरप्रवेशकामनायामपि न तत्र प्रवेशः सम्भवति, प्रत्युत दण्डार्हस्तदिच्छाज्ञानेऽपि तथा तादृशस्यैव जीवस्य पूर्वोक्तकामनायामपि न तत्र प्रवेशः सम्भवति । प्रत्युतायोग्यमिच्छन् पुरुषः पतत्येव न संशय इति वाक्यात् पात एव भवेदत एव भगवता श्रुतिष्वपि दुर्घट इत्युक्तम् । तथापि, मयानुमोदितः सम्यक् सत्यो भवितुमर्हतीत्युक्त्वा तथा भगवदङ्गीकारत एव तथा भवतीति ज्ञायते । सर्वात्मभावेन

चेत् तथा भजनं करोति तदा भगवानप्यङ्गीकरोत्येव । अन्यथा, ये यथा मां प्रपद्यन्ते इति मर्यादा न स्यात् । अथवा पूर्वोक्तभक्तसम्बन्धिन्या अपि तस्या इति नानुपपत्तिः काचित् । अत एव ऋग्वेदेऽपि पठ्यते । विचक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन् * ध्रुवासोऽस्य कीरयो जनास उरुक्षितिं सुजनिमा चकारेति । एष विष्णुः क्षेत्राय निवासार्थं मनुषे स्तुवते देवगणाय दशस्यन् असुरेभ्योऽपहृत्य प्रदास्यन् एतां सर्वां पृथिवीं विचक्रमे । अत्र हि विष्णुमाहात्म्यमुच्यते । तत्र, न हीदमेव महत्तमस्य माहात्म्यं, किन्त्वतोऽधिकमप्यस्तीत्याशयेनाह । ध्रुवास इति । अस्य कीरयः स्तोतारो, जनासो भक्ताः, ध्रुवासो नित्या एवेत्यर्थः । नित्यत्वं तु स्तोत्रेण संतुष्टेन भगवता पूर्वोक्तलीलामध्ये तेषां पातेनेति ज्ञेयम् । अन्यथा जीवस्य स्वत एव नित्यत्वेन, अस्य कीरयो ध्रुवास इत्यनर्थकं भवेत् । नापि सर्वसम्पत्त्या याञ्चाद्यर्थकगमनाभावरूपं कादाचित्कं ध्रुवत्वमत्र वाच्यम् । सङ्कोचे मानाभावात् । तादृशे ध्रुवपदाशक्तेश्च । तस्मादस्मदुक्त एव श्रुतेस्तात्पर्यं वेदितव्यम् । सुजनिमा शोभनानि जनिमानि कीर्तनस्मरणादीनि यस्य एतादृशो विष्णुः, उरुक्षितिं विस्तीर्णनिवासां चकारेत्यर्थः ॥ किञ्च, अनित्यत्वं लीलासु वदन् वादी प्रष्टव्यः । ध्वंसप्रतियोगित्वं ह्यनित्यत्वं, तदत्र कुतस्त्वयाऽवधारितमिति । जन्यभावत्वेनेति चेद् ब्रूयात् तदा स वक्तव्यः । पूर्वसिद्धाया एव तस्याः क्रमेणाविर्भाव एवेति पूर्वमेवोक्तां स्वरूपासिद्धिं किं नानुसन्धत्स इति । न पश्यामीति चेद् ब्रवीषि, तदा स्वाभिमतेश्वरेऽपि तथा ब्रूहि । धर्मिग्राहकप्रमाणेन स तथैव सिद्ध इति तु तुल्यम् । ननु न तुल्यम्, अत्र धर्मिग्राहकमानेनापि प्रातःकालीनलीलायाः सायङ्काले बाल्यस्य च पौगण्डादिष्वनिरूपणात् ।

सत्यम् । तत्र सुत्तरकाले पूर्वलीलासत्त्वासत्त्वौदासीन्येन लीलानिरूपणं क्रियते, न तु पूर्वलीलायाः सत्त्वमसत्त्वं वा निरूप्यते। एवञ्च सति सन्देहे तन्निवारणपूर्वकं, जयति जननिवासः, बहूनि सन्ति नामानि, बृहद्वामनीयकथा, ता वां वास्तूनि, ते ते धामानि, तद्विष्णोः परमं पदम्, तद्विप्रासः, ध्रुवासोऽस्येत्यादिश्रुतिस्मृतिभिरुक्तरीत्या लीलाया नित्यत्वेऽवधारिते सर्वसमाधानार्थं क्रमेणाविर्भावितायाः एव लीलायाः क्रमेण तत्र निरूपणमात्रमिति तत्रापि निर्णयात् कथं न तुल्यत्वम् । न हि प्रतिपदं नित्यत्वं निरूपणीयम् । एकत्र तथा निर्णयस्यैवान्यत्राप्यवगन्तुं शक्यत्वात् । एकत्र निर्णीतः शास्त्रार्थोऽपरत्रापि तथेति न्यायात् । अनन्यलभ्यस्य शास्त्रार्थत्वाद् ॥

अथेत्यादि ॥ पूर्वपक्षमाहुः ॥ नेत्यादि ॥ समादधते ॥ अत्रेत्यादि ॥ त्वद्धेत्वासिद्धिरिति ॥ जन्यत्वरूपहेत्वसिद्धिरित्यर्थः ॥ तथाहीत्यादि ॥ अत्रायमर्थः । यद्यपि बृहद्वामनीयपुराणीयसन्दर्भे, पृथिव्यां भारते क्षेत्र इत्यनेनोक्तं स्थानं केवलाक्षरमध्यपातिनित्यलीलास्थानात् स्थानान्तरमिव प्रतीयते । तथा सति तत्रत्या लीला भिन्नैवेति भ्रमो भवति तथापि, ता वां वास्तूनीत्यादौ, अत्राह तदिति श्रावणाद्दहरविद्यायां, नास्य जरयैतज्जीर्यतीत्यादिना पुरजरादावपि वेश्मजरादेर्निराकरणाद् बृहद्वामनपुराणेऽपि, व्यापिवैकुण्ठसंज्ञित इत्यनेन वैकुण्ठस्य व्यापिविशेषितत्वाच्च पृथिव्यां दृश्यमानस्य तस्य तद्भिन्नत्वं तद्वृत्तिलाभस्थानत्वं वा वाच्यम्। तथा सति तस्यैवात्रापि सत्त्वाच्छ्रुतिसम्बन्धिन्यपि लीला तल्लोकस्थैवेति नित्यैव। अतो नैयायिकप्रतिपन्नेश्वरज्ञानवद्विषयानित्यत्वेऽपि लीलानित्यत्वं सूपपन्नम् । नन्वस्तु श्रुतिसम्बन्धिन्या लीलायास्तथात्वं श्रुतिपुराणसिद्धत्वात्, न त्वाधुनिकभक्तसम्बन्धिन्या अपि । तदनुक्तत्वात । तथा सति कथं तस्या आशास्यत्वमित्याशङ्कायामाहुः ॥ एतदग्रह इत्यादि ॥ भवतीति ॥ आधुनिकभक्तस्यापि भवति। तथाचाशास्यत्वे काऽपि नानुपपत्तिरित्यर्थः । नन्वङ्गीकारेणानुमोदने मनोरथस्य सिद्धिरित्यङ्गीकारश्च

श्रुतीनामिव साधनविशेषवशात् । तथाच तादृशसाधनाभावेन तद्ऽभावात्तद्सिद्धिरित्यर्थकमेवाशासनमित्याकाङ्क्षायामाहुः ॥ सर्वेत्यादि ॥ तथाच तादृशभजनमेवाङ्गीकारगमकमिति तादृशाशासनमनर्थकमित्यर्थः । ननु भवत्वेवं जाड्यपरिहारो गौतमीयानां, न तु मायावादिप्रभृतिभिस्तथाङ्गीकार्यम् । तत्तन्त्रे पूर्वोक्तयुक्त्यप्रसिद्धेरित्याशङ्कायां प्रकारान्तरमाहुः ॥ अथवेत्यादि ॥ तथाच भगवदिच्छायाः कारणता तु सर्वैरेव सर्वत्राङ्गीकार्या । तथाच तथैव समाधिरित्यर्थः । एवञ्च यथा स्वाश्रयमोक्षवादिनां तेषां मते शबरकुलसंवर्द्धितराजकुमारवद्विस्मृतकण्ठमणिस्मरणवद् वा पूर्वसिद्धस्यैव स्वरूपस्य ज्ञानप्रतिबन्धनिवृत्तिमात्रेण प्रागुपचारस्तथा प्रकृतेऽपि साधनैः प्रतिबन्धनिवृत्तौ लीलानुभव आधुनिकभक्तस्यापि तात्कालिकस्वसम्बन्धित्वोपचार इति तदीययुक्त्या तेषामपि जाड्यपरिहार इति भावः । ननु पूर्वमाविर्भावतिरोभाववादे सर्वस्य सार्वकालिकी सत्ता प्रतिपादितेति तद्रीत्या लीलायां तत्सम्बन्धिनां नित्यत्वमनुक्तसिद्धमेवेति पुनस्तत्साधनस्य किं प्रयोजनमिति शङ्कानिवृत्त्यर्थं श्रुतिमाहुः ॥ अत एवेत्यादि ॥ अत एवेति ॥ एतन्नित्यत्वस्य तद्विलक्षणत्वं हृदिकृत्वैव ॥ विचक्रम इति ॥ त्रिभिः क्रमैराक्रान्तवान् । एतावता कथं प्रकृतसिद्धिरित्याकाङ्क्षायामाहुः ॥ अत्र हीत्यादि ॥ नित्यत्वं त्वित्यादेरयमर्थः । यथा, पुरोडाशं चतुर्धा करोतीत्यनेनोक्तस्य चतुर्द्धाकारस्याग्नेयं चतुर्धा करोतीति वाक्येनाग्नेये उपसंहारस्तथा, नित्यो नित्यानामित्यादिनोक्तस्य जीवनित्यत्वस्य भगवत्स्तोतृषु उपसंहार इति न वक्तुं शक्यम् । पूर्वोपन्यस्तश्रुतिस्मृतिन्यायव्याकोपात् । एवं सति यदत्र ध्रुवत्वश्रावणं तत्र कश्चिद्विशेषो वक्तव्यस्तस्य चोक्तरूप एव युक्तः । अन्यथा निष्प्रमाणकस्य वृत्तिसङ्कोचस्य लक्षणायाश्चापातादिति । तथाच श्रुत्युक्तभगवत्स्तोतृनित्यत्वार्थापेक्षा लीलातत्सम्बन्धिनां या सत्ता सा पूर्वोक्ताया विलक्षणस्वरूपधर्मयाथातथ्यघटितत्वात्, तस्यास्तु तदन्यथाभावघटितत्वादिति । रुद्र यत्ते जनिम चारु चित्रमित्यादौ जनिशब्दस्य जन्मनि प्रसिद्धत्वात्तद्व्यावृत्त्यर्थमर्थान्तरमाहुः ॥ नामानुकीर्त्तनेत्यादि ॥ जनी प्रादुर्भावे जायन्त इति जनिमानीति व्युत्पत्त्या तानि तथेत्येतादृश इत्यर्थः । इदञ्च लीलानित्यत्वं, तद्भूतस्य तु नातद्भाव इत्यधिकरणे प्रपञ्चि-

तम् । एवं शब्दप्रमाणेन लीलानित्यत्वे स्थापितेऽपि शङ्काढ्यमानी जन्यभावत्वेन नश्वरत्वेन व्याप्तिं हृदिकृत्य, अनित्या, जन्यत्वात्, जन्या, क्रमिकत्वादिति क्रमिकत्वबोधकप्रत्यक्षशब्दानुगृहीतेनानुमानेन प्रत्यवतिष्ठत इति तं प्रत्याहुः ॥ किञ्चेत्यादि ॥ तथाच जन्यत्वनश्वरत्वयोर्व्याप्तौ सत्यामपि प्रकृते शब्दस्य तात्पर्यान्तरेण तदनुग्राहकत्वात्, प्रत्यक्षस्य च तत्त्वास्पर्शित्वेन दुर्बलत्वात् स्वरूपासिद्धेनानुमानेन तत्स्वरूपासिद्धेरित्यर्थः । अत्राह । न पश्यामीति ॥ असतः सत्तामनङ्गीकुर्वता सिद्धान्तिनापि प्रपञ्चसत्यत्वाय कारणाद्बहिर्भावः कारणे लय इत्येवंरूपयोरुत्पत्तिनाशयोरङ्गीकारात्तन्न्यायस्यात्रापि शक्यवचनत्वान्न पश्यामीत्यर्थः । तत्र प्रत्याहुः ॥तदेत्यादि॥ तथा ब्रूहीति ॥ त्वं हि कार्यलिङ्गकानुमानात्कर्तृत्वेनेश्वरं साधयसि । तथा सति कर्तृत्वस्योत्पत्तिविनाशशालित्वव्याप्तत्वात्तत्रापि सिद्धान्त्यभिमतं पूर्वपक्षाभिमतं चानित्यत्वं निराबाधमतस्तदपि ब्रूहीत्युपालम्भः । ननु धर्मिग्राहकप्रमाणेनेश्वरो नित्य एव सिद्ध इति तत्र तथा कथनमनुचितं, नात्रेति चेत्तत्राहुः ॥ धर्मीत्यादि ॥ धर्मिग्राहकं प्रमाणं सर्गाद्यकालीनपरमाणुद्वयसंयोगजनकस्य कर्मणो जन्यत्वसाधकानुमानं, नवानुमानानि वा । प्रकृते तु लीलातत्सम्बन्धिसाधिकाः श्रुतयः श्रुतार्थापत्तयश्च बोध्याः । तथाच परिहारसाम्यादत्रापि तदुचितमित्यर्थः । तौल्यं परिहरति ॥ नन्वित्यादि ॥ अत्र लीलाया नित्यत्वग्राहके पूर्वोक्तप्रमाणे सत्यपि तस्मिन् प्रातरित्याद्युक्तप्रकारेण निरूपणादनित्यत्वस्यैव सिद्धेरित्यर्थः । अत्र समादधते ॥ सत्यमिति ॥ सर्वसमाधानार्थमिति ॥ लीलानित्यत्वेन तद्रसस्वभावतन्मनोरथादिसाम्यं स्यादित्यर्थः । ननु नित्यत्वस्य कण्ठतोऽनुक्तेन तुल्यत्वमत आहुः ॥ न हीत्यादि ॥ अनन्यलभ्यस्येत्यादि ॥ शब्देन निर्णीतस्य नित्यत्वस्य शब्देतरालभ्यत्वेन तस्य शब्दार्थत्वादित्यर्थः । एवं शब्दस्य मानान्तरविरोधकृतं नैर्बल्यं निरस्तम् ॥

अतः परं कर्मस्वरूपमर्यादाभङ्गदोषविधूननाय पूर्वोत्तरपक्षावाहुः ।

ननु लीलायाः कर्मरूपत्वेन तस्य च त्रिक्षणावस्थायित्वनियमेन न नित्यत्वं वक्तुं शक्यमितिचेद्, हन्तैवं ज्ञानस्यापि त्रिक्षणावस्थायित्वनियमेनेश्वरज्ञानस्यापि न नित्यत्वं वक्तुं शक्यम् ।

धर्मिग्राहकप्रमाणाच्चेत्तुल्यम् । ननु लीलासम्बन्धिपदार्थाः सर्वे सर्वैरनुभूयमाना एव, तद्भिन्ना वा । आद्ये तन्नित्यत्वं प्रत्यक्षबाधितम् । क्वचिच्च श्रूयमाणवैलक्षण्योपलम्भाच्च, न तथा वक्तुं शक्यम् । द्वितीये त्वेतेषामपीतरपदार्थसाधारण्येन तल्लीलारसनिमग्नानामेतेष्वेवासाधारणप्रेमानुपपत्तिः । तादृग्भक्तानामेतद्दर्शनादिना तद्रसानुभवेनाह्लादविशेषस्यानुभूयमानत्वेन च न तथा वक्तुं शक्यमित्युभयतःपाशा रज्जुः । नच भिन्नत्वेऽप्यभिन्नत्वभ्रमात् प्रेमानुपपत्तिः । दृश्यते हि स्वप्नप्रतीतप्रमदादर्शनादिना पारमार्थिकस्खलनादिरिति वाच्यम् । एवं तादृशाह्लादोपपत्तावपि तत्र तत्र वेणुकिङ्किण्यादिश्रवणतत्सौरभविशेषानुभवप्रदीपाद्यनुभवानां पारमार्थिकानामनुपपत्तेः । न ह्यभिमानमात्रेणोक्तानामनुभवः सम्भवति । अन्यथा जागरितस्यापि प्रमदास्पर्शाद्यनुभवप्रसङ्गः । तादृशेषु भ्रमानुपपत्तिश्चेद् इत्याशङ्कानिरासस्तु ‘ दिवीव चक्षुराततमिति श्रुतिव्याख्यानेनैव कृत इति दिक् ॥

नन्विति ॥ हन्तेति च ॥ यद्यपि प्रतिबन्देरनुत्तरत्वं तथापि धर्मिग्राहकाणां पूर्वोक्तप्रमाणानां प्राबल्यादभीष्टसिद्धौ प्रतिबन्देः परप्रतिपत्तिमात्रार्थत्वात्त्रोत्तरत्वमेव, परप्रसिद्ध्यापरबोधनसौकर्यादिति तथाचेश्वरज्ञानवत्तत्कर्मणोऽपि लोकविलक्षणत्वान्न तेन लौकिककर्मस्वरूपमर्यादाभङ्ग इत्यर्थः । एवं त्रयोविंशचतुर्विंशौ परिहृतौ । अत्र प्रत्यक्षत्वादिदोषद्वयपरिहाराय पूर्वोत्तरपक्षावाहुः ॥ ननु लीलेत्यादि ॥ प्रत्यक्षबाधितमिति ॥ त्र्यञ्जनादिप्रत्यक्षेण बाधितम् ॥ वैलक्षण्येति ॥ यथा रत्नबद्धोभयतटीत्यादि ॥ तादृशेष्विति ॥ उत्कटभक्तिमत्सु । एवमाशङ्क्य तत्समाधिं स्मारयन्ति ॥ दिवीवेत्यादि ॥ तथाच तद्व्याख्याने, दिवि स्वर्गे यथेत्यादिना स्वर्गीयाणां पदार्थानां महदुद्भूतरूपवत्त्वेऽपि स्वर्गस्थदृश्यत्वमेव, न त्वदृश्यत्वमपि । तथैव वस्तुसामर्थ्यात्तथैवात्रापि श्रौतदृष्टान्तबलेन साधारणजनाविषयत्वं स्थापितम् तेन सर्वानुभूयमानपदार्थेभ्यो भिन्नत्वमर्थादेव सिद्धमिति प्रत्यक्षबाधोऽनवसरादेव पराहतः । लौकिकेष्वपि भक्तानां लीला-

सम्बन्धित्वेन बुद्धिस्तु, चक्षुरिति द्वितीयैकवचनान्तमित्यादिना सर्वाऽनुभूयमानस्य तद्वृत्तिलाभस्थानत्वव्यवस्थापनाद् अस्य तत्सम्बन्धिसम्बन्धित्वप्रयुक्तत्वाद्बाधकत्वेन पर्यवस्यतीति न दोषलेश इति भावः। एवं पञ्चविंशषड्विंशौ परिहृतौ॥

अतः परं प्रमाणयोरितरेतरविरोधो लीलास्थानां नाशानुभावादिवेति दोषद्वयपरिहाराय तत्सूचकं पूर्वपक्षमाहुः।

ननु प्रभासीयकथायाः कथं सङ्गतिरिति चेदुच्यते। भगवान् हि सर्वलीलायुतः प्रकटः सदा। तथाच यथा धर्मरक्षा, सद्रक्षा देवकार्यकरणं भूभारहरणादिकं भगवल्लीला, तथैवासुरव्यामोहनमपि लीलैव। मोहनं च माययैवेति निश्चयः। एवं सति आसुरमोहनार्थं या लीला सा मायिकीति मन्तव्या। तस्यां च लौकिकत्वेन ज्ञानेन भगवत्यपि लौकिकत्वज्ञानमासुराणामेव, न दैवानाम्। यतस्तदर्थमेव तत्करणम्। अत एव भगवताऽप्युक्तम्। अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ॥ परं भावमजानन्तो मम भूतमहेश्वरम्॥ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः। राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः॥ महात्मानस्तु मां पार्थ ! दैवीं प्रकृतिमाश्रिताः। भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्। मामव्ययमितिपदाभ्यां यः प्रकटो दृश्यते, तमेवाऽविकृतिं जानन्तो भजन्त इति गम्यते। अपिच भगवद्गीतास्वेव। यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः। यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये, इत्युपक्रम्याक्षरस्वप्राप्त्युपायौ निरूप्य, स्वप्राप्तौ च विशेषमुक्त्वा पुनर्भगवतोच्यते। अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे। रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके॥ भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते। रात्र्यागमेऽवशः पार्थ ! प्रभवत्यहरागमे॥ परस्तस्मात्तु भावोऽन्यो व्यक्तोऽव्यक्तात् सनातनः। यः स सर्वेषु भूतेषु

नश्यत्सु न विनश्यति, इत्यादि । एतदन्ते च, पुरुषः स परः पार्थ ! भक्त्या लभ्यस्त्वनन्ययेत्युक्त्वा, परस्य लक्षणमुच्यते, यस्याऽन्तःस्थानि भूतानि येन सर्वमिदं ततमिति । अत्र च, यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति, तस्यैव लक्षणं, यस्यान्तःस्थानि भूतानीति पदेनोक्तम् । एतल्लक्षणवत्त्वं च मृत्स्नाभक्षणजृम्भादिलीलानिरूपणप्रस्तावे पक्षान्तरनिरासपूर्वकं भगवतो दृश्यस्वरूपस्यैव नैसर्गिकधर्मत्वेन दशमस्कन्धे निरूपितम् । अपि च तत्रैव दामोदरलीलाप्रस्तावे तस्मिन्नेवोदरे दाम्नामनवच्छेदकत्वं निरूप्यते । तेन तस्योदरस्यैव ब्रह्मत्वं निरूपितं भवति । उदरस्याब्रह्मत्वे, दामभिरनवच्छेद्यत्वे देशकालापरिच्छिन्नत्वं ब्रह्मधर्मं हेतुत्वेन 'न चान्तर्न बहिर्यस्य' इत्यादिना न निरूपयेत् । व्यधिकरणत्वापत्तेः । तथाच धर्मिग्राहकमानैर्विग्रहस्यैव ब्रह्मत्वं निश्चितमिति तद्विरुद्धधर्माणामसतामेव प्रदर्शनमसुरव्यामोहायेति निश्चीयते । अन्यथाऽनुपपत्तेर्बालिशत्वात् । उक्तश्च ब्रह्माण्डपुराणे । अमोहाय गुणा विष्णोराकारश्चिच्छरीरता । निर्दोषत्वं तारतम्यं मुक्तानामपि चोच्यते ॥ एतद्विरुद्धं यत् सर्वं तन्मोहायेति निश्चयः । अज्ञत्वं पारवश्यं च विधिभेदादिकं तथा । तथा प्राकृतदेहत्वं देहत्यागादिकं तथा । असुराणां विमोहाय दोषा विष्णोर्नहि क्वचित् । तथाच पद्मपुराणे पाषण्डप्रवर्तनार्थं वृषध्वजमाज्ञापयता भगवतोक्तम् । त्वामाराध्य तथा शम्भो ! ग्रहीष्यामि वरं सदेति । न ह्याराधकत्वं भगवति सम्भवति । तस्य जीवधर्मत्वात् । तस्य यथा स्वस्मिन्नसत एव प्रदर्शनं लोकव्यामोहाय तथा तस्या अपीति मन्तव्यम् । अपिच यथेन्द्रजालविद्यायां नटस्य स्वर्गगमनं, तत्र युद्धं, तेन तन्मरणं, मृतस्यात्र पातः, तस्मिन् स्त्रियाश्च सहगमनादिकं पूर्वमनुभूतं, पश्चात्कालीनेन तदागमनेन प्रत्यक्षप्रमाण-

सिद्धेन मायिकम् इति निश्चीयते । तथा, जयति जननिवास इत्याद्युक्तश्रुतिस्मृतिभिः पूर्वपूर्वलीलाया नित्यत्वं सिद्धमित्यनन्यगत्यैवाऽस्या लीलायाः प्रदर्शनमात्रपरत्वमध्यवसेयम् । नचैतदनुरोधेन पूर्वलीलानामेव तथात्वं वक्तुं शक्यम् । तासामुक्तप्रमाणैर्नित्यत्वेनैव सिद्धत्वात् । नचोक्तदृष्टान्तन्यायेन पूर्वं तथा सिद्धमिति पश्चाद् वाध्यमिति वाच्यम् । तत्र लौकिकत्वेन प्रमाणस्य दोषस्यापि सम्भवेऽपि प्रकृते दोषासम्भवात् । अत्र पूर्वोक्तन्यायेन लीलानामन्योऽन्यं वाध्यबाधकभावाभावेन तथा वक्तुमनवसरश्चेत्यलं विस्तरेण ॥

नन्वित्यादि ॥ कथं सङ्गतिरिति ॥ पूर्वोक्तप्रमाणैर्हि लीलास्थयोर्नित्यत्वं तत्कर्तुश्च प्रदृश्यमानविग्रहभिन्नत्वं नित्यत्वं च व्यवस्थापितम् । तथा सति द्वारिकालीलास्थानामपि तथात्वमावश्यकम् । एकादशे स्कन्धे च यदुकुलस्य शापपूर्वको नाश उच्यते । लोकाभिरामां स्वतनुं धारणाध्यानमङ्गलम् * योगधारणयाग्नेय्या दग्ध्वा धामाविशत् स्वकमित्यनेन स्वरूपस्याप्यन्यथाभाव उच्यते । तथा सति प्रमाणयोर्लीलयोश्च विरोधात् प्रदर्शनमात्रार्थत्वं सर्वस्यायाति । यदि च स्वप्नादिवैधर्म्यान्मायिकत्वं नाङ्गीक्रियते तदापि सत्कार्यवादस्य पूर्वं साधितत्वादत्रापि तन्न्यायेन कार्यत्वे सिद्धे नित्यत्वस्यैव दार्ढ्यमंशावतारणाच्च । तथा अक्रूरभीमाहुतादीनां पुराणान्तरे पूर्वजन्मकथनादपि तथा । एतेनैव प्रथमतृतीयस्कन्धीयार्जुनोद्धवोक्ती भारतविष्णुपुराणादिस्थमौशलादिकथापि व्याख्याता । अतो विग्रहलीलातत्सम्बन्धिनां नित्यत्वे बहुवाक्यविरोधादस्याः सङ्गतिर्न भविष्यतीत्यतः प्रश्नः, कथं सङ्गतिरिति ॥ तत्र तस्याः सङ्गतिं व्युत्पादयितुं विग्रहादेर्नित्यत्वेऽपि सङ्गतिर्न दुर्घटेत्याशयेन आविर्भूतस्य भगवतः सामर्थ्येन तदुपपत्तिमाहुः ॥ उच्यते भगवानित्यादि, लीलैवेत्यन्तम् ॥ तथाच तदपि लीलात्वात् स्वरूपसाध्यमिति तदा नियमस्वरूपनित्यमिति तत्सामर्थ्येन वैतदुपपत्तिरित्यर्थः । सा कया विधयेत्याकाङ्क्षायां तत्करणं तस्याः स्वरूपं तां च विधां चाहुः ॥ मोहनं चेत्यारभ्य, करणमित्यन्तम् ॥ इयं च लीला असुरार्था, न देवार्थेत्यत्र मानमाहुः ॥

अत एवेत्यादि ॥ तथाचैतद्वाक्ये स्वावज्ञायास्तद्भावप्रकारकथनपूर्वकमुक्तत्वात्तेषां मूढत्वेन मोहस्य सार्वदिकत्वात्तिरोभावावसर एवंप्रकाराऽकरणे मोहशैथिल्यं भवेदतस्तथा करणम् । तेन च देवानां न मोह इति । तस्य मोहस्याऽव्याख्यातत्वादेव ज्ञानप्रकारमाहुः ॥ मामित्यादि ॥ तथाचासुराणामेवान्यथा बुद्धिर्न देवानामिति पूर्वोक्तं युक्तमेवेत्यर्थः । एवमस्या लीलाया असुरार्थत्वे सिद्धे स्वरूपनित्यत्वं निष्प्रत्यूहमेवेत्याशयेन तन्नित्यत्वसाधकमानान्तरमप्याहुः ॥ अपिचेत्यादि ॥ निरूप्यते ॥ ओमित्येकाक्षरं ब्रह्मेत्यनेन, अनन्यचेता इत्यनेन च निरूप्यते ॥ अनुक्त्वेति ॥ मामुपेत्य पुनरिति श्लोकेऽनुक्त्वा ॥ एतदन्त इति ॥ एवमक्षरस्वरूपनिरूपणोत्तरम् । एवं गीतोक्तं प्रमेयं निरूप्य तादृशत्वं भगवति निगमयन्ति ॥ एतदित्यादिना ॥ सिद्धमाहुः ॥ तथाचेत्यादि ॥ एवं प्रभासीयलीलाया मायिकत्वद्राढ्र्याय स्वरूपनित्यत्वं पुनरत्र स्मारितम् । तेन लोकाभिरामामित्यनेन यः स्वरूपस्यान्यथाभाव उक्तः स प्रदर्शनमात्रमेवेति बोधितम् । एवमेव ब्रह्माण्डपुराणेपूच्यते । तदेव हि ब्रह्मतर्कस्तवटीकायामप्पय्यदीक्षितेनोपन्यस्तम् । तथाहि । निर्दोषश्चेत् कथं विष्णुर्मनुष्येषु प्रजायते * चिन्ताश्रमव्रणाज्ञानदुःखयुग् दृश्यते कथम् ॥ एवं मे संशयो ब्रह्मन् हृदि शल्य इवार्पित इति नारदप्रश्ने । स्त्रीपुंमलानुषङ्गात्मा देहो नास्य विजायते * किन्तु निर्दोषचैतन्यसुखनित्यां स्वकां तनुम् । प्रकाशयति सैवेयं जनिर्विष्णोर्न चापरा ॥ तथाप्यासुरमोहार्थं परेषां च क्वचित् क्वचित् । दुःखाज्ञानश्रमादींश्च दर्शयेच्छुद्धसद्गुणः ॥ क्व व्रणादि क्वचाज्ञानं स्वतन्त्राचिन्त्यसद्गुणे । दौर्लभ्याच्चैव मोक्षस्य दर्शयेनत्ताजो हरिः । कृष्णो ह्यत्यक्तदेहोऽपि त्यक्तदेहस्य देहवत् । लोकानां दर्शयामास स्वरूपसदृशाकृतिमिति ।

तथैव श्रीशुकैरपि श्रीभागवत उक्तम्— राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडम्बनमवेहि यथा नटस्य * सृष्ट्वाऽऽत्मनेदमनुविश्य विहृत्य चाऽन्ते संहृत्य चाऽऽत्ममहिनोपरतः स आस्ते ॥ मर्त्येन यो गुरुसुतं यमलोकनीतं त्वां चानयच्छरणदः परमास्त्रदग्धम् । जिग्येऽन्तकान्तकमपीशमसावनीशः किं स्वाऽवने ? स्वरनयन् मृगयुं सदेहम् ॥ तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् । नैच्छत् प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्व-

स्थगतिं प्रदर्शयन्निति श्लोकत्रयेण । अत्रायमर्थः । पूर्वं यदुकुलनाशः स्वरूपान्यथाभावश्चोक्तः । तत्र योगधारणयाऽऽग्नेय्या दग्ध्वा धामाविशदित्यकारप्रश्लेषस्यापि संभवदुक्तिकत्वात् किमदग्ध्वा उत योगिवद्दग्ध्वा धामाविशदिति सन्देहे, तं वारयितुं प्रवृत्तो लीलातत्सम्बन्धिस्वरूपविषयकं संदेहं प्रथमेन वारयति । अन्यथा तृतीयश्लोकेनैव तन्निवृत्तेराद्यौ न वदेत् । तथा सत्ययमर्थः । राजन् परस्याक्षराद्प्युत्तमस्य तनुभृतां यादवादीनां जननाप्ययेहा उत्पत्तिनाशचेष्टाः, मायाविडम्बनं मायानुकरणमवेहि । परो हि नित्यलीलासम्बन्धिनां समागमने स्वमायया उत्पत्तिनाशत्वेन प्रत्याययति । तत्र दृष्टान्तः । यथा नटस्येति । नटो यथाऽन्यदन्यत् प्रत्याययति तथेत्यर्थः । इदमेव पूर्वाध्याये मौशलक्लिष्टं दारुकं प्रति भगवतोक्तम् । त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः * मन्मायारचितामेतां विज्ञायोपशमं व्रजेत्यनेन । एतामित्यनेनात्र सन्निहितस्य, गच्छ द्वारवतीं सूतेति श्लोकत्रयोक्तस्यैव परामर्शात् सर्वस्य मायिकत्वेऽभिसंहिते सर्वामित्येव वदेत् । अतस्तदनुवाद एव मायाविडम्बनमित्यत्रेति निश्चयः । परत्वं निगमयितुमिदानीं षष्ठगुणयोगमाह ॥ सृष्ट्वेत्यादि ॥ महिम्नेर्महिमा । तथाच प्रलये यथा च सर्वं स्वात्मनि निवेश्योपरतस्तात्कालिकपरिकरयुक्तस्तिष्ठति तथेदानीमास्त इत्यर्थः । श्रीधरीये तु तनुभृत्सु यादवादिषु आविर्भावतिरोभावान्तरे जननाप्ययव्यवहाराभावेन तावतैव चारिताथ्यात् । तस्मादुक्त एवार्थः । एवं सपरिकरस्य स्थितौ बोधितायां पुनः सन्देहः स्यात् । ननु मूलरूपेण तथास्तु, अवताररूपे तथात्वं कथमवगन्तव्यमिति तदर्थसामर्थ्यमाह । मर्त्येनेति । अन्तकान्तकं मृत्युञ्जयम् । स्वावने स्वीयानामवने । तथाच मर्त्यशरीरस्य नाशोत्तरं चिरकालेऽपि गुरुसुतानयनेन ब्रह्मास्त्रदग्धत्वदानयनेन मृत्युञ्जयजयेन च लोके वेददेवाद्यप्रतिबद्धसामर्थ्यस्येदानीमपि स्वापराधिमृगयुस्वर्नयनेन प्रकटीकरणात् सर्वकालमेकरूपमेव सामर्थ्यं विनिगन्तव्यम् । तथाच मूलरूपमेवेदमित्यर्थः । एवमेव वज्रोद्धवयोः स्थापनाद् ब्राह्मणवाक्याप्रतिबद्धत्वमपि सामर्थ्यं बोध्यम् । तर्हि सामर्थ्ये विद्यमाने तानात्मानं च कुतो न रक्षितवानित्याकाङ्क्षायां तत्कारणं भक्तिस्थितिमर्यादां चाह । तथापीत्यादि । अनन्यहेतुर्निरपेक्षककारणम् । तथाच देवकार्यार्थं

प्रकटस्तदर्थं तेऽप्यवतारिताः । यदा तत्सर्वं कृतं तदा स्वस्य भूमौ कार्याभावात् स्वधामजिगमिषायां तेषां वपुरत्र शेषितं प्रणेतुं नैच्छत् । तद्धि मर्त्यमपि यं सुखं पुष्णातीति भगवद्स्थितौ सुखाभावेन तत्पोषस्य सुतरामभाव इत्यतो नैच्छदित्यर्थः । तदाह । मर्त्येन किं, स्वस्थगतिं प्रदर्शयन्निति । स्वस्था भगवदेकनिष्ठाः । ते हि भगवदिच्छाऽनुरूपमेव कुर्वन्ति । तैरेवमवगतं– भगवानेवमसुरान् व्यामोहयिष्यति इति ततस्तथा कृतवन्त इति तेषां गतिं प्रकृष्टामुत्तमां दर्शयन् विद्यमानेऽपि सामर्थ्ये तान्न रक्षितवानिति भावः । तेन यथा प्राकट्यावसरे बभूव प्राकृतः शिशुरिति तत एव तथाभवनेन प्राकृते बुद्धिरुत्पादिता तथा तिरोधानावसरे स्वतोऽग्निप्राकट्येनात्मानं योगिनमिव प्रदर्शयता स्थिरीकृता । लौकिकप्रकारकरणे तु भक्ता अपि व्यामुह्येरन् । प्रकारान्तरे असुरा अपि व्यामोहं शिथिलं कुर्युः । यथाऽयोध्यानयनेन । अत उभयस्यार्थे स्वतन्त्रेच्छ एव नाट्यं समापितवान् । जनिष्यमाणदैत्यव्यामोहस्थिरीकरणरूपदेवकार्यस्यैतावतैव सिद्धेरिति, लोकाभिरामेति श्लोकतात्पर्यं सिद्ध्यति । अत एव प्रथमस्कन्धे । ययाऽहरद् भुवो भारं तां तनुं विजहावजः * कण्टकं कण्टकेनेव द्वयं चाऽपीशितुः समम् ॥ यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः । भूभारः क्षपितो येन जहौ तच्च कलेवरमिति द्वयेन नटदृष्टान्तपूर्वकं भूभारहर्तुर्देहस्यैव त्याग उक्तो लीलान्तरकर्त्तुः । तेनाप्यन्तरासृष्टिरूपस्यैव देहस्य त्यागः सिद्ध्यति । यथा नटो नाट्यवेषमेव दूरीकरोति न स्वीयं रूपमिति । स्वस्मिन् प्राकृतत्वबुद्ध्यापादकं यद्रूपं तेन नाट्येन त्यक्तं, न तु मूलरूपं व्यूहरूपं चेति फलति ।

न च व्यूहमूलरूपयोरभेदः । वृष्णीनां वासुदेवोऽस्मीति विभूतौ कथनात् । किञ्च । तेनान्यदपि कार्यं साधितम् । एकं भगवतः कार्यं बह्वर्थानां च साधकमिति शास्त्रार्थात् । तथाहि । वेदः सर्वोऽपि भगवल्लीलाप्रतिपादकः । तथाच जातकर्मादिप्रतिपादकसार्थकत्वाय यथा तदनुकरणमेवं सांपरायिकप्रतिपादकस्यापि तस्य तथात्वायैवं करणम् । देवानामप्यद्भुतरसोत्पादनायैवैतत् । तदुक्तं तत्रैव । देवादयो ब्रह्ममुख्या निविशन्तं स्वधामनि * अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः ॥ सौदामिन्या यथाऽऽकाशे यान्त्या हित्वाऽभ्रमण्डलम् । गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः ॥ देवादयो

ब्रह्ममुख्या दृष्ट्वा योगगतिं हरेः । विस्मितास्तं प्रशंसन्तः स्वधामानि ययुर्मुदेति ॥ नन्विदमुक्तमनुचितम् । हासो जनोन्मादकरी च मायेति वाक्यात् स्मितस्य मायात्वेन तत्कृतकामदेवादिवर्द्धनस्यापि मायिकत्वप्रसञ्जकत्वादितिचेन्न । तस्य मायाया एतद्भिन्नत्वात् । फलभेदेन तथानिश्चयात् । दृश्यते हि मरुदेशराजधान्यां मायाविरचितदाडिमानामिदानीमपि फलानि । तान्युपभुञ्जानानां च तद्रसानुभवतापोपरमादयः । अन्यत्र च दर्शनमात्रता मायाविरचितानाम् । तेन तत्रैवाऽत्रापि फलवैजात्येन कारणवैजात्यमनुमेयम् । यदि च कारणवैजात्यं न मनुषे तदापि फलवैजात्यस्य प्रत्यक्षसिद्धत्वान्न पूर्वत्र दोषसञ्चारः । दर्शननिरस्तत्वात् । प्रकृते च शब्दसिद्धत्वाद् वरणाऽग्निमुपनिषदुक्तां परमात्मत्वानुभूतामग्निशिखां वा प्रकटीकृत्य तस्मिन् स्वयमन्तर्भूय पूर्वप्रतिपादितं स्वनित्यलीलास्थानं प्राविशदिति निबन्धोक्तो निष्कर्षः । तदेतद्ब्रह्माण्डपुराणब्रह्मपुराणाभ्यामपि द्रढयन्ति वादिमुखध्वंसाय, उक्तं चेत्यादि ॥ ग्राह्योक्तमङ्गत्वादिकं रसस्वरूपातिरिक्तस्वरूपसम्बन्धीति बोध्यम् । तेन प्रियाविप्रयोगसामयिकाङ्गत्वस्य, भक्तपारवश्यस्य, आत्तगजेन्द्रलील इत्याद्युक्तविधिभेदस्य च न दोषावहत्वम् । तत्र रसस्वरूपादिना तथैव सिद्धत्वात् । तथा सति, त्वं हि नः परमं चक्षुरित्याद्युक्तमङ्गत्वं तथा । अत एव, मन्नेषु मां वेत्याद्युद्धववाक्यम् । एवं पारवश्यमपि, तत्तस्य कैङ्कर्यमऽलंभूतां न इत्यादिवाक्योक्तम् । विधिभेदोऽपि शतधनुर्वधादिरूपः । आदिपदेन विष्वकरणम् । यथा यवनेन सह युद्धाकरणम् । प्राकृतदेहत्वं सत्त्वदेहत्वम् । देहत्यागादिकमित्यादिपदेन शाल्वयुद्धादौ प्रकृत्युपप्लवः, सांपरायिकक्रियाकरणादिकं च तत्र संगृहीतं बोध्यम् । प्रसङ्गात्तदीयधर्मान्तरमपि मृशन्ति ॥ तथाचेत्यादि ॥ अनन्यगत्येति ॥ उक्तशुकवाक्यस्यावतारोत्तरतिरोभावोत्तरकालीनत्वात् तत्रत्यानां जयत्यादीनां वर्त्तमानार्थकप्रयोगाणामन्यथानुपपद्यमानत्वात् तदनन्यगत्येत्यर्थः ॥ अत्र पूर्वोक्तन्यायेनेत्यादि ॥ नटदृष्टान्ते यथा जीवनं प्रामाणिकम् । तन्मरणस्य बाधकम् । सामग्र्यऽङ्गता चावयवविशरणस्य बाधिका । तन्न्यायेनाऽत्र प्रभासीयलीला न तच्छरीरादिबाधिका । उक्तप्रमाणविरोधेन तद्दर्शनस्याप्रामाणिकत्वात् । अतस्तथा कथनमनवसरपराहतमित्यर्थः ॥ अलं वि-

स्तरेणेति ॥ ब्रह्माण्डपुराणे नारदप्रश्नब्रह्मोत्तराभ्यामेकादशस्कन्धसमाप्तौ च कण्ठत एवास्यां लीलायां मायिकत्वस्य कथनात्तथेत्यर्थः ।

ननु तस्यामेव लीलायां न मायिकत्वं, किन्त्वखिलप्रपञ्चस्यैव तथात्वम् । एकादशीयसमाप्ताध्याये भगवता उद्धवं प्रति तथोपदेशादित्याशङ्कायामाहुः ।

एतेन, यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः * नश्वरं गृह्यमाणं तद्विद्धि मायामनोमयमिति भगवद्वाक्यं लीलामध्यपात्यन्तरङ्गभक्तं प्रत्युक्तमिति न वास्तवत्वं कस्याप्यर्थस्य वक्तुं शक्यमितिकुचोद्यं निरस्तं वेदितव्यम् । उक्तरीत्या आसुरव्यामोहाय प्रदर्श्यमानानामर्थानामेव, यदिदमित्यादिना कथनात् अन्यथा, नश्वरमितिनोक्तं स्यात् । गृह्यमाणमित्येतावतैव सर्वप्राप्तेः । एवं सति द्विजशापेन नश्वरमिति गृह्यमाणं तत्तथेत्यर्थः पर्यवस्यति । अत एव, यदिदं मनसा वाचा गृह्यतेऽन्यैरपीन्द्रियैः * अहमेव, न मत्तोऽन्यदिति बुद्ध्यध्वमञ्जसेति भगवतो हंसस्य वचनं गीयते । अत्र विद्वद्भिरेवं ज्ञेयम् । आदौ निगूढाशयेन शुकदेवेन, भूभारराजपृतना इत्युपक्रम्य, संजह्रे स्वकुलं विभुरित्यन्तेन मोहिका लीला सामान्यत उक्ता । अत्राऽस्वकुलमिति निगूढः पदच्छेदो ज्ञेयः । वास्तव्यां नैसर्गिक्यां लीलायां भुवि प्रकटतया सत्यां कथमेवं सम्भवतीति निरासाय स्वमूर्त्येति द्वयेनाग्रे भुवि लीलाप्राकट्यप्रयोजनाभावं ज्ञापयितुं लीलाप्राकट्यप्रयोजननिष्पत्तिकथनपूर्वकं सर्वादृश्यत्वलक्षणं पदमगादित्युक्तम् । लौकिक्या भूमेरधिष्ठानत्वमात्र उपयोगादस्वाभाविकत्वमिति तद्विलक्षणं पदमिति ज्ञापनाय स्वं पदमगादित्युक्तम् । अग्रे च ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनां विप्रशापः कथमभूद् वृष्णीनां कृष्णचेतसामिति राजप्रश्नवाक्यव्याजेन नित्यलीलामध्यपातियादवस्वरूपनिरूपणेन प्राप्तशापानां तद्भिन्नत्वं ज्ञापितं व्यासेन । बिभ्रद्वपुः

सकलसुन्दरसन्निवेशं कर्माचरन् भुवि सुमङ्गलमाप्तकामः * आस्थाय धाम रममाण उदारकीर्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेष इत्युत्तरे तु स्वरूपं लीलां च भुवि प्रकटीकुर्वन् प्रयोजननिष्पत्तिं ज्ञात्वा धाम सहजं नित्यं यल्लीलास्थानं तदेवास्थाय रममाण एव, स्थितकृत्यशेषः स्थितोऽग्रिमासुरव्यामोहलक्षणः कृत्यशेषो यस्य तादृशः कुलं संहर्तुमैच्छतेत्येकेन शुकैरुक्तम् । तेनास्य कुलस्य मायिकत्वं सम्भवति । कृत्यसिद्धिर्यतस्तथैव भवति । भुवीति पूर्वमुक्तमेवेति तद्भिन्नमेव धाम वाच्यम् । तदुक्तमस्माभिः । अग्रेऽपि कालात्मना निसृष्टा मुनय इत्युक्तम् । न तु पूर्वलीलाकर्त्रेति ॥

श्रुत्युक्तवैपरीत्येन यन्मोहाय हरिः स्वयम् ।
प्रदर्शयति तन्मोहगमनायेति तद्वचः ॥
क्षिपाम्यजस्रमित्युक्तेर्यतस्तन्मोहनित्यता ।
अतोऽनङ्गीकृतिस्तेषां युक्ता तामसिनां नृणाम् ॥
तत्सङ्गादन्यथाभूतहृदयाः सात्त्विका अपि ।
मा भवन्त्विवसयं यत्नस्तेन तुष्टोऽस्तु मे हरिः ॥
काञ्चनीकरणे शक्तो मणिर्धातुगणस्य यः ।
तस्याश्मनां तथाभावाकरणेऽपि न हि क्षतिः ॥

एतेनेत्यादि ॥ एतेनेति ॥ प्रभासीयलीलाया मायिकत्वोपपादनेन ॥ अन्यथेति ॥ सर्वस्य मिथ्यात्वे ॥ एवं सतीति ॥ अस्मिन् वाक्ये नश्वरपदनिर्देशे सति । उक्तदृष्ट्येतिपाठः । ननु हंसगीतायामेव, ईक्षेत विभ्रममिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रम् * विज्ञानमेकमुरुधेत्यादौ, जगन्मिथ्या विनष्टत्वात्, स्वप्नवत् – अतिलोलत्वाद्, अलातचक्रवदित्येवं जगन्मिथ्यात्वसाधकानुमानबोधनात्तत्र प्रभासीयप्रसङ्गाभावेन वाक्ये तद्विषयत्वस्य वक्तुमशक्यत्वादितिचेन्न । अत्रापि विज्ञानमित्युत्तरार्द्धे, त्रिधा गुणविसर्गकृतो विकल्पविज्ञानम् । उरुधा विभानात् । मायावत् । स्वप्नवदित्यनेन सगुणसृष्टावेवान्यख्यात्यविज्ञानरूपत्वनिगमनेन निरीश्वरस्मार्तसृष्टावेव

तथा पर्यवसानात्, सदेव सोम्येत्यादिश्रुत्युक्तप्रपञ्चमिथ्यात्वानापादकत्वात् । अन्यथा पूर्ववाक्यविरोधस्यापरिहारेण द्वयोरप्यसङ्गतत्वापातात् । तत्रापीन्द्रियग्राह्यस्यैव स्वाभिन्नत्वबोधनात् । अतस्तत्रापि विषयभेदोऽवश्यमभ्युपेयः । एवमेव द्वादशाध्यायसन्दर्भेऽपि ज्ञेयम् । तत्रापि, स एष जीव इत्यारभ्य, पटो यथा तन्तुवितानसंस्थ इत्यन्तैः सार्द्धचतुर्भिर्भगवद्रूपं प्रपञ्चमुक्त्वा, य एष संसारतरुरित्यारभ्य, मायामयं वेद स वेद वेदमित्यन्तैः सार्द्धैस्त्रिभिर्द्वितीयस्य कथनात् । अत एव पूर्वत्र, अयं हि जीवस्त्रिवृदब्जयोनिरित्यनेन त्रिगुणाधारत्वं लोकपद्मकारणत्वमेकत्वादिकं चेति तस्योक्तम् । द्वितीये तु, द्वे अस्य बीजे इत्यनेन कारणद्वयं बोधितम् । तेनात्रापि पूर्ववदेव निरीश्वरसृष्टौ पर्यवसानं बोध्यम् । एवमन्यत्रापि वैराग्यार्थे नृसिंहतापिनीयोक्तामैन्द्रजालिकसृष्टिमादायैव बोध्यते इति, पुराणेष्विति निबन्धोक्तदिशाऽवगन्तव्यम् । तदस्मत्पितृचरणैरावरणभङ्गे सम्यक् प्रदर्शितमिति नेह प्रपञ्च्यते । प्रकृतमनुसरामः । ननु प्रभासीयलीलासम्बन्धिनां मायिकत्वे द्वारिकालीलास्थानामपि मायिकत्वमेव सिद्ध्यति । द्वारिकास्थानामेव शापात् । शप्तानामेव च तथाभावादित्याशङ्कयामाहुः ॥ अत्र विद्वद्भिरित्यादि ॥ स्वमूर्त्यैति द्वयेनेति ॥ स्वमूर्त्या लोकलावण्यनिर्मुक्त्यालोचनं नृणाम् * गीर्भिस्ताः स्मरतां चित्तं पदैस्तानीक्षतां क्रियाः ॥ आच्छिद्य कीर्तिं सुश्लोक्यां वितत्य ह्यञ्जसा नु कौ । तमोऽनया तरिष्यन्तीत्यगात् स्वं पदमीश्वर, इति द्वयेन ॥ तद्भिन्नत्वमिति ॥ यदिदं यादवकुलं वीर्यशौर्यश्रियोद्धतम् * लोकं जिघृक्षुरुद्धं वेलयेव महार्णव इति भगवद्वाक्योक्तधर्मवत्त्वाद्भुसेवित्वे च तदभावात्तेषां तद्भिन्नत्वम् । ननु बिभ्रद्वपुरित्युत्तरेऽकुलमिति पदच्छेदस्याशक्यत्वान्नैवं वक्तुं शक्यमित्यत आहुः ॥ बिभ्रदित्यादि ॥ तथाच यथा, द्वयाह प्राजापत्यादावेकगोलके देवासुरभेदभिन्नानीन्द्रियाणि । तथैव पुरुषाविष्टभूतन्यायेन तेष्वाविष्टं यदुकुलं तदेव तथेत्यर्थः । अत्रैवं बोध्यम् । प्रथमस्कन्धेऽर्जुनोक्तावेवं बलिष्ठैर्यदुभिर्महद्भिरितरान् विभुः * यदून् यदुभिरन्योऽन्यं भूभारान् संजहार हेति । एकादशे भगवद्विचारानुवादे च, भूभारराजपृतना यदुभिर्निरस्य गुप्त स्वबाहुभिरचिन्तयदप्रमेयः * मन्येऽवनेर्ननु गतोऽप्यगतं हि भारं यद् यादवं कुलमहो अविषह्यमास्ते इत्यनेन च

भूभारभूतत्वमुक्तम्। तृतीयस्कन्धे चोद्धवैः, दुर्भगो बत लोकोऽयं यदवो नितरामपीत्युक्त्वा, ते सर्वे ? उत केचिदेवेत्याकाङ्क्षायां, ये संवसन्तो न विदुर्हरिं मीना इवोडुपमिति पूर्वोक्तानां स्वरूपमुक्तम्। इङ्गितज्ञाः पुरुप्रौढा एकारामाश्च सात्वताः * सात्वतामृषभं सर्वे भूतावासममंसतेत्यनेन विपरीतज्ञानवत्त्वं चोक्तम् । एवमान्यत्रिकमपि। एवंभावश्च न नित्यलीलास्थेषु घटते। एवं सति स्वस्मिन्निव परिकरे प्रियाकृतत्वबुद्ध्युत्पादनाय यन्नाश्यमंशावतरणादिना कार्यसृष्टित्वप्रतिपादकमारब्धं तल्लोकवत् कार्यदेहावस्थाप्रदर्शनप्राणत्यागचिताग्निप्रवेशसांपरायिककारणादिना चाऽसुराणां स्वपरिकरे लौकिकत्वबुद्धिस्थिरीकरणेनैवं समापितम्. एतदेवात्रापि, यथेन्द्रजालेत्यादिना पूर्वं सूचितम्। आद्यन्तमेकरीत्या नाट्य एव हि नटस्य माहात्म्यमन्यथा वैदग्ध्यहानिरित्यतः स्वस्मिँस्तथा प्रदर्शनं, परिकरे चैवं प्रदर्शनामित्यपि सर्वं निबन्धे—रामस्य सत्त्वदेहस्तु पूर्वमेव निरूपितः * बलवद्रुक्मिणीमुख्या नाट्यं सर्वमिहोदितमित्युक्तदिशा सिद्ध्यति तेनेदमेव हृदिकृत्य, यन्मायिकत्वकथनं पुराणेषु प्रदृश्यते * तदिन्द्रजालपक्षेण मतान्तरमिति ध्रुवमित्यनेनोक्तम्। एवं स्वभर्तुरभिप्रायं ज्ञात्वैव श्रीमदुद्धवस्यापि वृष्णिषु स्नेहपाशविच्छेदप्रार्थनादयः। अथापि तदभिप्रायं जानन्नहमरिन्दम * इतिवाक्यात्। एवञ्चात्रेदं बोध्यम्। प्रभुप्राकट्यसमयेऽवतारिता न सर्व एव लीला, अपि तु कतिपये। स्वबाहुभिरिति यदुविशेषणाच्च। पूर्वजन्मांशावतरणादिकथनाच्च. अंशावतरणप्रकारश्च त्रिधा। जीवानां क्वचित्कार्य्यद्वारा स्वतेजःसंक्रामणरूपो यथा पाण्डवादिषु। तथा सति तदंशभूतशरीरे जीवान्तरप्रवेशः। क्वचित्तु शापादिना स्वदेहमन्यथा कृत्वाऽकृत्वा वाऽन्यबीजे वीर्ये वा सदेहाः प्रविश्यावतरन्ति। यथा यमलार्जुनविदुरादयः। क्वचित्तु पूर्वं देहं विहाय लिङ्गेन सहावतरन्ति । यथा श्रीनन्दादयः। तत्र पूर्वस्मिन् प्रकारे जीवस्य भक्त्यादिना यथाऽधिकारं फलं, देहस्य त्यागस्तदाविष्टस्य पूर्वदेहस्य पातोऽशस्यांशिनि प्रत्यापत्तिः। द्वितीये तु, यावदधिकारमिति न्यायाच्छायाद्युपात्तदेहस्य त्यागस्तदाविष्टस्य पूर्वदेहस्य यथास्थिततामात्रम् । यमलार्जुनादौ विदुरोऽपि परित्यज्य प्रभासे देहमात्मवान् * कृष्णादेशेन तच्चित्तः पितृभिः स्वक्षयं ययावित्यादौ च तथा निर्णयात् ।

जन्मान्तरमापन्ना तु भगवत्सेवाकरणेन भक्त्या वा यथाधिकारं भगवति नित्यलीलायां श्लेषेण प्रवेशः । स्थूलसूक्ष्मशरीरयोस्त्यागः । भौमाहृतानां त्वष्टावक्रप्रसादशापाभ्यां भगवत्पत्नीत्वचोरहस्तगतत्वादि । तत्र लक्ष्म्यंशस्य लक्ष्म्यां प्रत्यापत्तौ कार्यदेहस्यान्यथात्वम् । गतश्रीषु गृहेष्विति वाक्यात् । तेन न कोऽपि दोषः । श्रुतीनां तु कार्यकोटावपि प्रवेशाच्छब्दब्रह्मात्मक एव देहः । अग्निकुमाराणामपि प्रसादरूपस्त्रीशक्तिरूपो श्राह्म एव । यासां च कार्य आसीत् स तूक्त एव । तेनैव न्यायेन गोपीचन्दननिदानभूतदेहोऽपि व्याख्यातः । एवं महिष्यादीनां तु पूर्वमुक्त एवमेव एव यथासंभवमितरेषामपि ज्ञेयः । एवं सति यमनृगनलकूबरादिवत् स्वदेहानामेव कार्यदेहान्तरे प्रवेशकथनेनापि लीलास्थानां नित्यत्वसिद्धौ निष्प्रत्यूहायामपि सत्यां यत्प्रातिभासिकदेहाङ्गीकरणं तद्भगवद्वाक्यानुरोधात् । तदेतदुक्तं, तथेत्यर्थः पर्यवस्यतीत्यन्तेन । एतदेव दृढीकृतम्, अत एवेत्यारभ्य, न तु पूर्वलीलाकर्मेत्यन्तेन ॥ नच, कालात्मना भगवता शक्रदर्पं जिघांसतेत्यत्रापि कालात्मपदान्नेदं सांप्रतमिति वाच्यम् । दर्पहतिमात्रे तत्करणभूतवाक्योक्तिमात्र एव च तद्रूपप्राकट्येनेतरलीलायां तदभावेनादोषात् । कालस्य भगवच्चेष्टारूपत्वेन गुणीभूततया सत्त्वेऽपि अदोषाच्चेति । अयं चार्थस्तैत्तरीयाऽऽरण्यके भर्तृसूक्ताऽनुवाके भर्त्ता सन् भ्रियमाणो बिभर्त्तीत्यादिना प्रतिपादितः । तथाहि ॥ भर्त्ता सन् भ्रियमाणो बिभर्त्ति एको देवो बहुधा संनिविष्टः । यदा भारं तन्द्रयते स भर्त्तुं निधाय भारं पुनरस्तमेतीति ॥ भर्त्ता सन्, पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया, यस्यान्तःस्थानि भूतानीत्युक्तरीत्या धारकः सन्, यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः, यः पृथिव्यां तिष्ठन्नित्युक्तरीत्या भ्रियमाण एव बिभर्त्ति । तत्र हेतुः– एको देवो बहुधा निविष्ट इति । देवः क्रीडिता, बहुधा एकैकस्मिन् शरीरे वैश्वानराक्षिपुरुषप्रादेशमात्राङ्गुष्ठमात्रादिरूपैर्नानाप्रकारेण स्थितः क्रीडार्थं धारयति । यदा तत्क्रीडाविरागकाले भारं भूभारभूतं यादवकुलं भर्तुं तन्द्रयते आलस्यं प्राप्नोति तदा भारं पूर्वोक्तविधं क्वचित् प्रभासादौ निक्षिप्य पुनरस्तमेति । यथाऽवतारात् पूर्वमदृश्यमानः स्थितस्तथैवादर्शनं प्राप्नोतीति यथास्थितस्यैवास्तभवनमुक्तम् । एतदेव तृतीयस्कन्धे, कृष्णद्युमणिनिम्लोच इत्यनेनो-

ख्वैदुक्तम्। ननु भर्त्तव्यस्य कुतो भारता, येन भर्त्तुस्तन्द्रेत्याकाङ्क्षाया-माह ॥ तमेव मृत्युममृतं तमाहुः तं भर्त्तारं तमु गोप्तारमाहुः। संभृतो भ्रियमाणो बिभर्त्ति य एनं वेद सत्येन भर्त्तुमिति ॥

अत्र पूर्वार्धे अविदुषां विदुषां भक्तानां च ज्ञानप्रकारा उक्ताः। क्रमेण तत्कथनप्रयोजनमुत्तरार्द्धेनाह। य एनं भर्त्तारं सत्येनामायया भर्त्तु धारयितुमनुसंधातुं वेद, संभृतः स तेन व्याप्तो भ्रियमाणस्तेनैवाऽऽविश्य धार्यमाणस्तं बिभर्त्ति। तथाच भक्तातिरिक्ता न बिभ्रतीति भक्त्यभावात्तेषां भारता। तेनं भर्त्तुस्तन्द्रेति सत्येनैव भर्त्तव्य इति तदुक्तिप्रयोजनमुदितम्। अथ पूर्वोक्तं पोषयितुं सर्वदा भगवदनुसंधानाय च तृतीयया भूभारहेतुं वदन्, समोऽहं सर्वभूतेष्वित्यनेनोक्तेऽर्थे निदर्शनमाह ॥ सद्योजातमुत जहात्येषः उतो जरन्तं न जहात्येकम्। उतो बहूनेकमहर्जहार अतन्द्रो देवः सदमेव प्रार्थइति ॥ एष भर्त्ता सद्योजातं, भवद्भिरंशैर्यदुषूपजन्यतां, स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयँश्चरेदित्यत्र यावद्भूभारहरणमुपजननस्योक्तत्वात् प्रभासीयलीलायामपि भूभारहरणायेदानीं यो जातः सद्योजातः वज्रोऽन्यो वा तमुत जहाति भूमौ त्यजति। वज्रस्तस्यामभूद् यस्तु मौसलादवशेषितः * । स्त्रीबालवृद्धानादाय हतशेषान् धनञ्जय * इत्यादिवाक्यात्। उतो अपि एकं जरन्तम्। उद्धवं न जहाति न त्यजति। स्वधाम नय मामपीतितदभिलापात् स्वस्थाने बदर्याश्रमे तं प्रेषयन् ब्रह्मवादादिकं चोपदिशन्न त्यजति। उतो बहून् यादवान्, एकमहः। सप्तम्याः स्वादेशः। एकस्मिन्नहनि जहार भूर्लोकादयः हृतवान्। अतोऽयं देवः, अतन्द्रः अभक्तभक्तत्यागात्यागकरणे अनलसः। सदमेव सदैव प्रार्थः भक्तैर्भूत्वाऽनुसंधेय इत्यर्थः। एवं भारहेतुमुक्त्वा अभारहेतुं तुरीययाऽऽह ॥ यस्तद् वेद यत आबभूव सन्धां च यां संदधे ब्रह्मणैषः। रमते तस्मिन्नुत जीर्णे शयाने नैनं जहात्यहःसु पूर्व्येष्वाति ॥ यत आबभूव, यां च सन्धां प्रतिज्ञां ब्रह्मणा सह संदधे कृतवान्। यस्तद्वेद जानाति तस्मिन् पुरुषे जीर्णे जरति शयाने स्वपिति रमते तेनैव क्रीडति। एनं जानन्तं भक्तं पूर्व्येष्वहस्सु पूर्वे भवेषु दिनेषु न जहाति न त्यजति। ज्ञानृत्वात्तेन कार्याचिकीर्षया तादृशमुद्धवं न त्यक्तवान्। तथाच इदम् अभारहेतुत्वनिदर्शनमित्यर्थः। एवं भाराभारहेतुमुक्त्वा आहरणप्र-

कारं वदिष्यन् सर्वस्य तदाज्ञाकर्तृत्वसूचनपूर्वकं तिरोभानप्रकारं व- क्ष्यति पञ्चम्या, स्तौति च ॥ त्वामापो अनु सर्वाश्चरन्ति जानतीः वत्सं पयसा पुनानाः । त्वमग्निं हव्यवाहꣳ समिन्त्से भर्त्ता मातरिश्वा प्रजानामिति ॥ हे भर्त्तः ! त्वदभिप्रायं, समुद्रः सप्तमेऽह्न्येतां पुरीं च प्लावयिष्यतीतिरूपं त्वां वा जानतीः जानत्यः, सर्वा आपः सामु- द्र्यः, अनु लक्ष्यीकृत्य चरन्ति तदुक्तं-द्वारिकां हरिणा त्यक्तां समुद्रो- ऽप्लावयत् क्षणात् * वर्जयित्वा महाराज श्रीमद्भगवदालयमि- ति । ज्ञाने दृष्टान्तः । वत्सं पयसा पुनाना इति । स्वीयं वत्सं ज्ञात्वा क्षीरेण पोषयन्त्यो गवादय इवेत्यर्थः । निरुक्ते, अश्वं नत्वा वारवन्त- मित्यत्रोपमावाचकपदाभावेऽप्युपमाव्याख्यानाददोषः । तथाच भ- गवदिच्छाज्ञानेऽभिमानिप्रेरिता जडा अपि यत्र भगवत्कार्यं कुर्वन्ति तत्र चेतनानां किं वक्तव्यमित्यर्थः । त्वम् अग्निम् आवरणरूपं हव्यवाहं मुखरूपं वा समिन्त्से । ञिइन्धी दीप्तौ । संदीपयसि । एतेन तिरोभाव- प्रकारकथनेन स्वरूपनित्यत्वमुक्तम् । स्तुतिमाह । त्वं प्रजानां भर्त्ता धारकः पोषकश्च । एतेन, त्वं मायया त्रिगुणयात्मनि दुर्विभाव्य इति व्याख्यातम् ॥

तत्र सप्तमी ॥ नमो वामस्तु शृणुतꣳ हवं मे प्राणापानावजिरꣳ संच- रन्तौ । ह्वयामि वां ब्रह्मणा तत् क्षेमतम् । यो मां द्वेष्टि तं जहितं युवाना इति ॥ हे प्राणापानौ देवौ, वां युवाभ्यां नमोऽस्तु मे मम हवमाह्वानं शृणुतम् । अजिरं रणाजिरं सञ्चरन्तौ विचरतौ, वां युवां ब्रह्मणा मन्त्रेण ह्वयामि तत्तूर्णं शीघ्रम् एतं मद्गृहे आगच्छतम् । प्रयोजनमाह । यु- वाना नित्यतरुणौ युवां । यः शत्रुः मां द्वेष्टि तं जहितं विनाशयत- म् । तथा युवां विना न मे शत्रुनिवृत्तिरतो यथाऽस्मद्विज्ञापनेन भूश- त्रवो भूमिष्ठभक्तशत्रवश्च हतास्तथाऽस्मद्गृह आगत्य तत्राप्यस्म- द्बाधकान्निवर्तयतमित्यर्थः ॥ अथाष्टमी ॥ प्राणापानौ संविदानौ ज- हितम् । अमुष्यामुना मा संगसाथाम । तं मे देवा ब्रह्मणा संविदा- नौ विधाय दत्तं तमहꣳ हनामीति ॥ हे प्राणापानौ देवौ, संविदानौ ऐकमत्यं प्राप्तौ, जहितम् अस्मच्छत्रुं परित्यजतम् । अमुष्य मच्छ- त्रोरसुना प्राणेन मा संगसाथां संगतौ मा भूताम् । एवं ब्रह्मणा म- दीयविज्ञापनमन्त्रेण संविदानावैकमत्यं प्राप्तौ युवां, तं शत्रुं, मह्यं व- धाय दत्तं प्रयच्छतम् । शत्रुमहं हनामि । नाशयामि । तथाच हनने श्रम

इति मदधीनतां तस्य संपादयतम् । पश्चान्मयैव सनिवर्त्तनीय इत्यर्थः । असुराणामपि भगवद्वीर्यरूपत्वात्तद्धनने भगवतः कोपो भवेदिति तदभावाय तस्य द्वेष्टृत्वकथनपूर्वकं सांप्रतलीलया तदनुकूलताज्ञापनपूर्वकमेवं प्रार्थनम् ।

एवं स्तुत्वा सांप्रतिकलीलायां भारभूतस्य स्वरूपं नवम्याह ॥ असज्जाजान सत आबभूव यं यं जजान सुगोपो अस्य । यदा भारं तन्द्रयते स भर्तुं परास्य भारं पुनरस्तमेतीति ॥ सतो यादवकुलाद्भगवतो वा असम्मायिकं जजान उत्पन्नम् । तन्नगमकम्–आबभूव । ईषद् बभूव । इत्थं, सृजस्यवसि लुम्पसि तद्गुणस्थ इत्यादिदेवस्तुतेरर्थ उक्तः । किञ्च । मातरिश्वा त्वमेव प्राणो वायुश्च । तेनानस्तमितत्वबोधनात्, शुद्धिर्नृणां न तु तथेह दुराशयानां विद्याश्रुताध्ययनदानतपःक्रियाभिः इत्यत्रोक्तं भगवद्यशसश्च श्रद्धया शोधकत्वमुक्तम् । अपहतपाप्मत्वात् । तेन वक्ष्यमाणयुद्धाऽऽदिकं त्वदिच्छयैव, न तु कर्मविपाकरूपमिति बोधितम् । अथ षष्ठ्या स्तुवन् भारहरणाय युद्धमाह ॥ त्वं यज्ञस्त्वमुमेवासि सोमः । तवेवाहवमायन्ति सर्वे । त्वमेकोऽसि बहूननुप्रविष्टो नमस्ते अस्तु सुहवो म एधीति ॥ त्वं यज्ञप्रवर्त्तकत्वेन यज्ञोऽसि । एतदेव देवस्तुतावुक्तम् । यश्चिन्त्यते प्रयतपाणिभिरध्वराग्नौ त्रय्या निरुक्तविधिनेश हविर्गृहीत्वेत्यनेन । वाशिष्ठो हसात्महव्य इत्युपाख्याने त्वय्येव यज्ञप्रतिष्ठायाः श्रावणात् । किञ्च त्वमेव सोमोऽसि । उमया संहारकशक्त्या सहवर्त्तमानः सोमस्त्वमेवासि । एतदेव देवस्तुतौ, नस्योतगाव इव यस्य वशे भवन्ति ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः * कालस्य ते प्रकृतिपूरुषयोः परस्येत्यनेनोक्तम् । युद्धादिकमाह । हे देव, सर्वे यदुष्ववतीर्णास्तवाहवं संग्राममायान्त्यागच्छन्ति । तत्र हेतुः– त्वमेको बहूँस्ताननुप्रविष्टोऽसीति । युद्धं त्वदिच्छयैव, न तु कर्मविपाकेनेत्यर्थः । तदुक्तं– जन्तुर्मुकुन्देन विमोहिता भृशामिति । एवं लीलामुक्त्वा नमन् प्रार्थयते । ते नमोऽस्तु । मे मम सुहव एधि । सुष्ठु समीचीनं हवमाह्वानं यस्य तादृशो भव । आह्वातुं सुलभो भवेत्यर्थः । तत्रापि, नताः स्म ते नाथ पदारविन्दमिति प्रागेवोक्त्वा ततः, स्वधाम परमं विशस्व यदि मन्यसे इति प्रार्थितम् । एवं केवलं भगवन्तं स्तुत्वा द्वाभ्यां रामकृष्णौ स्तौति । असुरवधाय द्विरूपेणावतीर्णत्वाद्दीपद्बभूव नश्वरं ब-

भूवेति । मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति संध्याधिकरणसिद्धान्तसूत्रे तदुक्तम् । अत्रापि, प्रत्यनीकं मन्यमाना बलभद्रं च मोहिता इति कथनात्तद्दृष्टयादिषु यद्भासत् तथैव । अत्रैवं बोध्यम् । भगवान् यदा तिरोधित्सति । तदा मायां विस्तारयाति । तस्याश्च षट्स्थानानि । निषिद्धदेशकालद्रव्यकर्तृमन्त्रक्रियाः । तेषु प्रकृते मैरेयद्रव्यदुरुक्तिक्रियाभ्यामाश्रयाभ्यां तामुत्थाप्य अनित्यलीलामध्यपातिशस्त्राहतिद्वारा विषयतारूपास्ते प्रत्युत्पादिताः । ततो व्यामुग्धनित्यलीलामध्यपातिशस्त्राहतिद्वारा विषयतारूपास्तेनाशितास्तेनेतरेषां लीलास्थेष्वेव विरुद्धबुद्धिरुत्पादितेति।तदेतदुक्तं, यं यं जजान स उ गोपो अस्येति । गीर्वाणी आज्ञात्मिका । तद्रक्षक एव स यं यमुत्पादितवान् । तथाच तस्मिन् पूर्वसारूप्यात्तद्विपर्यायणी हत इति बुद्धिरिति तत्स्वरूपमुक्तम् । उक्तां लीलामुपसंहरति । यदा भारमित्यादि । अर्थस्तु व्याख्यात एव । लीलामुपसंहृत्य मध्ये प्राणरूपत्वं यदुक्तं तत्रोपपत्तिं दशम्याऽऽह ॥ तद्वै त्वं प्राणो भवः महान् भोगः प्रजापतेः । भुजः करिष्यमाणः बद्देवान् प्राणयो नवेति । यत यदा त्वं भुजः भोगान् करिष्यमाणः सन् नव देवान् नवगोलकवर्तिदेवान् प्राणयः प्रकर्षेण व्याप्तवानसि तत् तेन देव त्वं प्राणः प्राणनामा अभवः । कीदृशो भोगो यदर्थमेतावत्करणं तत्राह । प्रजापतेः उत्पत्त्यानन्दिनः सकाशान्महान् अधिको ब्रह्मानन्दात्मेत्यर्थः । तथाच तदर्थमेतावत् करणम् । प्राणत्वेनापानताप्युक्तैवोपलक्षणतयेति शुभम् ॥ प्रकृतमनुसरामः ॥

ननु यद्येवं तदा सर्वेषामेवायमर्थः कुतो न भवतीत्यत आहुः ॥ श्रुत्युक्तेत्यादिद्वयम् ॥ तर्हि प्रयासोऽयं किमर्थं इत्यत आहुः ॥ तत्सङ्गादित्यादि ॥ एतस्याः पाक्षिकसाधनत्वं निराकुर्वन्ति ॥ काश्चनीत्यादि ॥

अत्र जगन्मिथ्यावादी पुनराशङ्कते ।

नन्वस्तु प्रपञ्चातीतत्वेन लीलानां सत्यत्वं प्रमाणसिद्धत्वाद्, न तु प्रपञ्चस्यापि प्रमाणैस्तथाऽसिद्धत्वादिति चेत् तस्यापि सर्गादिलीलामध्यपातित्वेन श्रीभागवतादिषु निरूपणात् । जगदप्रतीतिप्रसङ्गादिसादिनिरूपणेनैव प्रपञ्चसत्यत्वस्यापि निरूपित-

स्त्वात् पुनर्लिखनेनालम् । तत्र सूत्रभाष्ये श्रीभागवतविवरणादि-ष्वयमर्थो निरूपितः पितृचरणैरिति नाधिकमत्र निरूप्यते । किञ्च महोपनिषदि पठ्यते । एष ह्येव शून्यः, एष ह्येव तुच्छः, एष ह्येवा-व्यक्तोऽदृश्योऽचिन्त्यो निर्गुणश्चेति । महाकौर्म्येऽपि । शमूनं कुरुते विष्णुरदृश्यः सन् परः स्वयम् * तस्माच्छून्यमिति प्रोक्तस्तोदना-त्तुच्छमुच्यते ॥ नैष भावयितुं योग्यः केनाचित् पुरुषोत्तमः । अतो-ऽभावं वदन्त्येनं नाश्यत्वान्नाश इत्यपि ॥ सर्वेषां तदधीनत्वात् तत्तच्छब्दाभिधेयता ॥ अन्येषां व्यवहारार्थमिष्यते व्यवहर्तृभिरि-ति ॥ तेन ब्रह्मणो भावरूपत्वेन, प्रपञ्चस्य भावाभावरूपेण कथं ब्रह्मात्मकता वक्तुं शक्येत्यपि कुचोद्यं निरस्तम् । येषामप्यसत्त्वेन जगदभिमतं, तेषामपि जगन्मध्यपातिभगवन्मूर्तितद्भजनाद्यसहिष्णु-तयैव । तेषां तथात्वं तु कलौ तथा भगवदिच्छयेत्युक्तम् ॥

नन्विति ॥ प्रमाणसिद्धत्वादिति ॥ प्रमाणैः पूर्वोक्तश्रुतिस्मृतिभिः प्रकाशाश्रयन्यायेन ब्रह्मणः सकाशाद्भेदेऽपि अभिन्नतया ब्रह्मात्मक-त्वेनैव निर्णीतत्वात् ॥

तथा सिद्धत्वादिति ॥ नश्वरं गृह्यमाणं चेत्यत्र नश्वरपदाद्, ईक्षेत विभ्रममित्यत्र विभ्रमपदात्तत्सिद्धैरनुमानैश्च सिद्धे नश्वरस्य मायि-कत्वे तस्यास्मिन् प्रपञ्चे दर्शनेन मायिकत्वस्य निर्णीतत्वात् । तथाच प्रत्यक्षानुमानशब्दैः प्रपञ्चसत्यत्वं बाध्यत इत्यर्थः । समाधत्ते ॥ ने-त्यादि ॥ तथाच सिद्धे लीलायास्तत्संबन्धिनां च भिन्नाभिन्नत्वे प्रप-ञ्चस्यापि सर्गादिलीलासंबन्धित्वे तस्य सत्त्वमनिबाधमेवेत्यर्थः । ए-तेन पूर्वोक्ता भेदाभेदप्रतिज्ञा पूरिता ज्ञेया । तथाच सिद्धे ब्रह्मा-त्मकत्वे भावविकारप्रतीतिरप्याविर्भावतिरोभावाभ्यामेव समर्थिता भवति । तथाहि । जायत इति प्रतीतिः शुद्धप्रादुर्भावविषया । धात्वर्थस्यैव तथात्वात् । पूर्वोक्ताभ्यः सत्कार्यवादयुक्तिभ्यः । तदे-तदक्षयं नित्यं जगन्मुनिवराऽखिलम् * आविर्भावतिरोभावजन्मनाश-विकल्पवदिति वैष्णववाक्यात् । विश्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया * यथेदानीं तथाचाग्रे पश्चादप्येतदीदृशमिति तृतीय-

स्कन्धव्याख्याच्च । एवम् अस्तीति प्रतीतिरपि प्रादुर्भावप्रयुक्तेति वि-
षयाणां ब्रह्मात्मकत्वेन न विवादाहो । विपरिणमते वर्धते क्षीयते
इति प्रतीतित्रयी तु पूर्वरूपतिरोभावरूपान्तराविर्भावाविवेकजन्य-
त्वादविविक्ततद्द्वयविषया । वृद्धिक्षयविपरिणामेषु विचारितेषु त-
थैव सिद्धेः । नश्यत इति तु केवलतिरोभावविषया । धात्वर्थस्याद-
र्शनात्मकत्वात् । उक्तप्रमाणेभ्यश्च । तथा सत्याविर्भावतिरोभावयुक्ते
ब्रह्मस्वरूप एव प्रपञ्चे भगवता मायया अविद्यमानं प्रत्याय्यते विद्यमानं
न प्रत्याय्यते इति जीवस्य भ्रमः संसारश्च भवति । अविद्यमानं यत्प्रमाणं
यत् प्रत्याय्यते तदन्तरासृष्टिरूपत्वान्मायामनोमयम् । तेनानुमानादपि
प्रपञ्चसत्यत्वं सिद्ध्यति । तत्रायं प्रयोगः । व्यावहारिकः प्रपञ्चः स्वा
पेक्षयोत्कृष्टसत्ताकप्रपञ्चपूर्वकः । मायिकत्वेनाभिमतत्वात्, मायिक-
त्वाद्वा । स्वाप्नादिप्रपञ्चवदिति । इदं यथा तथा सृष्टिभेदवादे प्रप-
ञ्चितमस्माभिरिति नात्र प्रपञ्च्यते । नन्वस्तु प्रपञ्चस्य भिन्नाभि-
न्नत्वं, तथापि नृसिंहोत्तरतापनीयषष्ठखण्डे स्वप्रकाशमानन्दघनं शू-
न्यमभवदिति । परमं ब्रह्मात्मप्रकाशं शून्यं जानन्त इति च श्राव-
णात् । गौडाचार्यकृते तद्विवरणे च विशेषशून्यमिति व्याख्याना-
त् । ब्रह्म निर्विशेषमेव प्रतिपत्तव्यम् । तथा सति लीलाऽसत्त्वम् ।
किञ्च तत्रैव नवमखण्डे, न ह्यस्ति द्वैतसिद्धिरात्मैव सिद्धोऽद्वितीय इ-
त्युपक्रम्य मायया ह्यन्यदिवेत्युक्त्वा, माया च तमोरूपाऽनुभूतेरिति
तत्स्वरूपं चोक्त्वा, तदेतज्जडं मोहात्मकमनन्तं तुच्छमिदं रूपमस्य
व्यञ्जिकेत्याद्युक्तम् । तेन जगतोऽपि तुच्छत्वं मायिकत्वमिति कथं
ब्रह्मात्मत्वं तत्र निर्णेतुं शक्यमित्याशङ्कायामाहुः ॥ किञ्चेत्यादि ॥ एते
श्रुतिपुराणवाक्ये मध्वभाष्ये प्रथमाध्यायसमाप्तावुपन्यस्ते । तदर्थ-
श्च जयतीर्थेन टीकायां व्याख्यातः । दुर्जनानामव्यक्तत्वादिना शमूनं
कुरुते इत्यादि । योगेन चेश्वरे निषेधमुखवेद्यवस्तुवाचिशब्दप्र-
वृत्तेरुपपत्तेरुपपत्तिः । तत्र शमूनं कुरुते स्वसुखादन्यसुखमल्पं करो-
ति । तोदनात्तुच्छः । अदृश्यः छः छन्नत्वात् । भावयितुमुत्पादयितुं
नाश्यत्वादलक्ष्यत्वादिति । एवं सति तापनीये आनन्दघनपदोत्तरं
शून्यपदोक्त्याऽन्यसुखाल्पीकर्तृत्वमेवाऽर्थो, न तु यावद्विशेषशून्यत्व-
म् । तथा सति लीलानित्यत्वं निर्बाधम् । लीलाभिरेवान्यसुखा-
ऽल्पीकरणात् । तथा परमात्मैव मायया छन्नः सन् तुदतीति तत्प्रयु-

कं तुच्छत्वं, न तु मायाकृतम् । तृतीयया करणतयैवाभिप्रेतत्वात् । अत एव व्यञ्जकत्वमेव श्रावितं, न तु जनकत्वम् । तथा, अन्यदिवेत्युक्तं, न त्वन्यदेवेति । एवं सत्यभावप्रयोजकतया ब्रह्मण्यभावरूपतायां अपि सत्त्वात् प्रपञ्चस्य भावाभावरूपत्वं न ब्रह्मात्मकत्वबोधकमित्यर्थः । एवं प्रमाणपुरःसरं शृण्वन्तोऽपि ये न मोहं जहति तेषामाशयमाहुः ॥ येषामित्यादि ॥ तथात्वमिति ॥ असहिष्णुत्वम् ॥

तस्मादस्माभिरेवोक्तपद्धत्या श्रुतिसिद्धया ॥
ज्ञात्वा ब्रह्मस्वरूपं तत्प्राप्त्यै तद्भजताऽखिलाः ॥ १ ॥

येषां लौकिकमेव मानमधिकं वेदादितोऽलौकिकात्
तत्पादानुगतस्तदर्थ इति च प्रच्छन्नबौद्धास्तु ते ॥
येषां तद्विपरीततैव विदुषां केषां चिदन्तर्गता
तेषामेव मुदेऽस्तु मत्कृतिरियं गोपीशसंसेविनाम् ॥ २ ॥

वरीवर्ति श्रद्धा श्रुतिषु यदि वा व्यासवचने
तदा विद्वांसोऽस्मद्विरचितमिदं मण्डनवरम् ॥
यथोक्तं कण्ठे वा शुकवदथवाऽर्थं च हृदये
मुदा कृत्वाऽऽयत्तं धुनुत रिपुपक्षाभिधतमः ॥ ३ ॥

यदागतं हृदि श्रीमद्गोपीशरतिलक्षणम् ।
शोभां तनोति तदिदं मण्डनं श्रीहरेः प्रियम् ॥ ४ ॥

अखण्डवरपण्डितप्रसृतचण्डपाखण्डवा-
ग्विखण्डनसुचण्डिमा धरणिमण्डलाखण्डलः ॥
नमन्नृपतिमण्डलीमुकुटताण्डवैर्मण्डितः
सपादनखमण्डलः पितुरिहाऽस्तु मे मण्डनम् ॥ ५ ॥

पुनरपि नमामि गोपीपतिरतिमार्गप्रवर्तकाचार्यान् ॥
श्रीवल्लभाऽभिधानान् पितृचरणान् वाङ्मनःकायैः ॥ ६ ॥

एतेनास्मत्कुलपतिः श्रीगोपीजनवल्लभः ॥
प्रीतोऽस्त्वस्मासु तेनैव पूर्णता किमिहापरैः ॥ ७ ॥

इति श्रीमन्निजकटाक्षपाततरणिविघटितमायावादिप्रभृति-
वादितमःपुञ्ज-विकासितश्रीगोकुलाधीशरतिसरसिज-
श्रीगोकुलनाथचरणैकतानगोस्वामि-
श्रीविट्ठलनाथदीक्षितविरचितं
विद्वन्मण्डनं सम्पूर्णम् ॥

सिद्धमाहुः ॥ तस्मादित्यादि ॥ १ ॥ पूर्वोक्ताऽसहिष्णूनां स्वरूपमाहुः ॥ येषां लौकिकेति ॥ इति चेति ॥ अधिकपदमावृत्त्या अत्रापि योज्यम् । प्रच्छन्नबौद्धा इति ॥ प्रच्छन्नासुराः । द्वितीयस्कन्धे । देवद्विषां निगमवर्त्मनि धिष्ठितानां पूर्भिर्मयेन विहिताभिरदृश्यमूर्त्तिः * लोकान् घ्नतामतिविमोहयति प्रलोभं वेषं विधाय बहुभाष्यत औपधर्म्यमित्यत्रासुराणामेवार्थे भगवता बौद्धानां प्रस्थानं कृतमिति कथनाद् दृष्टसृष्टिवादस्य तन्मत एव सत्त्वात्तदुपगच्छतां तथात्वमेवेत्यर्थः । तथाचोक्तं वैष्णवे कलिनिरूपणे- विप्ररूपाणि रक्षांसि राजानः कर्णवेदिन इति । पाद्मोत्तरखण्डे च शिववाक्यम् । मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते * मयैव कथितं देवि कलौ ब्राह्मणरूपिणेति ॥ २ ॥

ग्रन्थस्यावान्तरमुख्यफले आहुर्द्वाभ्यां क्रमेण ॥ वरीवर्त्तीत्यादि ॥३॥४॥

उक्तफलद्वयं श्रीमदाचार्यचरणस्वरूपदार्ढ्यादेव भवतीति बोधयितुं प्रार्थनपूर्वकं नमन्ति द्वाभ्याम्, अखण्डेत्यादिभ्याम् ॥ मण्डलपदं त्रिलिङ्गम् । बिम्बोऽस्त्री मण्डलं त्रिष्वित्यमरः ॥ ५ ॥ ६ ॥ ग्रन्थं समाप्यैतं भगवते समर्पयन्ति ॥ एतेनेति॥ उपायनभूतेनग्रन्थेनेत्यर्थः ॥ ७ ॥

स्निग्धोज्ज्वलं रसघनं हृदयं स्वकीयं
वक्तुं निजेषु नवनीतमयं दधानः ॥
प्रेङ्खन्नितश्च तरले जनमानसेऽपि
ह्यास्ते दयालुरिति तस्य गुणं व्यनक्ति ॥ १ ॥

यस्तं नमामि नवनीरधराभिरामं श्रीबालकृष्णमखिलश्रुतिसारमीशम् ॥
मादृक्प्रपन्नजनकर्ममयोरुपाशविच्छेदचञ्चलमहासिसुनामधेयम् ॥ २ ॥

नमामि श्रीमदाचार्याननल्पकरुणाकरान् ॥
संसारकूपपतितोद्धारप्रकटितस्वकान् ॥ ३ ॥

नमः श्रीविठ्ठलेशाय संसारार्णवसेतवे ॥
श्रीमदग्निकुमाराय भजनानन्दहेतवे ॥ ४ ॥

श्रीमद्वल्लभनन्दनप्रभुकृपादृष्ट्या समासादितज्ञानादिः
प्रणिधाय तच्चरणयोश्चित्तं तदिच्छाबलात् ॥
विद्वन्मण्डनधारणे सुकरतासिद्ध्यै यथाबुद्ध्ययं
तद्दासः पुरुषोत्तमो व्यरचयत् सौवर्णसूत्रं मुदा ॥ ५ ॥

एष पुष्पाञ्जलिः श्रीमदाचार्यचरणाम्बुजे ॥
निवेदितस्तेन नाथा तुष्यन्तु मयि किङ्करे ॥ ६ ॥

इति श्रीमद्वल्लभनन्दनरजस्सनाथश्रीपीताम्बरात्मज
श्रीपुरुषोत्तमप्रणीतं विद्वन्मण्डनविवरणं
पूर्णतामाप ॥

विद्वन्मण्डनमूलग्रन्थः ११२ पृष्ठेऽधस्तात् त्रुटितः। स चेत्थं बोध्यः—

ता, पश्यत्यचक्षुः स शृणोत्यकर्णः, सर्वतःपाणिपादान्तम्, अणोरणीयान् महतो महीयान्, अस्थूलमनाण्वह्रस्वादिश्रुतिर्हि परस्परविरुद्धानेकधर्मवत्त्वं ब्रह्मणि प्रतिपादयति। श्रौतत्वान्नैकतरबाधो वक्तुं शक्यः। तस्मात् तादृशमेव तदिति मन्तव्यम्॥

B
132
V3V6
1908
cop.2

Vitthalanatha Diksita
Srividvanmandanam

[redacted]

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY